# सामवेद संहिता
# कौथुम शाखा

पूर्वार्चिकः
छन्द आर्चिकः

आग्नेयं काण्डम्
प्रथमः प्रपाठकः . प्रथमोऽर्धः
१११ ०१०१अ अग्न आ याहि वीतये गृणानो हव्यदातये .
१११ ०१०१छ् नि होता सत्सि बर्हिषि .. १
१११ ०१०१अ त्वमग्ने यज्ञानां होता विश्वेषां हितः .
१११ ०१०२छ् देवेभिर्मानुषे जने .. २
१११ ०१०३अ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं .
१११ ०१०३छ् अस्य यज्ञस्य सुक्रतुं .. ३
१११ ०१०४अ अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया .
१११ ०१०४छ् समिद्धः शुक्र आहुतः .. ४
१११ ०१०५अ प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियं .
१११ ०१०५छ् अग्ने रथं न वेद्यं .. ५
१११ ०१०६अ त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः .
१११ ०१०६छ् उत द्विषो मर्त्यस्य .. ६
१११ ०१०७अ एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः .
१११ ०१०७छ् एभिर्वर्धास इन्दुभिः .. ७
१११ ०१०८अ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्.
१११ ०१०८छ् अग्ने त्वां कामये गिरा .. ८
१११ ०१०९अ त्वामग्ने पुष्करादध्यथर्वा निरमन्थत .
१११ ०१०९छ् मूर्ध्नो विश्वस्य वाघतः .. ९
१११ ०११०अ अग्ने विवस्वदा भरास्मभ्यमूतये महे .
१११ ०११०छ् देवो ह्यसि नो दृशे .. १०

१११ ०२०१अ नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः .
१११ ०२०१छ् अमैरमित्रमर्दय .. ११
१११ ०२०२अ दूतं वो विश्ववेदसं हव्यवाहममर्त्यं .
१११ ०२०२छ् यजिष्ठमृञ्जसे गिरा .. १२
१११ ०२०३अ उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः .
१११ ०२०३छ् वायोरनीके अस्थिरन्.. १३

१११ ०२०४अ  उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयं .
१११ ०२०४छ् नमो भरन्त एमसि .. १४
१११ ०२०५अ  जराबोध तद्विविड्ढि विशेविशे यज्ञियाय .
१११ ०२०५छ् स्तोमं रुद्राय दृशीकं .. १५
१११ ०२०६अ  प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे .
१११ ०२०६छ् मरुद्भिरग्न आ गहि .. १६
१११ ०२०७अ  अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः .
१११ ०२०७छ् सम्राजन्तमध्वराणां .. १७
१११ ०२०८अ  और्वभृगुवच्छुचिमप्नवानवदा हुवे .
१११ ०२०८छ् अग्निं समुद्रवाससं .. १८
१११ ०२०९अ  अग्निमिन्धानो मनसा धियं सचेत मर्त्यः .
१११ ०२०९छ्  अग्निमिन्धे विवस्वभिः .. १९
१११ ०२१०अ  आदित्प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरं .
१११ ०२१०छ् परो यदिध्यते दिवि .. २०

१११ ०३०१अ  अग्निं वो वृधन्तमध्वराणां पुरूतमं .
१११ ०३०१छ् अच्छा नप्त्रे सहस्वते .. २१
१११ ०३०२अ  अग्निस्तिग्मेन शोचिषा यंसद्विश्वं न्याॅत्रिणं .
१११ ०३०२छ् अग्निर्नो वंसते रयिं .. २२
१११ ०३०३अ  अग्ने मृड महां अस्यय आ देवयुं जनं .
१११ ०३०३छ् इयेथ बर्हिरासदं .. २३
१११ ०३०४अ  अग्ने रक्षा णो अंहसः प्रति स्म देव रीषतः .
१११ ०३०४छ् तपिष्ठैरजरो दह .. २४
१११ ०३०५अ  अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः .
१११ ०३०५छ् अरं वहन्त्याशवः .. २५
१११ ०३०६अ  नि त्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयं .
१११ ०३०६छ् सुवीरमग्न आहुत .. २६
१११ ०३०७अ  अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं .
१११ ०३०७छ् अपां रेतांसि जिन्वति .. २७
१११ ०३०८अ  इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसं .
१११ ०३०८छ् अग्ने देवेषु प्र वोचः .. २८
१११ ०३०९अ  तं त्वा गोपवनो गिरा जनिष्ठदग्ने अङ्गिरः .
१११ ०३०९छ्  स पावक शुधी हवं .. २९
१११ ०३१०अ  परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्.
१११ ०३१०छ् दधद्रत्नानि दाशुषे .. ३०
१११ ०३११अ  उदु त्यं जातवेदसं देवं वहन्ति केतवः .

१११ ०३११छ् दृशे विश्वाय सूर्यं .. ३१
१११ ०३१२अ कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे .
१११ ०३१२छ् देवममीवचातनं .. ३२
१११ ०३१३अ शं नो देवीरभिष्टये शं नो भवन्तु पीतये .
१११ ०३१३छ् शं योरभि स्रवन्तु नः .. ३३
१११ ०३१४अ कस्य नूनं परीणसि धियो जिन्वसि सत्पते .
१११ ०३१४छ् जोषाता यस्य ते गिरः .. ३४

१११ ०४०१अ यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे .
१११ ०४०१छ् प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषं .. ३५
१११ ०४०२अ पाहि नो अग्न एकया पाह्यू३त द्वितीयया .
१११ ०४०२छ् पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो .. ३६
१११ ०४०३अ बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा .
१११ ०४०३छ् भरद्वाजे समिधानो यविष्ठ्य रेवत्पावक दीदिहि .. ३७
१११ ०४०४अ त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः .
१११ ०४०४छ् यन्तारो ये मघवानो जनानामूर्वं दयन्त गोनां .. ३८
१११ ०४०५अ अग्ने जरितर्विश्पतिस्तपानो देव रक्षसः .
१११ ०४०५छ् अप्रोषिवान्गृहपते महां असि दिवस्पायुर्दुरोणयुः .. ३९
१११ ०४०६अ अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य .
१११ ०४०६छ् आ दाशुषे जातवेदो वहा त्वमद्या देवां उषर्बुधः .. ४०
१११ ०४०७अ त्वं नश्चित्र ऊत्या वसो राधांसि चोदय .
१११ ०४०७छ् अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः .. ४१
१११ ०४०८अ त्वमित्सप्रथा अस्यग्ने त्रातरृतः कविः .
१११ ०४०८छ् त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः .. ४२
१११ ०४०९अ आ नो अग्ने वयोवृधं रयिं पावक शंस्यं .
१११ ०४०९छ् रास्वा च न उपमाते पुरुस्पृहं सुनीती सुयशस्तरं .. ४३
१११ ०४१०अ यो विश्वा दयते वसु होता मन्द्रो जनानां .
१११ ०४१०छ् मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये .. ४४

१११ ०५०१अ एना वो अग्निं नमसोर्जो नपातमा हुवे .
१११ ०५०१छ् प्रियं चेतिष्ठमरतिं स्वाध्वरं विश्वस्य दूतममृतं .. ४५
१११ ०५०२अ शेषे वनेषु मातृषु सं त्वा मर्तास इन्धते .
१११ ०५०२छ् अतन्द्रो हव्यं वहसि हविष्कृत आदिद्देवेषु राजसि .. ४६
१११ ०५०३अ अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः .
१११ ०५०३छ् उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः .. ४७
१११ ०५०४अ अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे .

१११ ०५०४छ् ऋचा यामि मरुतो ब्रह्मणस्पते देवा अवो वरेण्यं .. ४८
१११ ०५०५अ अग्निमीडिष्वावसे गाथाभिः शीरशोचिषं .
१११ ०५०५छ् अग्निं राये पुरुमीढ शुतं नरोऽग्निः सुदीतये छर्दिः .. ४९
१११ ०५०६अ शुधि शुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः .
१११ ०५०६छ् आ सीदतु बर्हिषि मित्रो अर्यमा प्रातर्यावभिरध्वरे .. ५०
१११ ०५०७अ प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना .
१११ ०५०७छ् अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि .. ५१
१११ ०५०८अ अध ज्मो अध वा दिवो बृहतो रोचनादधि .
१११ ०५०८छ् अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण .. ५२
१११ ०५०९अ कायमानो वना त्वं यन्मात्रीरजगन्नपः .
१११ ०५०९छ् न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभुवः .. ५३
१११ ०५१०अ नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते .
१११ ०५१०छ् दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः .. ५४

प्रथम प्रपाठकः . द्वितीयोऽर्धः
११२ ०६०१अ देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचं .
११२ ०६०१छ् उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते .. ५५
११२ ०६०२अ प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता .
११२ ०६०२छ् अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः .. ५६
११२ ०६०३अ ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता .
११२ ०६०३छ् ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे .. ५७
११२ ०६०४अ प्र यो राये निनीषति मर्तो यस्ते वसो दाशत्.
११२ ०६०४छ् स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणं .. ५८
११२ ०६०५अ प्र वो यह्वं पुरूणां विशां देवयतीनां .
११२ ०६०५छ् अग्निं सूक्तेभिर्वचोभिर्वृणीमहे यंसमिदन्य इन्धते .. ५९
११२ ०६०६अ अयमग्निः सुवीर्यस्येशे हि सौभगस्य .
११२ ०६०६छ् राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानां .. ६०
११२ ०६०७अ त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे .
११२ ०६०७छ् त्वं पोता विश्ववार प्रचेता ताक्षि यासि च वार्यं .. ६१
११२ ०६०८अ सखायस्त्वा ववृमहे देवं मर्तास ऊतये .
११२ ०६०८छ् अपां नपातं सुभगं सुदंससं सुप्रतूर्तिमनेहसं .. ६२

११२ ०७०१अ आ जुहोता हविषा मर्जयध्वं नि होतारं गृहपतिं दधिध्वं .
११२ ०७०१छ् इडस्पदे नमसा रातहव्यं सपर्यता यजतं पस्त्यानां .. ६३
११२ ०७०२अ चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावन्वेति धातवे .
११२ ०७०२छ् अनूधा यदजीजनदधा चिदा ववक्षत्सद्यो महि दूत्या३ं चरन्.. ६४

११२ ०७०३अ इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व .
११२ ०७०३छ् संवेशनस्तन्वे३ चारुरेधि प्रियो देवानां परमे जनित्रे .. ६५
११२ ०७०४अ इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया .
११२ ०७०४छ् भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव .. ६६
११२ ०७०५अ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निं .
११२ ०७०५छ् कविं सम्राजमतिथिं जनानामासन्नाः पात्रं जनयन्त देवाः .. ६७
११२ ०७०६अ वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवाः .
११२ ०७०६छ् तं त्वा गिरः सुष्टुतयो वाजयन्त्याजिं न गिर्ववाहो जिग्युरश्वाः .. ६८
११२ ०७०७अ आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः .
११२ ०७०७छ् अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वं .. ६९
११२ ०७०८अ इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन .
११२ ०७०८छ् नरो हव्येभिरीडते सबाध आग्निरग्रमुषसामशोचि .. ७०
११२ ०७०९अ प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति .
११२ ०७०९छ् दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्ध .. ७१
११२ ०७१०अ अग्निं नरो दीधितिभिरण्योर्हस्तच्युतं जनयत प्रशस्तं .
११२ ०७१०छ् दूरेदृशं गृहपतिमथव्युं .. ७२

११२ ०८०१अ अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासं .
११२ ०८०१छ् यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ .. ७३
११२ ०८०२अ प्र भूर्जयन्तं महां विपोधां मूरैरमूरं पुरां दर्माणं .
११२ ०८०२छ् नयन्तं गीर्भिर्वना धियं धा हरिश्मश्रुं न वार्मणा धनर्चिं .. ७४
११२ ०८०३अ शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि .
११२ ०८०३छ् विश्वा हि माया अवसि स्वधावन्भद्रा ते पूषन्निह रातिरस्तु.. ७५
११२ ०८०४अ इडामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध .
११२ ०८०४छ् स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे .. ७६
११२ ०८०५अ प्र होता जातो महान्नभोविन्नृषद्मा सीददपां विवर्ते .
११२ ०८०५छ् दधद्यो धायी सुते वयांसि यन्ता वसूनि विधते तनूपाः .. ७७
११२ ०८०६अ प्र सम्राजमसुरस्य प्रशस्तं पुंसः कृष्टीनामनुमाद्यस्य .
११२ ०८०६छ् इन्द्रस्येव प्र तवसस्कृतानि वन्दद्वारा वन्दमाना विवष्टु .. ७८
११२ ०८०७अ अरण्योर्निहितो जातवेदा गर्भ इवेत्सुभृतो गर्भिणीभिः .
११२ ०८०७छ् दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः .. ७९
११२ ०८०८अ सनादग्ने मृणसि यातुधानान्न त्वा रक्षांसि पृतनासु जिग्युः .
११२ ०८०८छ् अनु दह सहमूरान्कयादो मा ते हेत्या मुक्षत दैव्यायाः .. ८०

११२ ०९०१अ अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो .
११२ ०९०१छ् प्र नो राये पनीयसे रत्सि वाजाय पन्थां .. ८१

११२ ०९०२अ यदि वीरो अनु ष्यादग्निमिन्धीत मर्त्यः .
११२ ०९०२छ् आजुह्वद्धव्यमानुषक्शर्म भक्षीत दैव्यं .. ८२
११२ ०९०३अ त्वेषस्ते धूम ऋण्वति दिवि सं च्छुक्र आततः .
११२ ०९०३छ् सूरो न हि द्युता त्वं कृपा पावक रोचसे .. ८३
११२ ०९०४अ त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे .
११२ ०९०४छ् त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि .. ८४
११२ ०९०५अ प्रातरग्निः पुरुप्रियो विष स्तवेतातिथिः .
११२ ०९०५छ् विश्वे यस्मिन्नमर्त्ये हव्यं मर्तास इन्धते .. ८५
११२ ०९०६अ यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो .
११२ ०९०६छ् महिषीव त्वद्रयिस्त्वद्वाजा उदीरते .. ८६
११२ ०९०७अ विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियं .
११२ ०९०७छ् अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः .. ८७
११२ ०९०८अ बृहद्वयो हि भानवेऽर्चा देवायाग्नये .
११२ ०९०८छ् यं मित्रं न प्रशस्तये मर्तासो दधिरे पुरः .. ८८
११२ ०९०९अ अगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवं .
११२ ०९०९छ् य स्म शुतर्वन्नार्क्षे बृहदनीक इध्यते .. ८९
११२ ०९१०अ जातः परेण धर्मणा यत्सवृद्भिः सहाभुवः .
११२ ०९१०छ् पिता यत्कश्यपस्याग्निः श्रद्धा माता मनुः कविः .. ९०

११२ १००१अ सोमं राजानं वरुणमग्निमन्वारभामहे .
११२ १००१छ् आदित्यं विष्णुं सूर्यं ब्रह्मानं च बृहस्पतिं .. ९१
११२ १००२अ इत एत उदारुहन्दिवः पृष्ठान्या रुहन्.
११२ १००२छ् प्र भूर्जयो यथा पथोद्यामङ्गिरसो ययुः .. ९२
११२ १००३अ राये अग्ने महे त्वा दानाय समिधीमहि .
११२ १००३छ् ईडिष्वा हि महे वृषं द्यावा होत्राय पृथिवी .. ९३
११२ १००४अ दधन्वे वा यदीमनु वोचद्ब्रह्मेति वेरु तत्.
११२ १००४छ् परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत्.. ९४
११२ १००५अ प्रत्यग्ने हरसा हरः शृणाहि विश्वतस्परि .
११२ १००५छ् यातुधानस्य रक्षसो बलं न्युब्जवीर्यं .. ९५
११२ १००६अ त्वमग्ने वसूंरिह रुद्रां आदित्यां उत .
११२ १००६छ् यजा स्वध्वरं जनं मनुजातं घृतप्रुषं .. ९६

द्वितीय प्रपाठकः . प्रथमोऽर्धः
१२१ ०१०१अ पुरु त्वा दाशिवां वोचेऽरिरग्ने तव स्विदा .
१२१ ०१०१छ् तोदस्येव शरण आ महस्य .. ९७
१२१ ०१०२अ प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत्.

१ २ १ ०१०२छ् विपां ज्योतींषि बिभ्रते न वेधसे .. ९८
१ २ १ ०१०३अ अग्ने वाजस्य गोमत ईशानः सहसो यहो .
१ २ १ ०१०३छ् अस्मे धेहि जातवेदो महि श्रवः .. ९९
१ २ १ ०१०४अ अग्ने यजिष्ठो अध्वरे देवां देवयते यज .
१ २ १ ०१०४छ् होता मन्द्रो वि राजस्यति स्रिधः .. १००
१ २ १ ०१०५अ जज्ञानः सप्त मातृभिर्मेधामाशासत श्रिये .
१ २ १ ०१०५छ् अयं ध्रुवो रयीणां चिकेतदा .. १०१
१ २ १ ०१०६अ उत स्या नो दिवा मतिरदितिरूत्यागमत्.
१ २ १ ०१०६छ् सा शन्ताता मयस्करदप स्रिधः .. १०२
१ २ १ ०१०७अ ईडिष्वा हि प्रतीव्या३ं यजस्व जातवेदसं .
१ २ १ ०१०७छ् चरिष्णुधूममगृभीतशोचिषं .. १०३
१ २ १ ०१०८अ न तस्य मायया च न रिपुरीशीत मर्त्यः .
१ २ १ ०१०८छ् यो अग्नये ददाश हव्यदातये .. १०४
१ २ १ ०१०९अ अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यं .
१ २ १ ०१०९छ् दविष्ठमस्य सत्पते कृधी सुगं .. १०५
१ २ १ ०११०अ शुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते .
१ २ १ ०११०छ् नि मायिनस्तपसा रक्षसो दह .. १०६

१ २ १ ०२०१अ प्र मंहिष्ठाय गायत ऋताग्ने बृहते शुक्रशोचिषे .
१ २ १ ०२०१छ् उपस्तुतासो अग्नये .. १०७
१ २ १ ०२०२अ प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः .
१ २ १ ०२०२छ् यस्य त्वं सख्यमाविथ .. १०८
१ २ १ ०२०३अ तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे .
१ २ १ ०२०३छ् देवत्रा हव्यमूहिषे .. १०९
१ २ १ ०२०४अ मा नो हृणीथा अतिथिं वसुरग्निः पुरुप्रशस्त एशः .
१ २ १ ०२०४छ् यः सुहोता स्वध्वरः .. ११०
१ २ १ ०२०५अ भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः .
१ २ १ ०२०५छ् भद्रा उत प्रशस्तयः .. १११
१ २ १ ०२०६अ यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यं .
१ २ १ ०२०६छ् अस्य यज्ञस्य सुक्रतुं .. ११२
१ २ १ ०२०७अ तदग्ने द्युम्नमा भर यत्सासाहा सदने कं चिदत्रिणं .
१ २ १ ०२०७छ् मन्युं जनस्य दूढ्यं .. ११३
१ २ १ ०२०८अ यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशे .
१ २ १ ०२०८छ् विश्वेदग्निः प्रति रक्षांसि सेधति .. ११४

.. इत्याग्नेय पर्वं काण्डं ..

ऐन्द्र काण्डम्

१ २ १ ०३०१अ तद्वो गाय सुते सचा पुरुहूताय सत्वने .
१ २ १ ०३०१छ् शं यद्गवे न शाकिने .. ११५
१ २ १ ०३०२अ यस्ते नूनं शतक्रतविन्द्र द्युम्नितमो मदः .
१ २ १ ०३०२छ् तेन नूनं मदे मदेः .. ११६
१ २ १ ०३०३अ गाव उप वदावटे महि यज्ञस्य रप्सुदा .
१ २ १ ०३०३छ् उभा कर्णा हिरण्यया .. ११७
१ २ १ ०३०४अ अरमश्वाय गायत शुतकक्षारं गवे .
१ २ १ ०३०४छ् अरमिन्द्रस्य धाम्ने .. ११८
१ २ १ ०३०५अ तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे .
१ २ १ ०३०५छ् स वृषा वृषभो भुवत्.. ११९
१ २ १ ०३०६अ त्वमिन्द्र बलादधि सहसो जात ओजसः .
१ २ १ ०३०६छ् त्वं सन्वृषन्वृषेदसि .. १२०
१ २ १ ०३०७अ यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत्.
१ २ १ ०३०७छ् चक्राण ओपशं दिवि .. १२१
१ २ १ ०३०८अ यदिन्द्राहं तथा त्वमीशीय वस्व एक इत्.
१ २ १ ०३०८छ् स्तोता मे गोसखा स्यात्.. १२२
१ २ १ ०३०९अ पन्यंपन्यमित्सोतार आ धावत मद्याय .
१ २ १ ०३०९छ् सोमं वीराय शूराय .. १२३
१ २ १ ०३१०अ इदं वसो सुतमन्धः पिबा सुपूर्णमुदरं .
१ २ १ ०३१०छ् अनाभयिन्नरिमा ते .. १२४

१ २ १ ०४०१अ उद्धेदभि शुतामघं वृषभं नर्यापसं .
१ २ १ ०४०१छ् अस्तारमेषि सूर्य .. १२५
१ २ १ ०४०२अ यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य .
१ २ १ ०४०२छ् सर्वं तदिन्द्र ते वशे .. १२६
१ २ १ ०४०३अ य आनयत्परावतः सुनीती तुर्वशं यदुं .
१ २ १ ०४०३छ् इन्द्रः स नो युवा सखा .. १२७
१ २ १ ०४०४अ मा न इन्द्राभ्याऽऽ३ दिशः सूरो अक्तुष्वा यमत .
१ २ १ ०४०४छ् त्वा युजा वनेम तत्.. १२८
१ २ १ ०४०५अ एन्द्र सानसिं रयिं सजित्वानं सदासहं .
१ २ १ ०४०५छ् वर्षिष्ठमूतये भर .. १२९
१ २ १ ०४०६अ इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे .
१ २ १ ०४०६छ् युजं वृत्रेषु वज्रिणं .. १३०
१ २ १ ०४०७अ अपिबत्कद्रुवः सुतमिन्द्रः सहस्रबाह्वे .

१ २ १ ०४०७छ् तत्राददिष्ट प्ऊँस्यं .. १३१
१ २ १ ०४०८अ वयमिन्द्र त्वायवोऽभि प्र नोनुमो वृषन्.
१ २ १ ०४०८छ् विद्धी त्वा३स्य नो वसो .. १३२
१ २ १ ०४०९अ आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक्.
१ २ १ ०४०९छ् येषामिन्द्रो युवा सखा .. १३३
१ २ १ ०४१०अ भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः .
१ २ १ ०४१०छ् वसु स्पार्हं तदा भर .. १३४

१ २ १ ०५०१अ इहेव शृण्व एषां कशा हस्तेषु यद्वदान्.
१ २ १ ०५०१छ् नि यामं चित्रमृञ्जते .. १३५
१ २ १ ०५०२अ इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः .
१ २ १ ०५०२छ् पुष्टावन्तो यथा पशुं .. १३६
१ २ १ ०५०३अ समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः .
१ २ १ ०५०३छ् समुद्रायेव सिन्धवः .. १३७
१ २ १ ०५०४अ देवानामिदवो महत्तदा वृणीमहे वयं .
१ २ १ ०५०४छ् वृष्णामस्मभ्यमूतये .. १३८
१ २ १ ०५०५अ सोमानां स्वरणं कृणुहि ब्रह्मणस्पते .
१ २ १ ०५०५छ् कक्षीवन्तं य औशिजः .. १३९
१ २ १ ०५०६अ बोधन्मना इदस्तु नो वृत्रहा भूर्यासुतिः .
१ २ १ ०५०६छ् शृणोतु शक्र आशिषं .. १४०
१ २ १ ०५०७अ अद्य नो देव सवितः प्रजावत्सावीः सौभगं .
१ २ १ ०५०७छ् परा दुःष्वप्न्यं सुव .. १४१
१ २ १ ०५०८अ क्वा३स्य वृषभो युवा तुविग्रीवो अनानतः .
१ २ १ ०५०८छ् ब्रह्मा कस्तं सपर्यति .. १४२
१ २ १ ०५०९अ उपह्वरे गिरीणां सङ्गमे च नदीनां .
१ २ १ ०५०९छ् धिया विप्रो अजायत .. १४३
१ २ १ ०५१०अ प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः .
१ २ १ ०५१०छ् नरं नृषाहं मंहिष्ठं .. १४४

द्वितीय प्रपाठकः . द्वितीयोऽर्धः
१ २ २ ०६०१अ अपादु शिप्रयन्धसः सुदक्षस्य प्रहोषिणः .
१ २ २ ०६०१छ् इन्द्रोरिन्द्रो यवाशिरः .. १४५
१ २ २ ०६०२अ इमा उ त्वा पुरुवसोऽभि प्र नोनवुर्गिरः .
१ २ २ ०६०२छ् गावो वत्सं न धेनवः .. १४६
१ २ २ ०६०३अ अत्राह गोरमन्वत नाम त्वष्टुरपीच्यं .
१ २ २ ०६०३छ् इत्था चन्द्रमसो गृहे .. १४७

१ २ २ ०६०४अ यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः .
१ २ २ ०६०४छ्‌ तत्र पूषाभुवत्सचा .. १४८
१ २ २ ०६०५अ गौर्धयति मरुतां श्रवस्युर्माता मघोनाम्
१ २ २ ०६०५छ्‌ युक्ता वह्नी रथानां .. १४९
१ २ २ ०६०६अ उप नो हरिभिः सुतं याहि मदानां पते .
१ २ २ ०६०६छ्‌ उप नो हरिभिः सुतं .. १५०
१ २ २ ०६०७अ इष्टा होत्रा असृक्षतेन्द्रं वृधन्तो अध्वरे .
१ २ २ ०६०७छ्‌ अच्छावभृथमोजसा .. १५१
१ २ २ ०६०८अ अहमिद्धि पितुष्परि मेधामृतस्य जग्रह .
१ २ २ ०६०८छ्‌ अहं सूर्य इवाजनि .. १५२
१ २ २ ०६०९अ रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः .
१ २ २ ०६०९छ्‌ क्षुमन्तो याभिर्मदेम .. १५३
१ २ २ ०६१०अ सोमः पूषा च चेततुर्विश्वासां सुक्षितीनां .
१ २ २ ०६१०छ्‌ देवत्रा रथ्योर्हिता .. १५४

१ २ २ ०७०१अ पान्तमा वो अन्धस इन्द्रमभि प्र गायत .
१ २ २ ०७०१छ्‌ विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनां .. १५५
१ २ २ ०७०२अ प्र व इन्द्राय मादनं हर्यश्वाय गायत .
१ २ २ ०७०२छ्‌ सखायः सोमपाव्ने .. १५६
१ २ २ ०७०३अ वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः .
१ २ २ ०७०३छ्‌ कण्वा उक्थेभिर्जरन्ते .. १५७
१ २ २ ०७०४अ इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः .
१ २ २ ०७०४छ्‌ अर्कमर्चन्तु कारवः .. १५८
१ २ २ ०७०५अ अयं त इन्द्र सोमो निपूतो अधि बर्हिषि .
१ २ २ ०७०५छ्‌ एहीमस्य द्रवा पिब .. १५९
१ २ २ ०७०६अ सुरूपकृत्नुमूतये सुदुघामिव गोदुहे .
१ २ २ ०७०६छ्‌ जुहूमसि द्यविद्यवि .. १६०
१ २ २ ०७०७अ अभि त्वा वृषभा सुते सुतं सृजामि पीतये .
१ २ २ ०७०७छ्‌ तृम्पा व्यश्नुही मदं .. १६१
१ २ २ ०७०८अ य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः .
१ २ २ ०७०८छ्‌ पिबेदस्य त्वमीशिषे .. १६२
१ २ २ ०७०९अ योगेयोगे तवस्तरं वाजेवाजे हवामहे .
१ २ २ ०७०९छ्‌ सखाय इन्द्रमूतये .. १६३
१ २ २ ०७१०अ आ त्वेता नि षीदतेन्द्रमभि प्र गायत .
१ २ २ ०७१०छ्‌ सखायः स्तोमवाहसः .. १६४

१ २ २ ०८०१अ इदं ह्यन्वोजसा सुतं राधानां पते .
१ २ २ ०८०१छ् पिबा त्वा३स्य गिर्वणः .. १६५
१ २ २ ०८०२अ महां इन्द्रः पुरश्च नो महित्वमस्तु वज्रिणे .
१ २ २ ०८०२छ् द्यौर्न प्रथिना शवः .. १६६
१ २ २ ०८०३अ आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय .
१ २ २ ०८०३छ् महाहस्ती दक्षिणेन .. १६७
१ २ २ ०८०४अ अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे .
१ २ २ ०८०४छ् सूनुं सत्यस्य सत्पतिं .. १६८
१ २ २ ०८०५अ कया नश्चित्र आ भुवदूती सदावृधः सखा .
१ २ २ ०८०५छ् कया शचिष्ठया वृता .. १६९
१ २ २ ०८०६अ त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतं .
१ २ २ ०८०६छ् आ च्यावयस्यूतये .. १७०
१ २ २ ०८०७अ सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यं .
१ २ २ ०८०७छ् सनिं मेधामयासिषं .. १७१
१ २ २ ०८०८अ ये ते पन्था अधो दिवो येभिर्व्यश्वमैरयः .
१ २ २ ०८०८छ् उत श्रोषन्तु नो भुवः .. १७२
१ २ २ ०८०९अ भद्रंभद्रं न आ भरेषमूर्जं शतक्रतो .
१ २ २ ०८०९छ् यदिन्द्र मृडयासि नः .. १७३
१ २ २ ०८१०अ अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः .
१ २ २ ०८१०छ् उत स्वराजो अश्विना .. १७४

१ २ २ ०९०१अ ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते .
१ २ २ ०९०१छ् वन्वानासः सुवीर्यं .. १७५
१ २ २ ०९०२अ न कि देवा इनीमसि न क्या योपयामसि .
१ २ २ ०९०२छ् मन्त्रश्रुत्यं चरामसि .. १७६
१ २ २ ०९०३अ दोषो आगाद्बृहद्गाय द्युमद्गामन्नाथर्वण .
१ २ २ ०९०३छ् स्तुहि देवं सवितारं .. १७७
१ २ २ ०९०४अ एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः .
१ २ २ ०९०४छ् स्तुषे वामश्विना बृहत्.. १७८
१ २ २ ०९०५अ इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः .
१ २ २ ०९०५छ् जघान नवतीर्नव .. १७९
१ २ २ ०९०६अ इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः .
१ २ २ ०९०६छ् महां अभिष्टिरोजसा .. १८०
१ २ २ ०९०७अ आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि .
१ २ २ ०९०७छ् महान्महीभिरूतिभिः .. १८१
१ २ २ ०९०८अ ओजस्तदस्य तित्विष उभे यत्समवर्तयत्.

१ २ २ ०९०८छ् इन्द्रश्चर्मेव रोदसी .. १८२
१ २ २ ०९०९अ अयमु ते समतसि कपोत इव गर्भधिं .
१ २ २ ०९०९छ् वचस्तच्चिन्न ओहसे .. १८३
१ २ २ ०९१०अ वात आ वातु बेषजं शम्भु मयोभु नो हृदे .
१ २ २ ०९१०छ् प्र न अयूंषि तारिषत्.. १८४

१ २ २ १००१अ यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा .
१ २ २ १००१छ् न किः स दभ्यते जनः .. १८५
१ २ २ १००२अ गव्यो षु णो यथा पुराश्वयोत रथया .
१ २ २ १००२छ् वरिवस्या महोनां .. १८६
१ २ २ १००३अ इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरं .
१ २ २ १००३छ् एनामृतस्य पिप्युषीः .. १८७
१ २ २ १००४अ अया धिया च गव्यया पुरुणामन्पुरुष्टुत .
१ २ २ १००४छ् यत्सोमेसोम आभुवः .. १८८
१ २ २ १००५अ पावका नः सरस्वती वाजेभिर्वाजिनीवती .
१ २ २ १००५छ् यज्ञं वष्टु धियावसुः .. १८९
१ २ २ १००६अ क इमं नाहुषीष्वा इन्द्रं सोमस्य तर्पयात्.
१ २ २ १००६छ् स नो वसून्या भरात्.. १९०
१ २ २ १००७अ आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमं .
१ २ २ १००७छ् एदं बर्हिः सदो मम .. १९१
१ २ २ १००८अ महि त्रीणामवरस्तु द्युक्षं मित्रस्यार्यम्णः .
१ २ २ १००८छ् दुराधर्षं वरुणस्य .. १९२
१ २ २ १००९अ त्वावतः पुरूवसो वयमिन्द्र प्रणेतः .
१ २ २ १००९छ् स्मसि स्थातर्हरीणां .. १९३

तृतीय प्रपाठकः . प्रथमोऽर्धः
१ ३ १ ०१०१अ उत्त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः .
१ ३ १ ०१०१छ् अव ब्रह्मद्विषो जहि .. १९४
१ ३ १ ०१०२अ गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे .
१ ३ १ ०१०२छ् इन्द्र त्वादातमिद्यशः .. १९५
१ ३ १ ०१०३अ सदा व इन्द्रश्चर्कृषदा उपो नु स सपर्यन्.
१ ३ १ ०१०३छ् न देवो वृतः शूर इन्द्रः .. १९६
१ ३ १ ०१०४अ आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः .
१ ३ १ ०१०४छ् न त्वामिन्द्राति रिच्यते .. १९७
१ ३ १ ०१०५अ इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिर्गिकणः .
१ ३ १ ०१०५छ् इन्द्रं वाणीरनूषत .. १९८

१ ३ १ ०१०६अ इन्द्र इषे ददातु न ऋभुक्षणमृभुं रयिं .
१ ३ १ ०१०६छ् वाजी ददातु वाजिनं .. १९९
१ ३ १ ०१०७अ इन्द्रो अङ्ग महद्भयमभी षदप चुच्यवत्.
१ ३ १ ०१०७छ् स हि स्थिरो विचर्षणिः .. २००
१ ३ १ ०१०८छ् इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः .
१ ३ १ ०१०८अ गावो वत्सं न धेनवः .. २०१
१ ३ १ ०१०९अ इन्द्रा नु पूषणा वयं सख्याय स्वस्तये .
१ ३ १ ०१०९छ् हुवेम वाजसातये .. २०२
१ ३ १ ०११०अ न कि इन्द्र त्वदुत्तरं न ज्यायो अस्ति वृत्रहन्.
१ ३ १ ०११०छ् न क्येवं यथा त्वं .. २०३

१ ३ १ ०२०१अ तरणिं वो जनानां त्रदं वाजस्य गोमतः .
१ ३ १ ०२०१छ् समानमु प्र शंसिषं .. २०४
१ ३ १ ०२०२अ असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत .
१ ३ १ ०२०२छ् सजोषा वृषभं पतिं .. २०५
१ ३ १ ०२०३अ सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा .
१ ३ १ ०२०३छ् मित्रास्पान्त्यद्रुहः .. २०६
१ ३ १ ०२०४अ यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतं .
१ ३ १ ०२०४छ् वसु स्पार्हं तदा भर .. २०७
१ ३ १ ०२०५अ शुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनां .
१ ३ १ ०२०५छ् आशिषे राधसे महे .. २०८
१ ३ १ ०२०६अ अरं त इन्द्र श्रवसे गमेम शूर त्वावतः .
१ ३ १ ०२०६छ् अरं शक्र परेमणि .. २०९
१ ३ १ ०२०७अ धानावन्तं करम्भिणमपूपवन्तमुक्थिनं .
१ ३ १ ०२०७छ् इन्द्र प्रातर्जुषस्व नः .. २१०
१ ३ १ ०२०८अ अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः .
१ ३ १ ०२०८छ् विश्वा यदजय स्पृधः .. २११
१ ३ १ ०२०९अ इमे त इन्द्र सोमाः सुतासो ये च सोत्वाः .
१ ३ १ ०२०९छ् तेषां मत्स्व प्रभूवसो .. २१२
१ ३ १ ०२१०अ तुभ्यं सुतासः सोमाः स्तीर्णं बर्हिर्विभावसो .
१ ३ १ ०२१०छ् स्तोतृभ्य इन्द्र मृडय .. २१३

१ ३ १ ०३०१अ आ व इन्द्र कृविं यथा वाजयन्तः शतक्रतुं .
१ ३ १ ०३०१छ् मंहिष्ठं सिञ्च इन्दुभिः .. २१४
१ ३ १ ०३०२अ अतश्चिदिन्द्र न उपा याहि शतवाजया .
१ ३ १ ०३०२छ् इषा सहस्रवाजया .. २१५

१३१०३०३अ आ बुन्दं वृत्रहा ददे जातः पृच्छद्वि मातरं .
१३१०३०३छ् क उग्राः के ह शृण्विरे .. २१६
१३१०३०४अ बृबदुक्थं हवामहे सृप्रकरस्नमूतये .
१३१०३०४छ् साधः कृण्वन्तमवसे .. २१७
१३१०३०५अ ऋजुनीती नो वरुणो मित्रो नयति विद्वान्.
१३१०३०५छ् अर्यमा देवैः सजोषाः .. २१८
१३१०३०६अ दूरादिहेव यत्सतोऽरुणप्सुरशिश्चितत्.
१३१०३०६छ् वि भानुं विश्वथातनत्.. २१९
१३१०३०७अ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं .
१३१०३०७छ् मध्वा रजांसि सुक्रतू .. २२०
१३१०३०८अ उदु त्ये सूनवो गिरः काष्ठा यज्ञेष्वत्नत .
१३१०३०८छ् वाश्रा अभिज्ञु यातवे .. २२१
१३१०३०९अ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदं .
१३१०३०९छ् समूढमस्य पांसुले .. २२२

१३१०४०१अ अतीहि मन्युषाविणं सुषुवांसमुपेरय .
१३१०४०१छ् अस्य रातौ सुतं पिब .. २२३
१३१०४०२अ कदु प्रचेतसे महे वचो देवाय शस्यते .
१३१०४०२छ् तदिध्यस्य वर्धनं .. २२४
१३१०४०३अ उक्थं च न शस्यमानं नागो रयिरा चिकेत .
१३१०४०३छ् न गायत्रं गीयमानं .. २२५
१३१०४०४अ इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः .
१३१०४०४छ् हरिवान्त्सुतानां सखा .. २२६
१३१०४०५अ आ याह्युप नः सुतं वाजेभिर्मा हृणीयथाः .
१३१०४०५छ् महां इव युवजानिः .. २२७
१३१०४०६अ कदा वसो स्तोत्रं हर्यत आ अव श्मशा रुधद्वाः .
१३१०४०६छ् दीर्घं सुतं वाताप्याय .. २२८
१३१०४०७अ ब्राह्मणादिन्द्र राधसः पिबा सोममृतूं रनु .
१३१०४०७छ् तवेदं सख्यमस्तृतं .. २२९
१३१०४०८अ वयं घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः .
१३१०४०८छ् त्वं नो जिन्व सोमपाः .. २३०
१३१०४०९अ एन्द्र पृक्षु कासु चिन्नृम्णं तनूषु धेहि नः .
१३१०४०९छ् सत्राजिदुग्र प्ऊँस्यं .. २३१
१३१०४१०अ एवा ह्यसि वीरयुरेवा शूर उत स्थिरः .
१३१०४१०छ् एवा ते राध्यं मनः .. २३२

१ ३ १ ०५०१अ अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः .
१ ३ १ ०५०१छ् ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः .. २३३
१ ३ १ ०५०२अ त्वामिद्धि हवामहे सातौ वाजस्य कार्वः .
१ ३ १ ०५०२छ् त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः .. २३४
१ ३ १ ०५०३अ अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे .
१ ३ १ ०५०३छ् यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति .. २३५
१ ३ १ ०५०४अ तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः .
१ ३ १ ०५०४छ् अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे .. २३६
१ ३ १ ०५०५अ तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये .
१ ३ १ ०५०५छ् बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणं .. २३७
१ ३ १ ०५०६अ तरणिरित्सिषासति वाजं पुरन्ध्या युजा .
१ ३ १ ०५०६छ् आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवं .. २३८
१ ३ १ ०५०७अ पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः .
१ ३ १ ०५०७छ् आपिर्नो बोधि सधमाद्ये वृधेऽऽस्मां अवन्तु ते धियः .. २३९
१ ३ १ ०५०८अ त्वं ह्येहि चेरवे विदा भगं वसुत्तये .
१ ३ १ ०५०८छ् उद्वावृषस्व मघवन्गविष्टय उदिन्द्राश्वमिष्टये .. २४०
१ ३ १ ०५०९अ न हि वश्चरमं च न वसिष्ठः परिमंस्ते .
१ ३ १ ०५०९छ् अस्माकमद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः .. २४१
१ ३ १ ०५१०अ मा चिदन्यद्वि शंसत सखायो मा रिषण्यत .
१ ३ १ ०५१०छ् इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत .. २४२

तृतीय प्रपाठकः . द्वितीयोऽर्धः
१ ३ १ ०६०१अ न किष्टं कर्मणा नशद्यश्चकार सदावृधं .
१ ३ १ ०६०१छ् इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा .. २४३
१ ३ २ ०६०२अ य ऋते चिदभिश्रिषः पुरा जतुभ्य आतृदः .
१ ३ २ ०६०२छ् सन्धाता सन्धिं मघवा पुरूवसुर्निष्कर्ता विहुतं पुनः .. २४४
१ ३ २ ०६०३अ आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये .
१ ३ २ ०६०३छ् ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये .. २४५
१ ३ २ ०६०४अ आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः .
१ ३ २ ०६०४छ् मा त्वा के चिन्नि येमुरिन्न पाशिनोऽति धन्वेव तां इहि .. २४६
१ ३ २ ०६०५अ त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यं .
१ ३ २ ०६०५छ् न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः .. २४७
१ ३ २ ०६०६अ त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः .
१ ३ २ ०६०६छ् त्वं वृत्राणि हंस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिः .. २४८
१ ३ २ ०६०७अ इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे .
१ ३ २ ०६०७छ् इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये .. २४९

१ ३ २ ०६०८अ इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम .
१ ३ २ ०६०८छ् पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत .. २५०
१ ३ २ ०६०९अ उदु त्ये मधुमत्तमा गिर स्तोमास ईरते .
१ ३ २ ०६०९छ् सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव .. २५१
१ ३ २ ०६१०अ यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणं .
१ ३ २ ०६१०छ् आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब .. २५२

१ ३ २ ०७०१अ शग्ध्यू३षु शचीपत इन्द्र विश्वाभिरूतिभिः .
१ ३ २ ०७०१छ् भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि .. २५३
१ ३ २ ०७०२अ या इन्द्र भुज आभरः स्वर्वां असुरेभ्यः .
१ ३ २ ०७०२छ् स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः .. २५४
१ ३ २ ०७०३अ प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो .
१ ३ २ ०७०३छ् वरूथ्ये३ वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत .. २५५
१ ३ २ ०७०४अ अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः .
१ ३ २ ०७०४छ् समीचीनास ऋभवः समस्वरनुद्रा गृणन्त पूर्व्य .. २५६
१ ३ २ ०७०५अ प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत .
१ ३ २ ०७०५छ् वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा .. २५७
१ ३ २ ०७०६अ बृहदिन्द्राय गायत मरुतो वृत्रहन्तमं .
१ ३ २ ०७०६छ् येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि .. २५८
१ ३ २ ०७०७अ इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा .
१ ३ २ ०७०७छ् शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि .. २५९
१ ३ २ ०७०८अ मा न इन्द्र परा वृणग्भवा नः सधमाद्ये .
१ ३ २ ०७०८छ् त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परा वृणक्.. २६०
१ ३ २ ०७०९अ वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः .
१ ३ २ ०७०९छ् पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते .. २६१
१ ३ २ ०७१०अ यदिन्द्र नाहुषीष्वा ओजो नृम्णं च कृष्टिषु .
१ ३ २ ०७१०छ् यद्वा पञ्च क्षितीनां द्युम्नमा भर सत्रा विश्वानि प्ऊँस्या .. २६२

१ ३ २ ०८०१अ सत्यमित्था वृषेदसि वृषजूतिर्नोऽविता .
१ ३ २ ०८०१छ् वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति शुतः .. २६३
१ ३ २ ०८०२अ यच्छक्रासि परावति यदर्वावति वृत्रहन्.
१ ३ २ ०८०२छ् अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावां आ विवासति .. २६४
१ ३ २ ०८०३अ अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसं .
१ ३ २ ०८०३छ् इन्द्रं नाम शुत्यं शाकिनं वचो यथा .. २६५
१ ३ २ ०८०४अ इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तये .
१ ३ २ ०८०४छ् छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः .. २६६

१ ३ २ ०८०५अ श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत .
१ ३ २ ०८०५छ् वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिमः .. २६७
१ ३ २ ०८०६अ न सीमदेव आप तदिषं दीर्घायो मर्त्यः .
१ ३ २ ०८०६छ् एतग्वा चिद्या एतशो युयोजत इन्द्रो हरी युयोजते .. २६८
१ ३ २ ०८०७अ आ नो विश्वासु हव्यमिन्द्रं समत्सु भूषत .
१ ३ २ ०८०७छ् उप ब्रह्माणि सवनानि वृत्रहन्परमज्या ऋचीषम .. २६९
१ ३ २ ०८०८अ तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमं .
१ ३ २ ०८०८छ् सत्रा विश्वस्य परमस्य राजसि न किष्ट्वा गोषु वृण्वते .. २७०
१ ३ २ ०८०९अ क्रेयथ क्रेदसि पुरुत्रा चिद्धि ते मनः .
१ ३ २ ०८०९छ् अलर्षि युध्म खजकृत्पुरन्दर प्र गायत्रा अगासिषुः .. २७१
१ ३ २ ०८१०अ वयमेनमिदा ह्योपीपेमेह वज्रिणं .
१ ३ २ ०८१०छ् तस्मा उ अद्य सवने सुतं भरा नूनं भूषत शुते .. २७२

१ ३ २ ०९०१अ यो राजा चर्षणीनां याता रथेभिरध्रिगुः .
१ ३ २ ०९०१छ् विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे .. २७३
१ ३ २ ०९०२अ यत इन्द्र भयामहे ततो नो अभयं कृधि .
१ ३ २ ०९०२छ् मघवञ्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि .. २७४
१ ३ २ ०९०३अ वास्तोष्पते ध्रुवा स्थूणां सत्रं सोम्यानां .
१ ३ २ ०९०३छ् द्रप्सः पुरां भेत्ता शश्वतीनामिन्द्रो मुनीनां सखा .. २७५
१ ३ २ ०९०४अ बण्महां असि सूर्य बडादित्य महां असि .
१ ३ २ ०९०४छ् महस्ते सतो महिमा पनिष्टम मह्ना देव महां असि .. २७६
१ ३ २ ०९०५अ अश्वी रथी सुरूप इद्गोमां यदिन्द्र ते सखा .
१ ३ २ ०९०५छ् श्वात्रभाजा वयसा सचते सदा चन्द्रैर्याति सभामुप .. २७७
१ ३ २ ०९०६अ यद्द्याव इन्द्र ते शतं शतं भूमीरुत स्युः .
१ ३ २ ०९०६छ् न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी .. २७८
१ ३ २ ०९०७अ यदिन्द्र प्रागपागुदग्न्यग्वा हूयसे नृभिः .
१ ३ २ ०९०७छ् सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे .. २७९
१ ३ २ ०९०८अ कस्तमिन्द्र त्वा वसवा मर्त्यो दधर्षति .
१ ३ २ ०९०८छ् श्रद्धा हि ते मघवन्पार्ये दिवि वाजी वाजं सिषासति .. २८०
१ ३ २ ०९०९अ इन्द्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः .
१ ३ २ ०९०९छ् हित्वा शिरो जिह्वया रारपच्चरत्त्रिंशत्पदा न्यक्रमीत्.. २८१
१ ३ २ ०९१०अ इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः .
१ ३ २ ०९१०छ् आ शं तम शं तमाभिरभिष्टिभिरा स्वापे स्वापिभिः .. २८२

१ ३ २ १००१अ इत ऊती वो अजरं प्रहेतारमप्रहितं .
१ ३ २ १००१छ् आशुं जेतारं हेतारं रथीतममतूर्तं तुग्रियावृधं .. २८३

१ ३ २ १००२अ  मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन्.
१ ३ २ १००२छ् आरात्ताद्वा सधमादं न आ गहीह वा सन्नुप शृधि .. २८४
१ ३ २ १००३अ  सुनोत सोमपान्ने सोममिन्द्राय वज्रिणे .
१ ३ २ १००३छ् पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः .. २८५
१ ३ २ १००४अ  यः सत्राहा विचर्षणिरिन्द्रं तं हूमहे वयं .
१ ३ २ १००४छ् सहस्रमन्यो तुविनृम्ण सत्पते भवा समत्सु नो वृधे .. २८६
१ ३ २ १००५अ  शचीभिर्नः शचीवसू दिवानक्तं दिशस्यतं .
१ ३ २ १००५छ् मा वां रातिरुप दसत्कदा च नास्मद्रातिः कदा च न .. २८७
१ ३ २ १००६अ  यदा कदा च मीढुषे स्तोता जरेत मर्त्यः .
१ ३ २ १००६छ् आदिद्वन्देत वरुणं विपा गिरा धर्त्तारं विव्रतानां .. २८८
१ ३ २ १००७अ  पाहि गा अन्धसो मद इन्द्राय मेध्यातिथे .
१ ३ २ १००७छ् यः सम्मिश्लो हर्योर्यो हिरण्यय इन्द्रो वज्री हिरण्ययः .. २८९
१ ३ २ १००८अ  उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः .
१ ३ २ १००८छ् सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत्.. २९०
१ ३ २ १००९अ  महे च न त्वाद्रिवः परा शुल्काय दीयसे .
१ ३ २ १००९छ्  न सहस्राय नायुताये वज्रिवो न शताय शतामघ .. २९१
१ ३ २ १०१०अ  वस्यां इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः .
१ ३ २ १०१०छ् माता च मे छदयथः समा वसो वसुत्वनाय राधसे .. २९२

चतुर्थ प्रपाठकः . प्रथमोऽर्धः
१ ४ १ ०१०१अ  इम इन्द्राय सुन्विरे सोमासो दध्याशिरः .
१ ४ १ ०१०१छ् तां आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ .. २९३
१ ४ १ ०१०२अ  इम इन्द्र मदाय ते सोमाश्चिकित्र उकिथनः .
१ ४ १ ०१०२छ् मधोः पपान उप नो गिरः शृणु रास्व स्तोत्राय गिर्वणः .. २९४
१ ४ १ ०१०३अ  आ त्वा३द्य सबर्दुघां हुवे गायत्रवेपसं .
१ ४ १ ०१०३छ् इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरङ्कृतं .. २९५
१ ४ १ ०१०४अ  न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीडवः .
१ ४ १ ०१०४छ् यच्छिक्षसि स्तुवते मावते वसु न किष्टदा मिनाति ते .. २९६
१ ४ १ ०१०५अ  क ईं वेद सुते सचा पिबन्तं कद्वयो दधे .
१ ४ १ ०१०५छ् अयं यः पुरो विभिनत्योजसा मन्दानः शिप्र्यन्धसः .. २९७
१ ४ १ ०१०६अ  यदिन्द्र शासो अव्रतं च्यावया सदसस्परि .
१ ४ १ ०१०६छ् अस्माकमंशुं मघवन्पुरुस्पृहं वसव्ये अधि बर्हय .. २९८
१ ४ १ ०१०७अ  त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः .
१ ४ १ ०१०७छ् पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रामणं वचः .. २९९
१ ४ १ ०१०८अ  कदा च न स्तरीरसि नेन्द्र सश्चसि दाशुषे .
१ ४ १ ०१०८छ् उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते .. ३००

१ ४ १ ०१०९अ युङ्क्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः .
१ ४ १ ०१०९छ् अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि .. ३०१
१ ४ १ ०११०अ त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः .
१ ४ १ ०११०छ् स इन्द्र स्तोमवाहस इह शुध्युप स्वसरमा गहि .. ३०२

१ ४ १ ०२०१अ प्रत्यु अदर्श्यायत्यूइछ् छन्ती दुहिता दिवः .
१ ४ १ ०२०१छ् अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरि .. ३०३
१ ४ १ ०२०२अ इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना .
१ ४ १ ०२०२छ् अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः .. ३०४
१ ४ १ ०२०३अ कु ष्ठः को वामश्विना तपानो देवा मर्त्यः .
१ ४ १ ०२०३छ् घ्नता वामश्मया क्षपमाणोंशुनेत्थमु आदुन्यथा .. ३०५
१ ४ १ ०२०४अ अयं वां मधुमत्तमः सुतः सोमो दिविष्टिषु .
१ ४ १ ०२०४छ् तमश्विना पिबतं तिरो अह्न्यं धत्तं रत्नानि दाशुषे .. ३०६
१ ४ १ ०२०५अ आ त्वा सोमस्य गल्दया सदा याचन्नहं ज्या .
१ ४ १ ०२०५छ् भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत्.. ३०७
१ ४ १ ०२०६अ अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति .
१ ४ १ ०२०६छ् उपो नूनं युयुजे वृष्णा हरी आ च जगाम वृत्रहा .. ३०८
१ ४ १ ०२०७अ अभी षतस्तदा भरेन्द्र ज्यायः कनीयसः .
१ ४ १ ०२०७छ् पुरूवसुर्हि मघवन्बभूविथ भरेभरे च हव्यः .. ३०९
१ ४ १ ०२०८अ यदिन्द्र यावतस्त्वमेतावदहमीशीय .
१ ४ १ ०२०८छ् स्तोतारमिद्दधिषे रदावसो न पापत्वाय रंसिषं .. ३१०
१ ४ १ ०२०९अ त्वमिन्द्र प्रतूर्तिष्वभि विश्धा असि स्पृधः .
१ ४ १ ०२०९छ् अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः .. ३११
१ ४ १ ०२१०अ प्र यो रिरिक्ष ओजसा दिवः सदोभ्यस्परि .
१ ४ १ ०२१०छ् न त्वा विव्याच रज इन्द्र पार्थिवमति विश्धं ववक्षिथ .. ३१२

१ ४ १ ०३०१अ असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच .
१ ४ १ ०३०१छ् बोधामसि त्वा हर्यश्व यज्ञैर्बोधा न स्तोममन्धसो मदेषु .. ३१३
१ ४ १ ०३०२अ योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरूहूत प्र याहि .
१ ४ १ ०३०२छ् असो यथा नोऽविता वृधश्चिद्दो वसूनि ममदश्च सोमैः .. ३१४
१ ४ १ ०३०३अ अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानां अरम्णाः .
१ ४ १ ०३०३छ् महान्तमिन्द्र पर्वतं वि यद्वः सृजद्धारा अव यद्दानवान्हन्.. ३१५
१ ४ १ ०३०४अ सुष्वाणास इन्द्र स्तुमसि त्वा सनिष्यन्तश्चित्तुविनृम्ण वाजं .
१ ४ १ ०३०४छ् आ नो भर सुवितं यस्य कोना तना त्मना सह्यामा त्वोताः .. ३१६
१ ४ १ ०३०५अ जगृह्मा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनां .
१ ४ १ ०३०५छ् विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिन्दाः .. ३१७

१ ४ १ ०३०६अ इन्द्रं नरो नेमधिता हवन्ति यत्पार्या युनजते धियस्ताः .
१ ४ १ ०३०६छ् शूरो नृषाता श्रवसश्च काम आ गोमति व्रजे भजा त्वं नः .. ३१८
१ ४ १ ०३०७अ वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः .
१ ४ १ ०३०७छ् अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्या३स्मान्निधयेव बद्धान्.. ३१९
१ ४ १ ०३०८अ नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा .
१ ४ १ ०३०८छ् हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युं .. ३२०
१ ४ १ ०३०९अ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः .
१ ४ १ ०३०९छ् स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः .. ३२१
१ ४ १ ०३१०अ अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय .
१ ४ १ ०३१०छ् विरप्शिने वज्रिणे शन्तमानि वचांस्यास्मै स्थविराय तक्षुः .. ३२२

१ ४ १ ०४०१अ अव द्रप्सो अंशुमतीमतिष्ठदीयानः कृष्णो दशभिः सहस्रैः .
१ ४ १ ०४०१छ् आवत्तमिन्द्रः शच्या धमन्तमप स्नीहितिं नृमणा अधद्राः .. ३२३
१ ४ १ ०४०२अ वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः .
१ ४ १ ०४०२छ् मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि .. ३२४
१ ४ १ ०४०३अ विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार .
१ ४ १ ०४०३छ् देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान .. ३२५
१ ४ १ ०४०४अ त्वं ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिन्द्र .
१ ४ १ ०४०४छ् गूढे द्यावापृथिवी अन्वविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः .. ३२६
१ ४ १ ०४०५अ मेडिं न त्वा वज्रिणं भृष्टिमन्तं पुरुधस्मानं वृषभं स्थिरप्स्नुं .
१ ४ १ ०४०५छ् करोष्यर्यस्तरुषीर्दुवस्युरिन्द्र द्युक्षं वृत्रहणं गृणीषे .. ३२७
१ ४ १ ०४०६अ प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वं .
१ ४ १ ०४०६अ विशः पूर्वीः प्र चर चर्षणिप्राः .. ३२८
१ ४ १ ०४०७अ शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ .
१ ४ १ ०४०७छ् शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानि .. ३२९
१ ४ १ ०४०८अ उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ .
१ ४ १ ०४०८छ् आ यो विश्वानि श्रवसा ततानोपश्रोता म ईवतो वचांसि .. ३३०
१ ४ १ ०४०९अ चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्विच्चच्छद्यात्.
१ ४ १ ०४०९छ् पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु .. ३३१

१ ४ १ ०५०१अ त्यमू षु वाजिनं देवजूतं सहोवानं तरुतारं रथानां .
१ ४ १ ०५०१छ् अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम .. ३३२
१ ४ १ ०५०२अ त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रं .
१ ४ १ ०५०२छ् हुवे नु शक्रं पुरुहूतमिन्द्रमिदं हविर्मघवा वेत्विन्द्रः .. ३३३
१ ४ १ ०५०३अ यजामह इन्द्रं वज्रदक्षिणं हरीणां रथ्य३ं विव्रतानां .
१ ४ १ ०५०३छ् प्र श्मश्रुभिर्दोधुवदूर्ध्वधा भुवद्वि सेनाभिर्भयमानो वि राधसा .. ३३४

१ ४ १ ०५०४अ सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृशभं सुवज्रं .
१ ४ १ ०५०४छ् हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः .. ३३५
१ ४ १ ०५०५अ यो नो वनुष्यन्नभिदाति मर्त उगणा वा मन्यमानस्तुरो वा .
१ ४ १ ०५०५छ् क्षिधी युधा शवसा वा तमिन्द्राभी ष्याम वृषमणस्त्वोताः .. ३३६
१ ४ १ ०५०६अ यं वृत्रेषु क्षितय स्पर्धमाना यं युक्तेषु तुरयन्तो हवन्ते .
१ ४ १ ०५०६छ् यं शूरसातौ यमपामुपज्मन्यं विप्रासो वाजयन्ते स इन्द्रः .. ३३७
१ ४ १ ०५०७अ इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतं सुवीराः .
१ ४ १ ०५०७छ् वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भीरिडया मदन्ता .. ३३८
१ ४ १ ०५०८अ इन्द्राय गिरो अनिशितसर्गा अपः प्रैरयत्सगरस्य बुध्नात्.
१ ४ १ ०५०८छ् यो अक्षेणेव चक्रियौ शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्यां .. ३३९
१ ४ १ ०५०९अ आ त्वा सखायः सख्या ववृत्युस्तिरः पुरू चिदर्णवां जगम्याः .
१ ४ १ ०५०९छ् पितुर्नपातमा दधित वेधा अस्मिन्क्षये प्रतरां दीद्यानः .. ३४०
१ ४ १ ०५१०अ को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून्.
१ ४ १ ०५१०छ् आसन्नेषामप्सुवाहो मयोभून्य एषां भृत्यामृणधत्स जीवात्.. ३४१

चतुर्थ प्रपाठकः . द्वितीयोऽर्धः
१ ४ २ ०६०१अ गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः .
१ ४ २ ०६०१छ् ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे .. ३४२
१ ४ २ ०६०२अ इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः .
१ ४ २ ०६०२छ् रथीतमं रथीनां वाजानां सत्पतिं पतिं .. ३४३
१ ४ २ ०६०३अ इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदं .
१ ४ २ ०६०३छ् शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने .. ३४४
१ ४ २ ०६०४अ यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः .
१ ४ २ ०६०४छ् राधस्तन्नो विदद्वस उभयाहस्त्या भर .. ३४५
१ ४ २ ०६०५अ शुदी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति .
१ ४ २ ०६०५छ् सुवीर्यस्य गोमतो रायस्पूर्धि महां असि .. ३४६
१ ४ २ ०६०६अ असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि .
१ ४ २ ०६०६छ् आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः .. ३४७
१ ४ २ ०६०७अ एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिं .
१ ४ २ ०६०७छ् दिवो अमुष्य शासतो दिवं यय दिवावसो .. ३४८
१ ४ २ ०६०८अ आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः .
१ ४ २ ०६०८छ् अभि त्वा समनूषत गावो वत्सं न धेनवः .. ३४९
१ ४ २ ०६०९अ एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना .
१ ४ २ ०६०९छ् शुद्धैरुक्थैर्वावृध्वांसं शुद्धैराशीर्वान्ममत्तु .. ३५०
१ ४ २ ०६१०अ यो रयिं वो रयिन्तमो यो द्युम्नैर्द्युम्नवत्तमः .
१ ४ २ ०६१०छ् सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः .. ३५१

१ ४ २ ०७०१अ प्रत्यस्मै पिपीषते विश्वानि विदुषे भर .
१ ४ २ ०७०१छ् अरङ्गमाय जग्मयेऽपश्चादध्वने नरः .. ३५२
१ ४ २ ०७०२अ आ नो वयोवयःशयं महान्तं गह्वरेष्ठां महान्तं पूर्विनेष्ठां .
१ ४ २ ०७०२छ् उग्रं वचो अपावधीः .. ३५३
१ ४ २ ०७०३अ आ त्वा रथं यथोतये सुम्नाय वर्तयामसि .
१ ४ २ ०७०३छ् तुविकूर्मिमृतीषहमिन्द्रं शविष्ठ सत्पतिं .. ३५४
१ ४ २ ०७०४अ स पूर्व्यो महोनां वेनः क्रतुभिरानजे .
१ ४ २ ०७०४छ् यस्य द्वारा मनुः पिता देवेषु धिय आनजे .. ३५५
१ ४ २ ०७०५अ यदी वहन्त्याशवो भ्राजमाना रथेष्वा .
१ ४ २ ०७०५छ् पिबन्तो मदिरं मधु तत्र श्रवांसि कृण्वते .. ३५६
१ ४ २ ०७०६अ त्यमु वो अप्रहणं गृणीषे शवसस्पतिं .
१ ४ २ ०७०६छ् इन्द्रं विश्वासाहं नरं शचिष्ठं विश्ववेदसं .. ३५७
१ ४ २ ०७०७अ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः .
१ ४ २ ०७०७छ् सुरभि नो मुखा करत्प्र न आयूंषि तारिषत्.. ३५८
१ ४ २ ०७०८अ पुरां भिन्दुर्युवा कविरमितौजा अजायत .
१ ४ २ ०७०८छ् इन्द्रो विश्वस्य कर्मणो धर्त्ता वज्री पुरुष्टुतः .. ३५९

१ ४ २ ०८०१अ प्रप्र वस्त्रिष्टुभमिषं वन्दद्वीरायेन्दवे .
१ ४ २ ०८०१छ् धिया वो मेधसातये पुरन्ध्या विवासति .. ३६०
१ ४ २ ०८०२अ कश्यपस्य स्वर्विदो यावाहुः सयुजाविति .
१ ४ २ ०८०२छ् ययोर्विश्वमपि व्रतं यज्ञं धीरा निचाय्य .. ३६१
१ ४ २ ०८०३अ अर्चत प्रार्चता नरः प्रियमेधासो अर्चत .
१ ४ २ ०८०३छ् अर्चन्तु पुत्रका उत पुरमिद्धृष्ण्वर्चत .. ३६२
१ ४ २ ०८०४अ उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिःषिधे .
१ ४ २ ०८०४छ् शक्रो यथा सुतेषु नो रारणत्सख्येषु च .. ३६३
१ ४ २ ०८०५अ विश्वानरस्य वस्पतिमनानतस्य शवसः .
१ ४ २ ०८०५छ् एवैश्च चर्षणीनामूती हुवे रथानां .. ३६४
१ ४ २ ०८०६अ स घा यस्ते दिवो नरो धिया मर्तस्य शमतः .
१ ४ २ ०८०६छ् ऊती स बृहतो दिवो द्विषो अंहो न तरति .. ३६५
१ ४ २ ०८०७अ विभोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो .
१ ४ २ ०८०७छ् अथा नो विश्वचर्षणे द्युम्नं सुदत्र मंहय .. ३६६
१ ४ २ ०८०८अ वयश्चित्ते पतत्रिणो द्विपाच्चतुष्पादर्जुनि .
१ ४ २ ०८०८छ् उषः प्रारन्नृतूंरनु दिवो अन्तेभ्यस्परि .. ३६७
१ ४ २ ०८०९अ अमी ये देवा स्थन मध्य आ रोचने दिवः .
१ ४ २ ०८०९छ् कद्व ऋतं कदमृतं का प्रत्ना व आहुतिः .. ३६८

१ ४ २ ०८१०अ ऋचं साम यजामहे याभ्यां कर्माणि कृण्वते .
१ ४ २ ०८१०छ् वि ते सदसि राजतो यज्ञं देवेषु वक्षतः .. ३६९

१ ४ २ ०९०१अ विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे .
१ ४ २ ०९०१छ् क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनं .. ३७०
१ ४ २ ०९०२अ श्रत्ते दधामि प्रथमाय मन्यवेऽहन्यद्दस्युं नर्यं विवेरपः .
१ ४ २ ०९०२छ् उभे यत्वा रोदसी धावतामनु भ्यसात्ते शुष्मात्पृथिवी चिदद्रिवः .. ३७१
१ ४ २ ०९०३अ समेत विश्वा ओजसा पतिं दिवो य एक इद्भूरतिथिर्जनानाम्
१ ४ २ ०९०३छ् स पूर्व्यो नूतनमाजिगीषं तं वर्त्तनीरनु वावृत एक इत्.. ३७२
१ ४ २ ०९०४अ इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो .
१ ४ २ ०९०४छ् न हि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति तद्धर्य नो वचः .. ३७३
१ ४ २ ०९०५अ चर्षणीधृतं मघवानमुक्थ्याऽमिन्द्रं गिरो बृहतीरभ्यनूषत .
१ ४ २ ०९०५छ् वावृधानं पुरुहूतं सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे .. ३७४
१ ४ २ ०९०६अ अच्छा व इन्द्रं मतयः स्वर्युवः सध्रीचीर्विश्वा उशतीरनूषत .
१ ४ २ ०९०६छ् परि ष्वजन्त जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये .. ३७५
१ ४ २ ०९०७अ अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवं .
१ ४ २ ०९०७छ् यस्य द्यावो न विचरन्ति मानुषं भुजे मंहिष्ठमभि विप्रमर्चत .. ३७६
१ ४ २ ०९०८अ त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभुवः साकमीरते .
१ ४ २ ०९०८छ् अत्यं न वाजं हवनस्यदं रथमेन्द्रं ववृत्यामवसे सुवृक्तिभिः .. ३७७
१ ४ २ ०९०९अ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा .
१ ४ २ ०९०९छ् द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा .. ३७८
१ ४ २ ०९१०अ उभे यदिन्द्र रोदसी आपप्राथोषा इव .
१ ४ २ ०९१०छ् महान्तं त्वा महीनां सम्राजं चर्षणीनां .
१ ४ २ ०९१०ए देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्.. ३७९
१ ४ २ ०९११अ प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना .
१ ४ २ ०९११छ् अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हुवेमहि .. ३८०

१ ४ २ १००१अ इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यं .
१ ४ २ १००१छ् विदे वृधस्य दक्षस्य महां हि षः .. ३८१
१ ४ २ १००२अ तमु अभि प्र गायत पुरुहूतं पुरुष्टुतं .
१ ४ २ १००२छ् इन्द्रं गीर्भिस्तविषमा विवासत .. ३८२
१ ४ २ १००३अ तं ते मदं गृणीमसि वृषणं पृक्षु सासहिं .
१ ४ २ १००३छ् उ लोककृत्नुमद्रिवो हरिश्रियं .. ३८३
१ ४ २ १००४अ यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये .
१ ४ २ १००४छ् यद्वा मरुत्सु मन्दसे समिन्दुभिः .. ३८४
१ ४ २ १००५अ एदु मधोर्मदिन्तरं सिञ्चाध्वर्यो अन्धसः .

१ ४ २ १००५छ् एवा हि वीरस्तवते सदावृधः .. ३८५
१ ४ २ १००६अ एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु .
१ ४ २ १००६छ् प्र राधांसि चोदयते महित्वना .. ३८६
१ ४ २ १००७अ एतो न्विन्द्रं स्तवाम सखायः स्तोम्यं नरं .
१ ४ २ १००७छ् कृष्टीर्यो विश्वा अभ्यस्त्येक इथ्.. ३८७
१ ४ २ १००८अ इन्द्राय साम गायत विप्राय बृहते बृहत्.
१ ४ २ १००८छ् ब्रह्मकृते विपश्चिते पनस्यवे .. ३८८
१ ४ २ १००९अ य एक इद्विदयते वसु मर्ताय दाशुषे .
१ ४ २ १००९छ् ईशानो अप्रतिष्कुत इन्द्रो अङ्ग .. ३८९
१ ४ २ १०१०अ सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणे .
१ ४ २ १०१०छ् स्तुष ऊ षु वो नृतमाय धृष्णवे .. ३९०

पञ्चम प्रपाठकः . प्रथमोऽर्धः
१ ५ १ ०१०१अ गृणे तदिन्द्र ते शव उपमां देवतातये .
१ ५ १ ०१०१छ् यद्धंसि वृत्रमोजसा शचीपते .. ३९१
१ ५ १ ०१०२अ यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयन्.
१ ५ १ ०१०२छ् अयं स सोम इन्द्र ते सुतः पिब .. ३९२
१ ५ १ ०१०३अ एन्द्र नो गधि प्रिय सत्राजिदगोह्य .
१ ५ १ ०१०३छ् गिरिर्न विश्वतः पृथुः पतिर्दिवः .. ३९३
१ ५ १ ०१०४अ य इन्द्र सोमपातमो मदः शविष्ठ चेतति .
१ ५ १ ०१०४छ् येना हंसि न्याꣳत्रिणं तमीमहे .. ३९४
१ ५ १ ०१०५अ तुचे तुनाय तत्सु नो द्राधीय आयुर्जीवसे .
१ ५ १ ०१०५छ् आदित्यासः समहसः कृणोतन .. ३९५
१ ५ १ ०१०६अ वेत्था हि निरृतीनां वज्रहस्त परिवृजं .
१ ५ १ ०१०६छ् अहरहः शुन्ध्युः परिपदामिव .. ३९६
१ ५ १ ०१०७अ अपामीवामप स्त्रिधमप सेधत दुर्मतिं .
१ ५ १ ०१०७छ् आदित्यासो युयोतना नो अंहसः .. ३९७
१ ५ १ ०१०८अ पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः .
१ ५ १ ०१०८छ् सोतुर्बाहुभ्यां सुयतो नार्वा .. ३९८

१ ५ १ ०२०१अ अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि .
१ ५ १ ०२०१छ् युधेदापित्वमिच्छसे .. ३९९
१ ५ १ ०२०२अ यो न इदमिदं पुरा प्र वस्य आनिनाय तमु व स्तुषे .
१ ५ १ ०२०२छ् सखाय इन्द्रमूतये .. ४००
१ ५ १ ०२०३अ आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थात समन्यवः .
१ ५ १ ०२०३छ् दृढा चिद्यमयिष्णवः .. ४०१

१५१०२०४अ आ याह्ययमिन्दवेऽश्वपते गोपत उर्वरापते .
१५१०२०४छ् सोमं सोमपते पिब .. ४०२
१५१०२०५अ त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ बुवीमहि .
१५१०२०५छ् संस्थे जनस्य गोमतः .. ४०३
१५१०२०६अ गावश्चिद्धा समन्यवः सजात्येन मरुतः सबन्धवः .
१५१०२०६छ् रिहते ककुभो मिथः .. ४०४
१५१०२०७अ त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे .
१५१०२०७छ् आ वीरं पृतनासहं .. ४०५
१५१०२०८अ अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे .
१५१०२०८छ् उदेव ग्मन्त उदभिः .. ४०६
१५१०२०९अ सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे .
१५१०२०९छ् अभि त्वामिन्द्र नोनुमः .. ४०७
१५१०२१०अ वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः .
१५१०२१०छ् वज्रिञ्चित्रं हवामहे .. ४०८

१५१०३०१अ स्वादोरित्था विषूवतो मधोः पिबन्ति गौर्यः .
१५१०३०१छ् या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभथा वस्वीरनु स्वराज्यं .. ४०९
१५१०३०२अ इत्था हि सोम इन्मदो ब्रह्म चकार वर्धनं .
१५१०३०२छ् शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यं .. ४१०
१५१०३०३अ इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः .
१५१०३०३छ् तमिन्महत्स्वाजिषूतिमर्भे हवामहे स वाजेषु प्र नोऽविषत्.. ४११
१५१०३०४अ इन्द्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन्वीर्यं .
१५१०३०४छ् यद्ध त्यं मायिनं मृगं तव त्यन्माययावधीरर्चन्ननु स्वराज्यं .. ४१२
१५१०३०५अ प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते .
१५१०३०५छ् इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यं .. ४१३
१५१०३०६अ यदुदीरत आजयो धृष्णवे धीयते धनं .
१५१०३०६छ् युङ्क्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्मां इन्द्र वसौ दधः .. ४१४
१५१०३०७अ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत .
१५१०३०७छ् अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी .. ४१५
१५१०३०८अ उपो षु शृणुही गिरो मघवन्मातथा इव .
१५१०३०८छ् कदा नः सूनृतावतः कर इदर्थयास इद्योजा न्विन्द्र ते हरी .. ४१६
१५१०३०९अ चन्द्रमा अप्स्वा३न्तरा सुपर्णो धावते दिवि .
१५१०३०९छ् न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी .. ४१७
१५१०३१०अ प्रति प्रियतमं रथं वृषणं वसुवाहनं .
१५१०३१०छ् स्तोता वामश्विनावृशि स्तोमेभिर्भूषति प्रति माध्वी मम श्रुतं हवं .. ४१८

१५१०४०१अ आ ते अग्न इधीमहि द्युमन्तं देवाजरं .
१५१०४०१छ् युद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर .. ४१९
१५१०४०२अ आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे .
१५१०४०२छ् शीरं पावकशोचिषं वि वो मदे यज्ञेषु स्तीर्णबर्हिषं विवक्षसे .. ४२०
१५१०४०३अ महे नो अद्य बोधयोषो राये दिवित्मती .
१५१०४०३छ् यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते .. ४२१
१५१०४०४अ भद्रं नो अपि वातय मनो दक्षमुत क्रतुं .
१५१०४०४छ् अथा ते सख्ये अन्धसो वि वो मदे रणा गावो न यवसे विवक्षसे .. ४२२
१५१०४०५अ क्रत्वा महां अनुष्वधं भीम आ ववृते शवः .
१५१०४०५छ् श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवां दधे हस्तयोर्वज्रमायसं .. ४२३
१५१०४०६अ स घा तं वृषणं रथमधि तिष्ठाति गोविदं .
१५१०४०६छ् यः पात्रं हारियोजनं पूर्णमिन्द्रा चिकेतति योजा न्विन्द्र ते हरी .. ४२४
१५१०४०७अ अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः .
१५१०४०७छ् अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर .. ४२५
१५१०४०८अ न तमंहो न दुरितं देवासो अष्ट मर्त्यं .
१५१०४०८छ् सजोषसो यमर्यमा मित्रो नयति वरुणो अति द्विषः .. ४२६

१५१०५०१अ परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय .. ४२७
१५१०५०२अ पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः .
१५१०५०२छ् द्विषस्तरध्या ऋणया न ईरसे .. ४२८
१५१०५०३अ पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम .. ४२९
१५१०५०४अ पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय .. ४३०
१५१०५०५अ इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय .. ४३१
१५१०५०६अ अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये .
१५१०५०६छ् वाजां अभि पवमान प्र गाहसे .. ४३२
१५१०५०७अ क ईं व्यक्ता नरः सनीडा रुद्रस्य मर्या अथ स्वश्वाः .. ४३३
१५१०५०८अ अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशं .
१५१०५०८छ् ऋध्यामा त ओहैः .. ४३४
१५१०५०९अ आविर्मर्या आ वाजं वाजिनो अग्मं देवस्य सवितुः सवं .
१५१०५०९छ् स्वर्गां अर्वन्तो जयत .. ४३५
१५१०५१०अ पवस्व सोम द्युम्नी सुधारो महां अवीनामनुपूर्व्यः .. ४३६

पञ्चम प्रपाठकः . द्वितीयोऽर्धः
१५२०६०१अ विश्वतोदावन्विश्वतो न आ भर यं त्वा शविष्ठमीमहे .. ४३७
१५२०६०२अ एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे .. ४३८
१५२०६०३अ ब्रह्माण इन्द्रं महयन्तो अर्केरवर्धयन्नहये हन्तवा उ .. ४३९

१५२०६०४अ अनवस्ते रथमश्वाय तक्षुस्त्वष्टा वज्रं पुरुहूत द्युमन्तं .. ४४०
१५२०६०५अ शं पदं मघं रयीषिणो न काममव्रतो हिनोति न स्पृशद्रयिं .. ४४१
१५२०६०६अ सदा गावः शुचयो विश्वधायसः सदा देवा अरेपसः .. ४४२
१५२०६०७अ आ याहि वनसा सह गावः सचन्त वर्त्तनिं यदूधभिः .. ४४३
१५२०६०८अ उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र .. ४४४
१५२०६०९अ अर्चन्त्यर्कं मरुतः स्वर्क्का आ स्तोभति शुतो युवा स इन्द्रः .. ४४५
१५२०६१०अ प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते .. ४४६

१५२०७०१अ अचेत्यग्निश्चिकितिर्हव्यवाड्न सुमद्रथः .. ४४७
१५२०७०२अ अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः .. ४४८
१५२०७०३अ भगो न चित्रो अग्निर्महोनां दधाति रत्नं .. ४४९
१५२०७०४अ विश्वस्य प्र स्तोभ पुरो वा सन्यदि वेह नूनं .. ४५०
१५२०७०५अ उषा अप स्वसुष्टमः सं वर्त्तयति वर्त्तनिं सुजातता .. ४५१
१५२०७०६अ इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः .. ४५२
१५२०७०७अ वि सुतयो यथा पथ इन्द्र त्वद्यन्तु रातयः .. ४५३
१५२०७०८अ अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः .. ४५४
१५२०७०९अ ऊर्जा मित्रो वरुणः पिन्वतेडाः पीवरीमिषं कृणुही न इन्द्र .. ४५५
१५२०७१०अ इन्द्रो विश्वस्य राजति .. ४५६

१५२०८०१अ त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत्सोममपिबद्विष्णुना सुतं यथावशं .
१५२०८०१छ् स ईं ममाद महि कर्म कर्त्तवे महामुरुं सैनं सश्चद्देवो देवं सत्य इन्दुः सत्यमिन्द्रं .. ४५७
१५२०८०२अ अयं सहस्रमानवो दृशः कवीनां मतिर्ज्योतिर्विधर्म .
१५२०८०२छ् ब्रध्नः समीचीरुषसः समैरयदरेपसः सोचेतसः स्वसरे मन्युमन्तश्चिता गोः .. ४५८
१५२०८०३अ एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्ता राजेव सत्पतिः .
१५२०८०३छ् हवामहे त्वा प्रयस्वन्तः सुतेष्वा पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये .. ४५९
१५२०८०४अ तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं श्रवांसि भूरिः .
१५२०८०४छ् मंहिष्ठो गीर्भिरा च यज्ञियो ववर्त्त राये नो विश्वा सुपथा कृणोतु वज्री .. ४६०
१५२०८०५अ अस्तु श्रौष्ट्पुरो अग्निं धिया दध आ नु त्यच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे .
१५२०८०५छ् यद्ध क्राणा विवस्वते नाभा सन्दाय नव्यसे .
१५२०८०५ए अध प्र नूनमुप यन्ति धीतयो देवांअच्छा न धीतयः .. ४६१
१५२०८०६अ प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत्.
१५२०८०६छ् प्र शर्धाय प्र यज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे .. ४६२
१५२०८०७अ अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति सयुग्वभिः सूरो न सयुग्वभिः .

१ ५ २ ०८०७छ् धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः .
१ ५ २ ०८०७ए विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिरृक्वभिः .. ४६३
१ ५ २ ०८०८अ अभि त्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवं रत्नधामभि प्रियं मतिम्
१ ५ २ ०८०८छ् ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः .. ४६४
१ ५ २ ०८०९अ अग्निं होतारं मन्ये दास्वन्तं वसोः सूनुं सहसो जातवेदसं विप्रं न जातवेदसं .
१ ५ २ ०८०९छ् य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा .
१ ५ २ ०८०९छ् घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः .. ४६५
१ ५ २ ०८१०अ तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतं .
१ ५ २ ०८१०छ् यो देवस्य शवसा प्रारिणा असु रिणन्नपः .
१ ५ २ ०८१०ए भुवो विश्वमभ्यदेवमोजसा विदेदूर्जं शतक्रतुर्विदेदिषं .. ४६६

.. इत्यैन्द्रं पर्व काण्डं ..

पावमान काण्डम्

१ ५ २ ०९०१अ उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे .
१ ५ २ ०९०१छ् उग्रं शर्म महि श्रवः .. ४६७
१ ५ २ ०९०२अ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया .
१ ५ २ ०९०२छ् इन्द्राय पातवे सुतः .. ४६८
१ ५ २ ०९०३अ वृषा पवस्व धारया मरुत्वते च मत्सरः .
१ ५ २ ०९०३छ् विश्वा दधान ओजसा .. ४६९
१ ५ २ ०९०४अ यस्ते मदो वरेण्यस्तेना पवस्वान्धसा .
१ ५ २ ०९०४छ् देवावीरघशंसहा .. ४७०
१ ५ २ ०९०५अ तिस्रो वाच उदीरते गावो मिमन्ति धेनवः .
१ ५ २ ०९०५छ् हरिरेति कनिक्रदत्.. ४७१
१ ५ २ ०९०६अ इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः .
१ ५ २ ०९०६छ् अर्कस्य योनिमासदं .. ४७२
१ ५ २ ०९०७अ असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः .
१ ५ २ ०९०७छ् श्येनो न योनिमासदत्.. ४७३
१ ५ २ ०९०८अ पवस्व दक्षसाधनो देवेभ्यः पीतये हरे .
१ ५ २ ०९०८छ् मरुद्भ्यो वायवे मदः .. ४७४
१ ५ २ ०९०९अ परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत्.
१ ५ २ ०९०९छ् मदेषु सर्वधा असि .. ४७५
१ ५ २ ०९१०अ परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः .
१ ५ २ ०९१०छ् स्वानैर्याति कविक्रतुः .. ४७६

१५२१००१अ प्र सोमासो मदच्युतः श्रवसे नो मघोनः .
१५२१००१छ् सुता विदथे अक्रमुः .. ४७७
१५२१००२अ प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः .
१५२१००२छ् वनानि महिषा इव .. ४७८
१५२१००३अ पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने .
१५२१००३छ् विश्वा अप द्विषो जहि .. ४७९
१५२१००४अ वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे .
१५२१००४छ् पवमान स्वर्दृशं .. ४८०
१५२१००५अ इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः .
१५२१००५छ् सृजदश्वं रथीरिव .. ४८१
१५२१००६अ असृक्षत प्र वाजिनो गव्या सोमासो अश्वया .
१५२१००६छ् शुक्रासो वीरयाशवः .. ४८२
१५२१००७अ पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः .
१५२१००७छ् वायुमा रोह धर्मणा .. ४८३
१५२१००८अ पवमानो अजीजनद्दिवश्चित्रं न तन्यतुं .
१५२१००८छ् ज्योतिर्वैश्वानरं बृहत्.. ४८४
१५२१००९अ परि स्वानास इन्दवो मदाय बर्हणा गिरा .
१५२१००९छ् मधो अर्षन्ति धारया .. ४८५
१५२१०१०अ परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः .
१५२१०१०छ् कारुं बिभ्रत्पुरुस्पृहं .. ४८६

षष्ठ प्रपाठकः . प्रथमोऽर्धः
१६१०१०१अ उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतं .
१६१०१०१छ् इन्दुं देवा अयासिषुः .. ४८७
१६१०१०२अ पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः .
१६१०१०२छ् शुम्भन्ति विप्रं धीतिभिः .. ४८८
१६१०१०३अ आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः .
१६१०१०३छ् इन्दुरिन्द्राय धीयते .. ४८९
१६१०१०४अ असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः .
१६१०१०४छ् कार्ष्मन्वाजी न्यक्रमीत्.. ४९०
१६१०१०५अ प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः .
१६१०१०५छ् घ्नन्तः कृष्णामप त्वचं .. ४९१
१६१०१०६अ अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः .
१६१०१०६छ् नुदस्वादेवयुं जनं .. ४९२
१६१०१०७अ अया पवस्व धारया यया सूर्यमरोचयः .

१६१०१०७छ् हिन्वानो मानुषीरपः .. ४९३
१६१०१०८अ स पवस्व य आविथेन्द्रं वृत्राय हन्तवे .
१६१०१०८छ् वव्रिवांसं महीरपः .. ४९४
१६१०१०९अ अया वीती परि स्रव यस्त इन्दो मदेष्वा .
१६१०१०९छ् अवाहन्नवतीर्नव .. ४९५
१६१०११०अ परि द्युक्षं सनद्रायिं भरद्वाजं नो अन्धसा .
१६१०११०छ् स्वानो अर्ष पवित्र आ .. ४९६

१६१०२०१अ अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः .
१६१०२०१छ् सं सूर्येण दिद्युते .. ४९७
१६१०२०२अ आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे .
१६१०२०२छ् पान्तमा पुरुस्पृहं .. ४९८
१६१०२०३अ अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय .
१६१०२०३छ् पुनीहीन्द्राय पातवे .. ४९९
१६१०२०४अ तरत्स मन्दी धावति धारा सुतस्यान्धसः .
१६१०२०४छ् तरत्स मन्दी धावति .. ५००
१६१०२०५अ आ पवस्व सहस्रिणं रयिं सोम सुवीर्यं .
१६१०२०५छ् अस्मे श्रवांसि धारय .. ५०१
१६१०२०६अ अनु प्रत्नास आयवः पदं नवीयो अक्रमुः .
१६१०२०६छ् रुचे जनन्त सूर्यं .. ५०२
१६१०२०७अ अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्.
१६१०२०७छ् सीदन्योनौ योनेष्वा .. ५०३
१६१०२०८अ वृषा सोम द्युमां असि वृषा देव वृषव्रतः .
१६१०२०८छ् वृषा धर्माणि दध्रिषे .. ५०४
१६१०२०९अ इषे पवस्व धारया मृज्यमानो मनीषिभिः .
१६१०२०९छ् इन्दो रुचाभि गा इहि .. ५०५
१६१०२१०अ मन्द्रया सोम धारया वृषा पवस्व देवयुः .
१६१०२१०छ् अव्यो वारेभिरस्मयुः .. ५०६
१६१०२११अ अया सोम सुकृत्यपा महान्त्सन्नभ्यवर्धथाः .
१६१०२११छ् हिन्दान इद्वृषायसे .. ५०७
१६१०२१२अ अयं विचर्षणिर्हितः पवमानः स चेतति .
१६१०२१२छ् हिन्वान आप्यं बृहत्.. ५०८
१६१०२१३अ प्र ण इन्दो महे तु न ऊर्मिं न बिभ्रदर्षसि .
१६१०२१३छ् अभि देवां अयास्यः .. ५०९
१६१०२१४अ अपघ्नन्पवते मृधोऽप सोमो अराव्णः .
१६१०२१४छ् गच्छन्निन्द्रस्य निष्कृतं .. ५१०

१६१०३०१अ पुनानः सोम धारयापो वसानो अर्षसि .
१६१०३०१छ् आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः .. ५११
१६१०३०२अ परीतो षिञ्चता सुतं सोमो य उत्तमं हविः .
१६१०३०२छ् दधन्वां यो नर्यो अप्स्वा३न्तरा सुषाव सोममद्रिभिः .. ५१२
१६१०३०३अ आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया .
१६१०३०३छ् जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे .. ५१३
१६१०३०४अ प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा .
१६१०३०४छ् अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतं .. ५१४
१६१०३०५अ सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनां .
१६१०३०५छ् अश्वयेव हरिता याति धारया मन्द्रया याति धारया .. ५१५
१६१०३०६अ तवाहं सोम रारण सख्य इन्दो दिवेदिवे .
१६१०३०६छ् पुरूणि बभ्रो नि चरन्ति मामव परिधींरति तां इहि .. ५१६
१६१०३०७अ मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि .
१६१०३०७छ् रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि .. ५१७
१६१०३०८अ अभि सोमास आयवः पवन्ते मद्यं मदं .
१६१०३०८छ् समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः .. ५१८
१६१०३०९अ पुनानः सोम जागृविरव्या वारैः परि प्रियः .
१६१०३०९छ् त्वं विप्रो अभवोऽङ्गिरस्तम मध्वा यज्ञं मिमिक्ष णः .. ५१९
१६१०३१०अ इन्द्राय पवते मदः सोमो मरुत्वते सुतः .
१६१०३१०छ् सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः .. ५२०
१६१०३११अ पवस्व वाजसातमोऽभि विश्वानि वार्या .
१६१०३११छ् त्वं समुद्रः प्रथमे विधर्मं देवेभ्यं सोम मत्सरः .. ५२१
१६१०३१२अ पवमाना असृक्षत पवित्रमति धारया .
१६१०३१२छ् मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च .. ५२२

१६१०४०१अ प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष .
१६१०४०१छ् अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति .. ५२३
१६१०४०२अ प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति .
१६१०४०२छ् महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन्.. ५२४
१६१०४०३अ तिस्रो वाच ईरयति प्र वह्निरृतस्य धीतिं ब्रह्मणो मनीषां .
१६१०४०३छ् गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः .. ५२५
१६१०४०४अ अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसं .
१६१०४०४छ् सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमन्ति होता .. ५२६
१६१०४०५अ सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः .
१६१०४०५छ् जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः .. ५२७

१६१०४०६अ अभि त्रिपृष्ठं वृषणं वयोधामाङ्गोषिणमवावशन्त वाणीः .
१६१०४०६छ् वना वसानो वरुणो न सिन्धूर्वि रत्नधा दयते वार्याणि .. ५२८
१६१०४०७अ अक्रान्त्समुद्रः प्रथमे विधर्मं जनयन्प्रजा भुवनस्य गोपाः .
१६१०४०७छ् वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः .. ५२९
१६१०४०८अ कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः .
१६१०४०८छ् नृभिर्यतः कृणुते निर्णिजं गामतो मतिं जनयत स्वधाभिः .. ५३०
१६१०४०९अ एष स्य ते मधुमां इन्द्र सोमो वृषा वृष्णः परि पवित्रे अक्षाः .
१६१०४०९छ् सहस्रदाः शतदा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात्.. ५३१
१६१०४१०अ पवस्व सोम मधुमां ऋतावापो वसानो अधि सानो अव्ये .
१६१०४१०छ् अव द्रोणानि घृतवन्ति रोह मदिन्तमो मत्सर इन्द्रपानः .. ५३२

१६१०५०१अ प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना .
१६१०५०१छ् भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते .. ५३३
१६१०५०२अ प्र ते धारा मधुमतीरसृग्रन्वारं यत्पूतो अत्येष्यव्यं .
१६१०५०२छ् पवमान पवसे धाम गोनां जनयन्त्सूर्यमपिन्वो अर्केः .. ५३४
१६१०५०३अ प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय .
१६१०५०३छ् स्वादुः पवतामति वारमव्यमा सीदतु कलशं देव इन्दुः .. ५३५
१६१०५०४अ प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिषन्नयासीत्.
१६१०५०४छ् इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः .. ५३६
१६१०५०५अ तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य धर्मं द्युक्षोरनीके .
१६१०५०५छ् आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुं .. ५३७
१६१०५०६अ साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः .
१६१०५०६छ् हरिः पर्यद्रवज्ञाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी .. ५३८
१६१०५०७अ अधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते धियः सूरे न विशः .
१६१०५०७छ् अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय मन्म .. ५३९
१६१०५०८अ इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय .
१६१०५०८छ् हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा .. ५४०
१६१०५०९अ अया पवा पवस्वैना वसूनि मांश्चत्व इन्द्रो सरसि प्र धन्व .
१६१०५०९छ् ब्रध्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात्.. ५४१
१६१०५१०अ महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान्.
१६१०५१०छ् अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः .. ५४२
१६१०५११अ असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमा मनीष .
१६१०५११छ् दश स्वसारो अधि सानो अव्ये मृजन्ति वह्निं सदनेष्वच्छ .. ५४३
१६१०५१२अ अपामिवेदूर्मयस्तर्त्तुराणाः प्र मनीषा ईरते सोममच्छ .
१६१०५१२छ् नमस्यन्तीरुप च यन्ति सं चाच विशन्त्युशतीरुशन्तं .. ५४४

षष्ठ प्रपाठकः . द्वितीयोऽर्धः
१ ६ २ ०६०१अ पुरोजिती वो अन्धसः सुताय मादयित्नवे .
१ ६ २ ०६०१छ् अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यं .. ५४५
१ ६ २ ०६०२अ अयं पूषा रयिर्भगः सोमः पुनानो अर्षति .
१ ६ २ ०६०२छ् पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे .. ५४६
१ ६ २ ०६०३अ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः .
१ ६ २ ०६०३छ् पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः .. ५४७
१ ६ २ ०६०४अ सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः .
१ ६ २ ०६०४छ् मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः .. ५४८
१ ६ २ ०६०५अ अभी नो वाजसातमं रयिमर्ष शतस्पृहं .
१ ६ २ ०६०५छ् इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहं .. ५४९
१ ६ २ ०६०६अ अभी नवन्ते अदुहः प्रियमिन्द्रस्य काम्यं .
१ ६ २ ०६०६छ् वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः .. ५५०
१ ६ २ ०६०७अ आ हर्यताय धृष्णवे धनुष्टन्वन्ति प्ऽॅस्यं .
१ ६ २ ०६०७छ् शुक्रा वि यन्त्यसुराय निर्णिजे विपामग्रे महीयुवः .. ५५१
१ ६ २ ०६०८अ परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण .
१ ६ २ ०६०८छ् यो देवान्विश्वां इत्परि मदेन सह गच्छति .. ५५२
१ ६ २ ०६०९अ प्र सुन्वानास्यान्धसो मर्तो न वष्ट तद्वचः .
१ ६ २ ०६०९छ् अप श्वानमराधसं हता मखं न भृगवः .. ५५३

१ ६ २ ०७०१अ अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते .
१ ६ २ ०७०१छ् आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः .. ५५४
१ ६ २ ०७०२अ अचोदसो नो धन्वन्त्विन्दवः प्र स्वानासो बृहद्देवेषु हरयः .
१ ६ २ ०७०२छ् वि चिदश्राना इषयो अरातयोऽर्यो नः सन्तु सनिषन्तु नो धियः .. ५५५
१ ६ २ ०७०३अ एष प्र कोशे मधुमां अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टमः .
१ ६ २ ०७०३छ् अभ्य्रीऽतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसा च धेनवः .. ५५६
१ ६ २ ०७०४अ प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति सङ्गिरं .
१ ६ २ ०७०४छ् मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा .. ५५७
१ ६ २ ०७०५अ धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः .
१ ६ २ ०७०५छ् हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुषे नदीष्वा .. ५५८
१ ६ २ ०७०६अ वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः .
१ ६ २ ०७०६छ् प्राणा सिन्धूनां कलशां अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः .. ५५९
१ ६ २ ०७०७अ त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि .
१ ६ २ ०७०७छ् चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत .. ५६०
१ ६ २ ०७०८अ इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह .
१ ६ २ ०७०८छ् मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः .. ५६१

१ ६ २ ०७०९अ असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत्.
१ ६ २ ०७०९छ् पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत्.. ५६२
१ ६ २ ०७१०अ प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः .
१ ६ २ ०७१०छ् बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे .. ५६३
१ ६ २ ०७११अ अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मध्वाभ्यञ्जते .
१ ६ २ ०७११छ् सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभ्णते .. ५६४
१ ६ २ ०७१२अ पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः .
१ ६ २ ०७१२छ् अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तः सं तदाशत .. ५६५

१ ६ २ ०८०१अ इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः .
१ ६ २ ०८०१छ् शुष्टे जातास इन्दवः स्वर्विदः .. ५६६
१ ६ २ ०८०२अ प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव .
१ ६ २ ०८०२छ् द्युमन्तं शुष्ममा भर स्वर्विदं .. ५६७
१ ६ २ ०८०३अ सखाय आ नि षीदत पुनानाय प्र गायत .
१ ६ २ ०८०३छ् शिशुं न यज्ञैः परि भूषत श्रिये .. ५६८
१ ६ २ ०८०४अ तं वः सखायो मदाय पुनानमभि गायत .
१ ६ २ ०८०४छ् शिशुं न हव्यैः स्वदयन्त गूर्तिभिः .. ५६९
१ ६ २ ०८०५अ प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिं .
१ ६ २ ०८०५छ् विश्वा परि प्रिया भुवदध द्विता .. ५७०
१ ६ २ ०८०६अ पवस्व देववीतय इन्दो धाराभिरोजसा .
१ ६ २ ०८०६छ् आ कलशं मधुमान्त्सोम नः सदः .. ५७१
१ ६ २ ०८०७अ सोमः पुनान ऊर्मिणाव्यं वारं वि धावति .
१ ६ २ ०८०७छ् अग्रे वाचः पवमानः कनिक्रदत्.. ५७२
१ ६ २ ०८०८अ प्र पुनानाय वेधसे सोमाय वच उच्यते .
१ ६ २ ०८०८छ् भृतिं न भरा मतिभिर्जुजोषते .. ५७३
१ ६ २ ०८०९अ गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव .
१ ६ २ ०८०९छ् शुचिं च वर्णमधि गोषु धार्य .. ५७४
१ ६ २ ०८१०अ अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत .
१ ६ २ ०८१०छ् गोभिष्टे वर्णमभि वासयामसि .. ५७५
१ ६ २ ०८११अ पवते हर्यतो हरिररति ह्वरांसि रंह्या .
१ ६ २ ०८११छ् अभ्यर्ष स्तोतृभ्यो वीरवद्यशः .. ५७६
१ ६ २ ०८१२अ परि कोशं मधुश्चुतं सोमः पुनानो अर्षति .
१ ६ २ ०८१२छ् अभि वाणीरृषीणां सप्ता नूषत .. ५७७

१ ६ २ ०९०१अ पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः .
१ ६ २ ०९०१छ् महि द्युक्षतमो मदः .. ५७८

१ ६ २ ०९०२अ अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुं .
१ ६ २ ०९०२छ् वि कोशं मध्यमं युव .. ५७९
१ ६ २ ०९०३अ आ सोता परि षिञ्चताश्वं न स्तोममप्तुरं रजस्तुरं .
१ ६ २ ०९०३छ् वनप्रक्षमुदप्तुतं .. ५८०
१ ६ २ ०९०४अ एतमु त्यं मदच्युतं सहस्रधारं वृषभं दिवोदुहं .
१ ६ २ ०९०४छ् विश्वा वसूनि बिभ्रतं .. ५८१
१ ६ २ ०९०५अ स सुन्वे यो वसूनां यो रायामानेता य इडानां .
१ ६ २ ०९०५छ् सोमो यः सुक्षितीनां .. ५८२
१ ६ २ ०९०६अ त्वं ह्या३ङ्ग दैव्या पवमान जनिमानि द्युमत्तमः .
१ ६ २ ०९०६छ् अमृतत्वाय घोषयन्.. ५८३
१ ६ २ ०९०७अ एष स्य धारया सुतोऽव्यो वारेभिः पवते मदिन्तमः .
१ ६ २ ०९०७छ् क्रीडन्नूर्मिरपामिव .. ५८४
१ ६ २ ०९०८अ य उस्रिया अपि या अन्तरश्मनि निर्गा अकृन्तदोजसा .
१ ६ २ ०९०८छ् अभि व्रजं तन्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज .
१ ६ २ ०९०८ए ॐ वर्मीव धृष्णवा रुज .. ५८५

.. इति स्ॐयं पावमानं पर्व काण्डं ..
.. इति पूर्वार्चिकः ..

आरण्य आर्चिकः
आरण्य काण्डम्
२ ० ० ०१०१अ इन्द्र ज्येष्ठं न आ भर ओजिष्ठं पुपुरि श्रवः .
२ ० ० ०१०१छ् यद्दिधृक्षेम वज्रहस्त रोदसी ओभे सुशिप्र पप्राः .. ५८६
२ ० ० ०१०२अ इन्द्रो राजा जगतश्चर्षणीनामधिक्षमा विश्वरूपं यदस्य .
२ ० ० ०१०२छ् ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतं चिदर्वाक्.. ५८७
२ ० ० ०१०३अ यस्येदमा रजोयुजस्तुजे जने वनं स्वः .
२ ० ० ०१०३छ् इन्द्रस्य रन्त्यं बृहत्.. ५८८
२ ० ० ०१०४अ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय .
२ ० ० ०१०४छ् अथादित्य व्रते वयं तवानागसो अदितये स्याम .. ५८९
२ ० ० ०१०५अ त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत्.
२ ० ० ०१०५छ् तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः .. ५९०
२ ० ० ०१०६अ इमं वृषणं कृणुतैकमिन्मां .. ५९१
२ ० ० ०१०७अ स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः .
२ ० ० ०१०७छ् वरिवोवित्परिस्रव .. ५९२
२ ० ० ०१०८अ एना विश्वान्यर्य आ द्युम्नानि मानुषाणां .
२ ० ० ०१०८छ् सिषासन्तो वनामहे .. ५९३

२ ० ० ०१०९अ  अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम .
२ ० ० ०१०९छ्  यो मा ददाति स इदेवमावदहमन्नमन्नमदन्तमद्मि .. ५९४

२ ० ० ०२०१अ  त्वमेतदधारयः कृष्णासु रोहिणीषु च .
२ ० ० ०२०१छ् परुष्णीषु रुशत्पयः .. ५९५
२ ० ० ०२०२अ  अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः .
२ ० ० ०२०२छ् मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः .. ५९६
२ ० ० ०२०३अ  इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा .
२ ० ० ०२०३छ् इन्द्रो वज्री हिरण्ययः .. ५९७
२ ० ० ०२०४अ  इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च .
२ ० ० ०२०४छ् उग्र उग्राभिरूतिभिः .. ५९८
२ ० ० ०२०५अ  प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत्.
२ ० ० ०२०५छ् धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठः .. ५९९
२ ० ० ०२०६अ  नियुत्वान्वायवा गह्ययं शुक्रो अयामि ते .
२ ० ० ०२०६छ् गन्तासि सुन्वतो गृहं .. ६००
२ ० ० ०२०७अ  यज्ञायथा अपूर्व्य मघवन्वृत्रहत्याय .
२ ० ० ०२०७छ् तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवं .. ६०१

२ ० ० ०३०१अ  मयि वर्चो अथो यशोऽथो यज्ञस्य यत्पयः .
२ ० ० ०३०१छ् परमेष्ठी प्रजापतिर्दिवि द्यामिव दृंहतु .. ६०२
२ ० ० ०३०२अ  सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः .
२ ० ० ०३०२छ् आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व .. ६०३
२ ० ० ०३०३अ  त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः .
२ ० ० ०३०३छ् त्वमातनोरुर्वा३न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ .. ६०४
२ ० ० ०३०४अ  अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजं .
२ ० ० ०३०४छ् होतारं रत्नधातमं .. ६०५
२ ० ० ०३०५अ  ते मन्वत प्रथमं नाम गोनां त्रिः सप्त परमं नाम जनान्.
२ ० ० ०३०५छ् ता जानतीरभ्यनूषत क्षा आविर्भुवन्नरुणीर्यशसा गावः .. ६०६
२ ० ० ०३०६अ  समन्या यन्त्युपयन्त्यन्याः समानमूर्वं नद्यस्पृणन्ति .
२ ० ० ०३०६छ् तमू शुचिं शुचयो दीदिवांसमपान्नपातमुप यन्त्यापः .. ६०७
२ ० ० ०३०७अ  आ प्रागाद्भद्रा युवतिरह्नः केतून्त्समीर्त्सति .
२ ० ० ०३०७छ् अभूद्भद्रा निवेशनी विश्वस्य जगतो रात्री .. ६०८
२ ० ० ०३०८अ  प्रक्षस्य वृष्णो अरुषस्य नू महः प्र नो वचो विदथा जातवेदसे .
२ ० ० ०३०८छ् वैश्वानराय मतिर्नव्यसे शुचिः सोम इव पवते चारुरग्नये .. ६०९
२ ० ० ०३०९अ  विश्वे देवा मम शृण्वन्तु यज्ञमुभे रोदसी अपां नपाच्च मन्म .
२ ० ० ०३०९छ्  मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम .. ६१०

२ ० ० ०३१०अ  यशो मा द्यावापृथिवी यशो मेन्द्रबृहस्पती .
२ ० ० ०३१०छ् यशो भगस्य विन्दतु यशो मा प्रतिमुच्यतां .
२ ० ० ०३१०ए  यशस्व्या३स्याः सं सदोऽहं प्रवदिता स्यां .. ६११
२ ० ० ०३११अ  इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री .
२ ० ० ०३११छ् अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानां .. ६१२
२ ० ० ०३१२अ  अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्.
२ ० ० ०३१२छ् त्रिधातुरर्को रजसो विमानोऽजस्रं ज्योतिर्हविरस्मि सर्वं .. ६१३
२ ० ० ०३१३अ  पात्यग्निर्विपो अग्रं पदं वेः पाति यह्वश्चरणं सूर्यस्य .
२ ० ० ०३१३छ् पाति नाभा सप्तशीर्षाणमग्निः .. ६१४

२ ० ० ०४०१अ  भ्राजन्त्यग्ने समिधान दीदिवो जिह्वा चरत्यन्तरासनि .
२ ० ० ०४०१छ् स त्वं नो अग्ने पयसा वसुविद्रयिं वर्चो दृशेऽदाः .. ६१५
२ ० ० ०४०२अ  वसन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः .
२ ० ० ०४०२छ् वर्षाण्यनु शरदो हेमन्तः शिशिर इन्नु रन्त्यः .. ६१६
२ ० ० ०४०३अ  सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्.
२ ० ० ०४०३छ् स भूमिं सर्वतो वृत्वात्यतिष्ठद्दशाङ्गुलं .. ६१७
२ ० ० ०४०४अ  त्रिपादूर्ध्व उदैत्पुरुषः पदोऽस्येहाभवत्पुनः .
२ ० ० ०४०४छ् तथा विष्वङ्व्यक्रामदशनानशने अभि .. ६१८
२ ० ० ०४०५अ  पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यं .
२ ० ० ०४०५छ् पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि .. ६१९
२ ० ० ०४०६अ  तावानस्य महिमा ततो ज्यायांश्च पूरुषः .
२ ० ० ०४०६छ् उतामृतत्वस्येशानो यदन्नेनातिरोहति .. ६२०
२ ० ० ०४०७अ  ततो विराडजायत विराजो अधि पूरुषः .
२ ० ० ०४०७छ् स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः .. ६२१
२ ० ० ०४०८अ  मन्ये वां द्यावापृथिवी सुभोजसौ ये अप्रथेथाममितमभि योजनं .
२ ० ० ०४०८छ् द्यावापृथिवी भवतं स्योने ते नो मुञ्चतमंहसः .. ६२२
२ ० ० ०४०९अ  हरी त इन्द्र श्मश्रूण्युतो ते हरितौ हरि .
२ ० ० ०४०९छ्  तं त्वा स्तुवन्ति कवयः पुरुषासो वनर्गवः .. ६२३
२ ० ० ०४१०अ  यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत .
२ ० ० ०४१०छ् सत्यस्य ब्रह्मणो वर्चस्तेन मा सं सृजामसि .. ६२४
२ ० ० ०४११अ  सहस्तन्न इन्द्र दद्ध्योज ईशे ह्यस्य महतो विरप्शिन्.
२ ० ० ०४११छ् क्रतुं न नृम्णं स्थविरं च वाजं वृत्रेषु शतून्त्सुहना कृधी नः .. ६२५
२ ० ० ०४१२अ  सहर्षभाः सहवत्सा उदेत विश्वा रूपाणी बिभ्रतीर्द्व्यूद्नीः .
२ ० ० ०४१२छ् उरुः पृथुरयं वो अस्तु लोक इमा आपः सुप्रपाणा इह स्त .. ६२६

२ ० ० ०५०१अ  अग्न आयूंषि पवस आसुवोर्जमिषं च नः .

२ ० ० ०५०१छ् आरे बाधस्व दुच्छुनां .. ६२७
२ ० ० ०५०२अ विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविहुतं .
२ ० ० ०५०२छ् वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति .. ६२८
२ ० ० ०५०३अ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः .
२ ० ० ०५०३छ् आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च .. ६२९
२ ० ० ०५०४अ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः .
२ ० ० ०५०४छ् पितरं च प्रयन्त्स्वः .. ६३०
२ ० ० ०५०५अ अन्तश्चरति रोचनास्य प्राणादपानती .
२ ० ० ०५०५छ् व्यख्यन्महिषो दिवं .. ६३१
२ ० ० ०५०६अ त्रिंषद्धाम वि राजति वाक्पतङ्गाय धीयते .
२ ० ० ०५०६छ् प्रति वस्तोरह द्युभिः .. ६३२
२ ० ० ०५०७अ अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः .
२ ० ० ०५०७छ् सूराय विश्वचक्षसे .. ६३३
२ ० ० ०५०८अ अदृश्रन्नस्य केतवो वि रश्मयो जनां अनु .
२ ० ० ०५०८छ् भ्राजन्तो अग्नयो यथा .. ६३४
२ ० ० ०५०९अ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य .
२ ० ० ०५०९छ् विश्वमाभासि रोचनं .. ६३५
२ ० ० ०५१०अ प्रत्यङ्देवानां विशः प्रत्यङ्ङुदेषि मानुषान्.
२ ० ० ०५१०छ् प्रत्यङ्विश्वं स्वर्दृशे .. ६३६
२ ० ० ०५११अ येना पावक चक्षसा भुरण्यन्तं जनां अनु .
२ ० ० ०५११छ् त्वं वरुण पश्यसि .. ६३७
२ ० ० ०५१२अ उद्द्यामेषि रजः पृथ्वहा मिमानो अक्तुभिः .
२ ० ० ०५१२छ् पश्यञ्जन्मानि सूर्य .. ६३८
२ ० ० ०५१३अ अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः .
२ ० ० ०५१३छ् ताभिर्याति स्वयुक्तिभिः .. ६३९
२ ० ० ०५१४अ सप्त त्वा हरितो रथे वहन्ति देव सूर्य .
२ ० ० ०५१४छ् शोचिष्केशं विचक्षण .. ६४०
.. इत्यारण्यं पर्व काण्डं ..

महानाम्न्य आर्चिकः
३ ० ० ०००१अ विदा मघवन्विदा गातुमनुशंसिषो दिशः .
३ ० ० ०००१छ् शिक्षा शचीनां पते पूर्वीणां पुरूवसो .. ६४१
३ ० ० ०००२अ आभिष्ट्वमभिष्टिभिः स्वाऽ३र्नांशुः .
३ ० ० ०००२छ् प्रचेतन प्रचेतयेन्द्र द्युम्नाय न इषे .. ६४२
३ ० ० ०००३अ एवा हि शक्रो राये वाजाय वज्रिवः .
३ ० ० ०००३छ् शविष्ठ वज्रिन्नृञ्जसे मंहिष्ठ वज्रिन्नृञ्जस .

३ ० ० ०००३ए  आ याहि पिब मत्स्व .. ६४३
३ ० ० ०००४अ  विदा राये सुवीर्यं भवो वाजानां पतिर्वशां अनु .
३ ० ० ०००४छ् मंहिष्ठ वज्रिन्नृञ्जसे यः शविष्ठः शूराणां .. ६४४
३ ० ० ०००५अ  यो मंहिष्ठो मघोनामंशुर्न्न शोचिः .
३ ० ० ०००५छ् चिकित्वो अभि नो नयेंद्रो विदे तमु स्तुहि .. ६४५
३ ० ० ०००६अ  ईशे हि शक्रस्तमूतये हवामहे जेतारमपराजितं .
३ ० ० ०००६छ् स नः स्वर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत्.. ६४६
३ ० ० ०००७अ  इन्द्रं धनस्य सातये हवामहे जेतारमपराजितं .
३ ० ० ०००७छ् स नः स्वर्षदति द्विषः स नः स्वर्षदति द्विषः .. ६४७
३ ० ० ०००८अ  पूर्वस्य यत्ते अद्रिवोंऽशुर्मदाय .
३ ० ० ०००८छ् सुम्न आ धेहि नो वसो पूर्तिः शविष्ठ शस्यते .
३ ० ० ०००८ए  वशी हि शक्रो नूनं तन्नव्यं संन्यसे .. ६४८
३ ० ० ०००९अ  प्रभो जनस्य वृत्रहन्त्समर्येषु ब्रवावहै .
३ ० ० ०००९छ्  शूरो यो गोषु गच्छति सखा सुशेवो अद्वयुः .. ६४९
अथ पञ्च पुरीषपदानि
३ ० ० ००१०अ  एवाह्योऽ३ऽ३ऽ३वा . एवा ह्यग्ने . एवाहीन्द्र .
३ ० ० ००१०छ् एवा हि पूषन्. एवा हि देवाः ॐ एवाहि देवाः .. ६५०
.. इति पञ्च पुरीषपदानि ..

.. इति महानाम्न्यार्चिकः ..

उत्तर आर्चिकः
प्रथम प्रपाठकः .  प्रथमोऽर्धः
असितः काश्यपो देवलो वा. गायत्री. पवमानः सोमः.
४ ११ ०१ ०१अ  उपास्मै गायता नरः पवमानायेन्दवे .
४ ११ ०१ ०१छ् अभि देवां इयक्षते .. ६५१
४ ११ ०१ ०२अ  अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः .
४ ११ ०१ ०२छ् देवं देवाय देवयु .. ६५२
४ ११ ०१ ०३अ  स नः पवस्व शं गवे शं जनाय शमर्वते .
४ ११ ०१ ०३छ् शं राजन्नोषधीभ्यः .. ६५३

कश्यपो मारीचः. गायत्री. पवमानः सोमः.
४ ११ ०२ ०१अ  दविद्युतत्या रुचा परिष्टोभन्त्या कृपा .
४ ११ ०२ ०१छ् सोमाः शुक्रा गवाशिरः .. ६५४
४ ११ ०२ ०२अ  हिन्वानो हेतृभिर्हित आ वाजं वाज्यक्रमीत्.
४ ११ ०२ ०२छ् सीदन्तो वनुषो यथा .. ६५५

४ ११ ०२ ०३अ ऋधक्सोम स्वस्तये संजग्मानो दिवा कवे .
४ ११ ०२ ०३छ् पवस्व सूर्यो दृशे .. ६५६

शतं वैखानसाः, गायत्री, पवमानः सोमः.
४ ११ ०३ ०१अ पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षते .
४ ११ ०३ ०१छ् अर्वन्तो न श्रवस्यवः .. ६५७
४ ११ ०३ ०२अ अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये .
४ ११ ०३ ०२छ् अवावशन्त धीतयः .. ६५८
४ ११ ०३ ०३अ अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः .
४ ११ ०३ ०३छ् अग्मन्नृतस्य योनिमा .. ६५९

भरद्वाजो बार्हस्पत्यः, गायत्री, अग्निः.
४ ११ ०४ ०१अ अग्न आ याहि वीतये गृणानो हव्यदातये .
४ ११ ०४ ०१छ् नि होता सत्सि बर्हिषि .. ६६०
४ ११ ०४ ०२अ तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि .
४ ११ ०४ ०२छ् बृहच्छोचा यविष्ठ्य .. ६६१
४ ११ ०४ ०३अ स नः पृथु श्रवाय्यमच्छा देव विवाससि .
४ ११ ०४ ०३छ् बृहदग्ने सुवीर्यं .. ६६२

विश्वामित्रो गाथिनः जमदग्निर्वा, गायत्री, मित्रावरुणौ.
४ ११ ०५ ०१अ आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतं .
४ ११ ०५ ०१छ् मध्वा रजांसि सुक्रतू .. ६६३
४ ११ ०५ ०२अ उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः .
४ ११ ०५ ०२छ् द्राघिष्ठाभिः शुचिव्रता .. ६६४
४ ११ ०५ ०३अ गृणाना जमदग्निना योनावृतस्य सीदतं .
४ ११ ०५ ०३छ् पातं सोममृतावृधा .. ६६५

इरीम्बिठिः काण्वः. गायत्री. इन्द्रः.
४ ११ ०६ ०३अ आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमं .
४ ११ ०६ ०३छ् एदं बर्हिः सदो मम .. ६६६
४ ११ ०६ ०३अ आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना .
४ ११ ०६ ०३छ् उप ब्रह्माणि नः शृणु .. ६६७
४ ११ ०६ ०३अ ब्रह्माणस्त्वा युजा वयं सोमपामिन्द्र सोमिनः .
४ ११ ०६ ०३छ् सुतावन्तो हवामहे .. ६६८

विश्वामित्रो गाथिनः. गायत्री. इन्द्राग्नी.

४ ११ ०७ ०१अ इन्द्राग्नी आ गतं सुतं गीर्भिर्नभो वरेण्यं .
४ ११ ०७ ०१छ् अस्य पातं धियेषिता .. ६६९
४ ११ ०७ ०२अ इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः .
४ ११ ०७ ०२छ् अया पातमिमं सुतं .. ६७०
४ ११ ०७ ०३अ इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे .
४ ११ ०७ ०३छ् ता सोमस्येह तृम्पतां .. ६७१

अमहीयुराङ्गिरसः. गायत्री. पवमानः सोमः.
४ ११ ०८ ०१अ उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे .
४ ११ ०८ ०१छ् उग्रं शर्म महि श्रवः .. ६७२
४ ११ ०८ ०२अ स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः .
४ ११ ०८ ०२छ् वरिवोवित्परि स्रव .. ६७३
४ ११ ०८ ०३अ एना विश्वान्यर्य आ द्युम्नानि मानुषाणां .
४ ११ ०८ ०३छ् सिषासन्तो वनामहे .. ६७४

४ ११ ०९ ०१अ पुनानः सोम धारयापो वसानो अर्षसि .
४ ११ ०९ ०१छ् आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः .. ६७५
४ ११ ०९ ०२अ दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत्.
४ ११ ०९ ०२छ् आपृच्छ्यं धरुणं वाज्यर्षसि नृभिर्धौतो विचक्षणः .. ६७६

४ ११ १० ०१अ प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष .
४ ११ १० ०१छ् अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति .. ६७७
४ ११ १० ०२अ स्वायुधः पवते देव इन्दुरशस्तिहा वृजना रक्षमाणः .
४ ११ १० ०२छ् पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः .. ६७८
४ ११ १० ०३अ ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन .
४ ११ १० ०३छ् स चिद्विवेद निहितं यदासामपीच्या३ं गुह्यं नाम गोनां .. ६७९

४ ११ ११ ०१अ अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः .
४ ११ ११ ०१छ् ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः .. ६८०
४ ११ ११ ०२अ न त्वावां अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते .
४ ११ ११ ०२छ् अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे .. ६८१

४ ११ १२ ०१अ कया नश्चित्र आ भुवदूती सदावृधः सखा .
४ ११ १२ ०१छ् कया शचिष्ठया वृता .. ६८२
४ ११ १२ ०२अ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः .
४ ११ १२ ०२छ् दृढा चिदारुजे वसु .. ६८३

४ १ १ १२ ०३अ  अभी षु णः सखीनामविता जरित्रीणां .
४ १ १ १२ ०३छ्  शतं भवास्यूतये .. ६८४

४ १ १ १३ ०१अ  तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः .
४ १ १ १३ ०१छ्  अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे .. ६८५
४ १ १ १३ ०२अ  द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसं .
४ १ १ १३ ०२छ्  क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे .. ६८६

४ १ १ १४ ०१अ  तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये .
४ १ १ १४ ०१छ्  बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणं .. ६८७
४ १ १ १४ ०२अ  न यं दुध्रा वरन्ते न स्थिरा मुरो मदेषु शिप्रमन्धसः .
४ १ १ १४ ०२छ्  य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यं .. ६८८

४ १ १ १५ ०१अ  स्वादिष्ठया मदिष्ठया पवस्व सोम धारया .
४ १ १ १५ ०१छ्  इन्द्राय पातवे सुतः .. ६८९
४ १ १ १५ ०२अ  रक्षोहा विश्वचर्षणिरभि योनिमयोहते .
४ १ १ १५ ०२छ्  द्रोणे सधस्थमासदत्.. ६९०
४ १ १ १५ ०३अ  वरिवोधातमो भुवो मंहिष्ठो वृत्रहन्तमः .
४ १ १ १५ ०३छ्  पर्षि राधो मघोनां .. ६९१

४ १ १ १६ ०१अ  पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः .
४ १ १ १६ ०१छ्  महि द्युक्षतमो मदः .. ६९२
४ १ १ १६ ०२अ  यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीत्वा स्वर्विदः .
४ १ १ १६ ०२छ्  स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः .. ६९३

४ १ १ १७ ०१अ  इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः .
४ १ १ १७ ०१छ्  शुष्टे जातास इन्दवः स्वर्विदः .. ६९४
४ १ १ १७ ०२अ  अयं भराय सानसिरिन्द्राय पवते सुतः .
४ १ १ १७ ०२छ्  सोमो जैत्रस्य चेतति यथा विदे .. ६९५
४ १ १ १७ ०३अ  अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णाति सानसिं .
४ १ १ १७ ०३छ्  वज्रं च वृषणं भरत्समप्सुजित्.. ६९६

४ १ १ १८ ०१अ  पुरोजिती वो अन्धसः सुताय मादयित्नवे .
४ १ १ १८ ०१छ्  अप श्वानं श्रथिष्टन सखायो दीर्घजिह्व्यं .. ६९७
४ १ १ १८ ०२अ  यो धारया पावकया परिप्रस्यन्दते सुतः .
४ १ १ १८ ०२छ्  इन्दुरश्वो न कृत्व्यः .. ६९८

४ १ १ १८ ०३अ तं दुरोषमभी नरः सोमं विश्वाच्या धिया .
४ १ १ १८ ०३छ् यज्ञाय सन्त्वद्रयः .. ६९९

४ १ १ १९ ०१अ अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते .
४ १ १ १९ ०१छ् आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः.. ७००
४ १ १ १९ ०२अ ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः .
४ १ १ १९ ०२छ् दधाति पुत्रः पित्रोरपीच्या३ं नाम तृतीयमधि रोचनं दिवः .. ७०१
४ १ १ १९ ०३अ अव द्युतानः कलशां अचिक्रदन्नृभिर्येमाणः कोश आ हिरण्यये .
४ १ १ १९ ०३छ् अभी ऋतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजसि .. ७०२

४ १ १ २० ०१अ यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे .
४ १ १ २० ०१छ् प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषं .. ७०३
४ १ १ २० ०२अ ऊर्जो नपातं स हिनायमस्मयुर्दाशेम हव्यदातये .
४ १ १ २० ०२छ् भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनां .. ७०४

४ १ १ २१ ०१अ एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः .
४ १ १ २१ ०१छ् एभिर्वर्धास इन्दुभिः .. ७०५
४ १ १ २१ ०२अ यत्र क्व च ते मनो दक्षं दधस उत्तरं .
४ १ १ २१ ०२छ् तत्रा योनिं कृणवसे .. ७०६
४ १ १ २१ ०३अ न हि ते पूर्तमक्षिपद्भुवन्नेमानां पते .
४ १ १ २१ ०३छ् अथा दुवो वनवसे .. ७०७

४ १ १ २२ ०१अ वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः .
४ १ १ २२ ०१छ् वज्रिञ्चित्रं हवामहे .. ७०८
४ १ १ २२ ०२अ उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत्.
४ १ १ २२ ०२छ् त्वामिध्यवितारं ववृमहे सखाय इन्द्र सानसिं .. ७०९

४ १ १ २३ ०१अ अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे .
४ १ १ २३ ०१छ् उदेव ग्मन्त उदभिः .. ७१०
४ १ १ २३ ०२अ वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि .
४ १ १ २३ ०२छ् ववृध्वांसं चिदद्रिवो दिवेदिवे .. ७११
४ १ १ २३ ०३अ पुञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे वचोयुजा .
४ १ १ २३ ०३छ् इन्द्रवाहा स्वर्विदा .. ७१२

प्रथम प्रपाठकः . द्वितीयोऽर्धः
४ १ २ ०१ ०१अ पान्तमा वो अन्धस इन्द्रमभि प्र गायत .

४ १ २ ०१ ०१छ्  विश्वासाहं शत्क्रतुं मंहिष्ठं चर्षणीनां .. ७१३
४ १ २ ०१ ०२अ  पुरुहूतं पुरुष्टुतं गाथान्या३ꣳ सनश्रुतं .
४ १ २ ०१ ०२छ्  इन्द्र इति ब्रवीतन .. ७१४
४ १ २ ०१ ०३अ  इन्द्र इन्नो महोनां दाता वाजानां नृतुः .
४ १ २ ०१ ०३छ्  महां अभिज्ञ्वा यमत्.. ७१५

४ १ २ ०२ ०१अ  प्र व इन्द्राय मादनं हर्यश्वाय गायत .
४ १ २ ०२ ०१छ्  सखायः सोमपाव्ने .. ७१६
४ १ २ ०२ ०२अ  शंसेदुक्थं सुदानव उत द्युक्षं यथ नरः .
४ १ २ ०२ ०२छ्  चकृमा सत्यराधसे .. ७१७
४ १ २ ०२ ०३अ  त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो .
४ १ २ ०२ ०३छ्  त्वं हिरण्ययुर्वसो .. ७१८

४ १ २ ०३ ०१अ  वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः .
४ १ २ ०३ ०१छ्  कण्वा उक्थेभिर्जरन्ते .. ७१९
४ १ २ ०३ ०२अ  न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ .
४ १ २ ०३ ०२छ्  तवेदु स्तोमैश्चिकेत .. ७२०
४ १ २ ०३ ०३अ  इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति .
४ १ २ ०३ ०३छ्  यन्ति प्रमादमतन्द्राः .. ७२१

४ १ २ ०४ ०१अ  इन्द्राय मद्व्ने सुतं परि ष्टोभन्तु नो गिरः .
४ १ २ ०४ ०१छ्  अर्कमर्च्चन्तु कारवः .. ७२२
४ १ २ ०४ ०२अ  यस्मिन्विश्वा अधि श्रियो रणन्ति सप्त संसदः .
४ १ २ ०४ ०२छ्  इन्द्रं सुते हवामहे .. ७२३
४ १ २ ०४ ०३अ  त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्रत .
४ १ २ ०४ ०३छ्  तमिद्वर्धन्तु नो गिरः .. ७२४

४ १ २ ०५ ०१अ  अयं त इन्द्र सोमो निपूतो अधि बर्हिषि .
४ १ २ ०५ ०१छ्  एहीमस्य द्रवा पिब .. ७२५
४ १ २ ०५ ०२अ  शाचिगो शाचिपूजनायं रणाय ते सुतः .
४ १ २ ०५ ०२छ्  आखण्डल प्र हूयसे .. ७२६
४ १ २ ०५ ०३अ  यस्ते शृङ्गवृषो णपात्प्रणपात्कुण्डपाय्यः .
४ १ २ ०५ ०३छ्  न्यस्मिं दध्र आ मनः .. ७२७

४ १ २ ०६ ०१अ  आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय .
४ १ २ ०६ ०१छ्  महाहस्ति दक्षिणेन .. ७२८

४ १ २ ०६ ०२अ विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघं .
४ १ २ ०६ ०२छ् तुविमात्रमवोभिः .. ७२९
४ १ २ ०६ ०३अ न हि त्वा शूर देवा न मर्तासो दित्सन्तं .
४ १ २ ०६ ०३छ् भीमं न गां वारयन्ते .. ७३०

४ १ २ ०७ ०१अ अभि त्वा वृषभा सुते सुतं सृजामि पीतये .
४ १ २ ०७ ०१छ् तृम्पा व्यश्नुही मदं .. ७३१
४ १ २ ०७ ०२अ मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन्.
४ १ २ ०७ ०२छ् मा कीं ब्रह्मद्विषं वनः .. ७३२
४ १ २ ०७ ०३अ इह त्वा गोपरीणसं महे मन्दन्तु राधसे .
४ १ २ ०७ ०३छ् सरो गौरो यथा पिब .. ७३३

४ १ २ ०८ ०१अ इदं वसो सुतमन्धः पिबा सुपूर्णमुदरं .
४ १ २ ०८ ०१छ् अनाभयिन्नरिमा ते .. ७३४
४ १ २ ०८ ०२अ नृभिर्धौतः सुतो अश्नैरव्या वारैः परिपूतः .
४ १ २ ०८ ०२छ् अश्वो न निक्तो नदीषु .. ७३५
४ १ २ ०८ ०३अ तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः .
४ १ २ ०८ ०३छ् इन्द्र त्वास्मिंत्सधमादे .. ७३६

४ १ २ ०९ ०१अ इदं ह्यन्वोजसा सुतं राधानां पते .
४ १ २ ०९ ०१छ् पिबा त्वा३स्य गिर्वणः .. ७३७
४ १ २ ०९ ०२अ यस्ते अनु स्वधामसत्सुते नि यच्छ तन्वं .
४ १ २ ०९ ०२छ् स त्वा ममत्तु सोम्यं .. ७३८
४ १ २ ०९ ०३अ प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः .
४ १ २ ०९ ०३छ् प्र बाहू शूर राधसा .. ७३९

४ १ २ १० ०१अ आ त्वेता नि षीदतेन्द्रमभि प्र गायत .
४ १ २ १० ०१छ् सखाय स्तोमवाहसः .. ७४०
४ १ २ १० ०२अ पुरूतमं पुरूणामीशानं वार्याणां .
४ १ २ १० ०२छ् इन्द्रं सोमे सचा सुते .. ७४१
४ १ २ १० ०३अ स घा नो योग आ भुवत्स राये स पुरन्ध्या .
४ १ २ १० ०३छ् गमद्वाजेभिरा स नः .. ७४२

४ १ २ ११ ०१अ योगेयोगे तवस्तरं वाजेवाजे हवामहे .
४ १ २ ११ ०१छ् सखाय इन्द्रमूतये .. ७४३
४ १ २ ११ ०२अ अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरं .

४ १ २ ११ ०२छ् यं ते पूर्वं पिता हुवे .. ७४४
४ १ २ ११ ०३अ आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः .
४ १ २ ११ ०३छ् वाजेभिरुप नो हवं .. ७४५

४ १ २ १२ ०१अ इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यं .
४ १ २ १२ ०१छ् विदे वृधस्य दक्षस्य महां हि षः .. ७४६
४ १ २ १२ ०२अ स प्रथमे व्योमनि देवानां सदने वृधः .
४ १ २ १२ ०२छ् सुपारः सुश्रवस्तमः समप्सुजित्.. ७४७
४ १ २ १२ ०३अ तमु हुवे वाजसातय इन्द्रं भराय शुष्मिणं .
४ १ २ १२ ०३छ् भवा नः सुम्ने अन्तमः सखा वृधे .. ७४८

४ १ २ १३ ०१अ एना वो अग्निं नमसोर्जो नपातमा हुवे .
४ १ २ १३ ०१छ् प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतं .. ७४९
४ १ २ १३ ०२अ स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः .
४ १ २ १३ ०२छ् सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानां .. ७५०

४ १ २ १४ ०१अ प्रत्यु अदर्श्यायत्यू३छ् छन्ती दुहिता दिवः .
४ १ २ १४ ०१छ् अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी .. ७५१
४ १ २ १४ ०२अ उदुस्रियाः सृजते सूर्यः सचा उद्यन्नक्षत्रमर्चिवत्.
४ १ २ १४ ०२छ् तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि .. ७५२

४ १ २ १५ ०१अ इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना .
४ १ २ १५ ०१छ् अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः .. ७५३
४ १ २ १५ ०२अ युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते .
४ १ २ १५ ०२छ् अर्वाग्रथं समनसा नि यच्छतं पिबतं सोम्यं मधु .. ७५४

४ १ २ १६ ०१अ अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः .
४ १ २ १६ ०१छ् पयः सहस्रसामृषिं .. ७५५
४ १ २ १६ ०२अ अयं सूर्य इवोपदृगयं सरांसि धावति .
४ १ २ १६ ०२छ् सप्त प्रवत आ दिवं .. ७५६
४ १ २ १६ ०३अ अयं विश्वानि तिष्ठति पुनानो भुवनोपरि .
४ १ २ १६ ०३छ् सोमो देवो न सूर्यः .. ७५७

४ १ २ १७ ०१अ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः .
४ १ २ १७ ०१छ् हरिः पवित्रे अर्षति .. ७५८
४ १ २ १७ ०२अ एष प्रत्नेन मन्मना देवो देवेभ्यस्परि .

४ १ २ १७ ०२छ् कविर्विप्रेण वावृधे .. ७५९
४ १ २ १७ ०३अ दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यसे .
४ १ २ १७ ०३छ् क्रन्दं देवां अजीजनः .. ७६०

४ १ २ १८ ०१अ उप शिक्षापतस्थुषो भियसमा धेहि शत्रवे .
४ १ २ १८ ०१छ् पवमान विदा रयिं .. ७६१
४ १ २ १८ ०२अ उषो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतं .
४ १ २ १८ ०२छ् इन्दुं देवा अयासिषुः .. ७६२
४ १ २ १८ ०३अ उपास्मै गायता नरः पवमानायेन्दवे .
४ १ २ १८ ०३छ् अभि देवां इयक्षते .. ७६३

४ १ २ १९ ०१अ प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः .
४ १ २ १९ ०१छ् वनानि महिषा इव .. ७६४
४ १ २ १९ ०२अ अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया .
४ १ २ १९ ०२छ् वाजं गोमन्तमक्षरन्.. ७६५
४ १ २ १९ ०३अ सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः .
४ १ २ १९ ०३छ् सोमा अर्षन्तु विष्णवे .. ७६६

४ १ २ २० ०१अ प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा .
४ १ २ २० ०१छ् अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतं .. ७६७
४ १ २ २० ०२अ आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर्न मर्ज्यः .
४ १ २ २० ०२छ् तमीं हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः .. ७६८

४ १ २ २१ ०१अ प्र सोमासो मदच्युतः श्रवसे नो मघोनां .
४ १ २ २१ ०१छ् सुता विदथे अक्रमुः .. ७६९
४ १ २ २१ ०२अ आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिं .
४ १ २ २१ ०२छ् अत्यो न गोभिरज्यते .. ७७०
४ १ २ २१ ०३अ आदीं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः .
४ १ २ २१ ०३छ् इन्दुमिन्द्राय पीतये .. ७७१

४ १ २ २२ ०१अ अया पवस्व देवयु रेभन्पवित्रं पर्येषि विश्वतः .
४ १ २ २२ ०१छ् मधोर्धारा असृक्षत .. ७७२
४ १ २ २२ ०२अ पवते हर्यतो हरिररति ह्वरांसि रंह्या .
४ १ २ २२ ०२छ् अभ्यर्ष स्तोतृभ्यो वीरवद्यशः .. ७७३
४ १ २ २२ ०३अ प्र सुन्वानास्यान्धसो मर्तो न वष्ट तद्वचः .
४ १ २ २२ ०३छ् अप श्वानमराधसं हता मखं न भृगवः .. ७७४

द्वितीय प्रपाठकः . प्रथमोऽर्धः
४ २ १ ०१ ०१अ पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः .
४ २ १ ०१ ०१छ् अभि विश्वानि काव्या .. ७७५
४ २ १ ०१ ०२अ त्वं समुद्रिया अपोऽग्रियो वाच ईरयन्.
४ २ १ ०१ ०२छ् पवस्व विश्वचर्षणे .. ७७६
४ २ १ ०१ ०३अ तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे .
४ २ १ ०१ ०३छ् तुभ्यं धावन्ति धेनवः .. ७७७

४ २ १ ०२ ०१अ पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने .
४ २ १ ०२ ०१छ् विश्वा अप द्विषो जहि .. ७७८
४ २ १ ०२ ०२अ यस्य ते सख्ये वयं सासह्याम पृतन्यतः .
४ २ १ ०२ ०२छ् तवेन्दो द्युम्न उत्तमे .. ७७९
४ २ १ ०२ ०३अ या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे .
४ २ १ ०२ ०३छ् रक्षा समस्य नो निदः .. ७८०

४ २ १ ०३ ०१अ वृषा सोम द्युमां असि वृषा देव वृषव्रतः .
४ २ १ ०३ ०१छ् वृषा धर्माणि दध्रिषे .. ७८१
४ २ १ ०३ ०२अ वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा सुतः .
४ २ १ ०३ ०२छ् स त्वं वृषन्वृषेदसि .. ७८२
४ २ १ ०३ ०३अ अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः .
४ २ १ ०३ ०३छ् वि नो राये दुरो वृधि .. ७८३

४ २ १ ०४ ०१अ वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे .
४ २ १ ०४ ०१छ् पवमान स्वर्दृशं .. ७८४
४ २ १ ०४ ०२अ यदद्भिः परिशिच्यसे मर्मृज्यमान आयुभिः .
४ २ १ ०४ ०२छ् द्रोणे सधस्थमश्नुषे .. ७८५
४ २ १ ०४ ०३अ आ पवस्व सुवीर्यं मन्दमानः स्वायुध .
४ २ १ ०४ ०३छ् इहो ष्विन्दवा गहि .. ७८६

४ २ १ ०५ ०१अ पवमानस्य ते वयं पवित्रमभ्युन्दतः .
४ २ १ ०५ ०१छ् सखित्वमा वृणीमहे .. ७८७
४ २ १ ०५ ०२अ ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया .
४ २ १ ०५ ०२छ् तेभिर्नः सोम मृडय .. ७८८
४ २ १ ०५ ०३अ स नः पुनान आ भर रयिं वीरवतीमिषम्
४ २ १ ०५ ०३छ् ईशानः सोम विश्वतः .. ७८९

४ २ १ ०६ ०१अ  अग्निं दूतं वृणीमहे होतारं विश्ववेदसं .
४ २ १ ०६ ०१छ् अस्य यज्ञस्य सुक्रतुं .. ७९०
४ २ १ ०६ ०२अ  अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिं .
४ २ १ ०६ ०२छ् हव्यवाहं पुरुप्रियं .. ७९१
४ २ १ ०६ ०३अ  अग्ने देवां इहा वह जज्ञानो वृक्तबर्हिषे .
४ २ १ ०६ ०३छ् असि होता न ईड्यः .. ७९२

४ २ १ ०७ ०१अ  मित्रं वयं हवामहे वरुणं सोमपीतये .
४ २ १ ०७ ०१छ् य जाता पूतदक्षसा .. ७९३
४ २ १ ०७ ०२अ  ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती .
४ २ १ ०७ ०२छ् ता मित्रावरुणा हुवे .. ७९४
४ २ १ ०७ ०३अ  वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः .
४ २ १ ०७ ०३छ् करतां नः सुराधसः .. ७९५

४ २ १ ०८ ०१अ  इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः .
४ २ १ ०८ ०१छ् इन्द्रं वाणीरनूषत .. ७९६
४ २ १ ०८ ०२अ  इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा .
४ २ १ ०८ ०२छ् इन्द्रो वज्री हिरण्ययः .. ७९७
४ २ १ ०८ ०३अ  इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च .
४ २ १ ०८ ०३छ् उग्र उग्राभिरूतिभिः .. ७९८
४ २ १ ०८ ०४अ  इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि .
४ २ १ ०८ ०४छ् वि गोभिरद्रिमैरयत् .. ७९९

४ २ १ ०९ ०१अ  इन्द्रे अग्रा नमो बृहत्सुवृक्तिमेरयामहे .
४ २ १ ०९ ०१छ् धिया धेना अवस्यवः .. ८००
४ २ १ ०९ ०२अ  ता हि शश्वन्त ईडत इत्था विप्रास ऊतये .
४ २ १ ०९ ०२छ् सबाधो वाजसातये .. ८०१
४ २ १ ०९ ०३अ  ता वां गीर्भिर्विपन्युवः प्रयस्वन्तो हवामहे .
४ २ १ ०९ ०३छ् मेधसाता सनिष्यवः .. ८०२

४ २ १ १० ०१अ  वृषा पवस्व धारया मरुत्वते च मत्सरः .
४ २ १ १० ०१छ् दिश्वा दधान ओजसा .. ८०३
४ २ १ १० ०२अ  तं त्वा धर्त्तारमोण्यो३ः पवमान स्वर्दृशं .
४ २ १ १० ०२छ् हिन्वे वाजेषु वाजिनं .. ८०४
४ २ १ १० ०३अ  अया चित्तो विपानया हरिः पवस्व धारया .

४ २ १ १० ०३छ् युजं वाजेषु चोदय .. ८०५

४ २ १ ११ ०१अ वृषा शोणो अभिकनिक्रदद्गा नदयन्नेषि पृथिवीमुत द्यां .
४ २ १ ११ ०१छ् इन्द्रस्येव वग्गुरा शृण्व आजौ प्रचोदयन्नर्षसि वाचमेमां .. ८०६
४ २ १ ११ ०२अ रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुं .
४ २ १ ११ ०२छ् पवमान सन्तनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः .. ८०७
४ २ १ ११ ०३अ एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नुं .
४ २ १ ११ ०३छ् परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः .. ८०८

४ २ १ १२ ०१अ त्वामिद्धि हवामहे सातौ वाजस्य कारवः .
४ २ १ १२ ०१छ् त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः .. ८०९
४ २ १ १२ ०२अ स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः .
४ २ १ १२ ०२छ् गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे .. ८१०

४ २ १ १३ ०१अ अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे .
४ २ १ १३ ०१छ् यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति .. ८११
४ २ १ १३ ०२अ शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे .
४ २ १ १३ ०२छ् गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः .. ८१२

४ २ १ १४ ०१अ त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः .
४ २ १ १४ ०१छ् स इन्द्र स्तोमवाहस इह शुध्युप स्वसरमा गहि .. ८१३
४ २ १ १४ ०२अ मत्स्वा सुशिप्रिन्हरिवस्तमीमहे त्वया भूषन्ति वेधसः .
४ २ १ १४ ०२छ् तव श्रवांस्युपमान्युक्थ्य सुतेष्विन्द्र गिर्वणः .. ८१४

४ २ १ १५ ०१अ यस्ते मदो वरेण्यस्तेना पवस्वान्धसा .
४ २ १ १५ ०१छ् देवावीरघशंसहा .. ८१५
४ २ १ १५ ०२अ जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे .
४ २ १ १५ ०२छ् गोषातिरश्वसा असि .. ८१६
४ २ १ १५ ०३अ सम्मिश्लो अरुषो भुवः सूपस्थाभिर्न धेनुभि .
४ २ १ १५ ०३छ् सीदं च्छ्येनो न योनिमा .. ८१७

४ २ १ १६ ०१अ अयं पूषा रयिर्भगः सोमः पुनानो अर्षति .
४ २ १ १६ ०१छ् पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे .. ८१८
४ २ १ १६ ०२अ समु प्रिया अनूषत गावो मदाय घृष्वयः .
४ २ १ १६ ०२छ् सोमासः कृण्वते पथः पवमानास इन्दवः .. ८१९
४ २ १ १६ ०३अ य ओजिष्ठस्तमा भर पवमान श्रवाय्यं .

४ २ १ १६ ०३छ् यः पञ्च चर्षणीरभि रयिं येन वनामहे .. ८२०

४ २ १ १७ ०१अ वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः .
४ २ १ १७ ०१छ् प्राणा सिन्धूनां कलशां अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः .. ८२१
४ २ १ १७ ०२अ मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशां असिष्यदत्.
४ २ १ १७ ०२छ् त्रितस्य नाम जनयन्मधु क्षरन्निन्द्रस्य वायूं सख्याय वर्धयन्.. ८२२
४ २ १ १७ ०३अ अयं पुनान उषसो अरोचयदयं सिन्धुभ्यो अभवदु लोककृत्.
४ २ १ १७ ०३छ् अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः .. ८२३

४ २ १ १८ ०१अ एवा ह्यसि वीरयुरेवा शूर उत स्थिरह्.
४ २ १ १८ ०१छ् एवा ते राध्यं मनः .. ८२४
४ २ १ १८ ०२अ एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः .
४ २ १ १८ ०२छ् अधा चिदिन्द्र नः सचा .. ८२५
४ २ १ १८ ०३अ मो षु ब्रह्मेव तदिन्द्रयुर्भुवो वाजानां पते .
४ २ १ १८ ०३छ् मत्स्वा सुतस्य गोमतः .. ८२६

४ २ १ १९ ०१अ इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः .
४ २ १ १९ ०१छ् रथीतमं रथीनां वाजानां सत्पतिं पतिं .. ८२७
४ २ १ १९ ०२अ सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते .
४ २ १ १९ ०२छ् त्वामभि प्र नोनुमो जेतारमपराजितं .. ८२८
४ २ १ १९ ०३अ पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः .
४ २ १ १९ ०३छ् यदा वाजस्य गोमत स्तोतृभ्यो मंहते मघं .. ८२९

द्वितीय प्रपाठकः . द्वितीयोऽर्धः
४ २ २ ०१ ०१अ एत असृग्रमिन्दवस्तिरः पवित्रमाशवः .
४ २ २ ०१ ०१छ् विश्वान्यभि सौभगा .. ८३०
४ २ २ ०१ ०२अ विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः .
४ २ २ ०१ ०२छ् त्मना कृण्वन्तो अर्वतः .. ८३१
४ २ २ ०१ ०३अ कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिं .
४ २ २ ०१ ०३छ् इडामस्मभ्यं संयतं .. ८३२

४ २ २ ०२ ०१अ राजा मेधाभिरीयते पवमानो मनावधि .
४ २ २ ०२ ०१छ् अन्तरिक्षेण यातवे .. ८३३
४ २ २ ०२ ०२अ आ नः सोम सहो जुवो रूपं न वर्चसे भर .
४ २ २ ०२ ०२छ् सुष्वाणो देववीतये .. ८३४
४ २ २ ०२ ०३अ आ न इन्दो शतग्विनं गवां पोषं स्वश्व्यं .

४ २ २ ०२ ०३छ्  वहा भगत्तिमूतये .. ८३५

४ २ २ ०३ ०१अ  तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः .
४ २ २ ०३ ०१छ्  चारुं सुकृत्ययेमहे .. ८३६
४ २ २ ०३ ०२अ  संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदं .
४ २ २ ०३ ०२छ्  शतं पुरो रुरुक्षणिं .. ८३७
४ २ २ ०३ ०३अ  अतस्त्वा रयिरभ्ययद्राजानं सुक्रतो दिवः .
४ २ २ ०३ ०३छ्  सुपर्णो अव्यथी भरत्.. ८३८
४ २ २ ०३ ०४अ  अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे .
४ २ २ ०३ ०४छ्  अभिष्टिकृद्विचर्षणिः .. ८३९
४ २ २ ०३ ०५अ  विश्वस्मा इत्स्वर्दृशे साधारणं रजस्तुरं .
४ २ २ ०३ ०५छ्  गोपामृतस्य विर्भरत्.. ८४०

४ २ २ ०४ ०१अ  इषे पवस्व धारया मृज्यमानो मनीषिभिः .
४ २ २ ०४ ०१छ्  इन्दो रुचाभि गा इहि .. ८४१
४ २ २ ०४ ०२अ  पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः .
४ २ २ ०४ ०२छ्  हरे सृजान आशिरं .. ८४२
४ २ २ ०४ ०३अ  पुनानो देववीतय इन्द्रस्य याहि निष्कृतं .
४ २ २ ०४ ०३छ्  द्युतानो वाजिभिर्हितः .. ८४३

४ २ २ ०५ ०१अ  अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा .
४ २ २ ०५ ०१छ्  हव्यवाड्जुह्वास्यः .. ८४४
४ २ २ ०५ ०२अ  यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति .
४ २ २ ०५ ०२छ्  तस्य स्म प्राविता भव .. ८४५
४ २ २ ०५ ०३अ  यो अग्निं देववीतये हविष्मां आविवासति .
४ २ २ ०५ ०३छ्  तस्मै पावक मृडय .. ८४६

४ २ २ ०६ ०१अ  मित्रं हुवे पूतदक्षं वरुणं च रिशादसं .
४ २ २ ०६ ०१छ्  धियं घृताचीं साधन्ता .. ८४७
४ २ २ ०६ ०२अ  ऋतेन मित्रावरुणावृतावृधावृतस्पृशा .
४ २ २ ०६ ०२छ्  क्रतुं बृहन्तमाशाथे .. ८४८
४ २ २ ०६ ०३अ  कवी नो मित्रावरुणा तुविजाता उरुक्षया .
४ २ २ ०६ ०३छ्  दक्षं दधाते अपसं .. ८४९

४ २ २ ०७ ०१अ  इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा .
४ २ २ ०७ ०१छ्  मन्दू समानवर्च्चसा .. ८५०

४ २ २ ०७ ०२अ  आदह स्वधामनु पुनर्गर्भत्वमेरिरे .
४ २ २ ०७ ०२छ्  दधाना नाम यज्ञियं .. ८५१
४ २ २ ०७ ०३अ  वीडु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः .
४ २ २ ०७ ०३छ्  अविन्द उस्रिया अनु .. ८५२

४ २ २ ०८ ०१अ  ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतं .
४ २ २ ०८ ०१छ्  इन्द्राग्नी न मर्धतः .. ८५३
४ २ २ ०८ ०२अ  उग्रा विघनिना मृध इन्द्राग्नी हवामहे .
४ २ २ ०८ ०२छ्  ता नो मृडात ईदृशे .. ८५४
४ २ २ ०८ ०३अ  हथो वृत्राण्यार्या हथो दासानि सत्पती .
४ २ २ ०८ ०३छ्  हथो विश्वा अप द्विषः .. ८५५

४ २ २ ०९ ०१अ  अभि सोमास आयवः पवन्ते मद्यं मदं .
४ २ २ ०९ ०१छ्  समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः .. ८५६
४ २ २ ०९ ०२अ  तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत्.
४ २ २ ०९ ०२छ्  अर्षा मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत्.. ८५७
४ २ २ ०९ ०३अ  नृभिर्येमाणो हर्यतो विचक्षणो राजा देवः समुद्र्यः .. ८५८

४ २ २ १० ०१अ  तिस्रो वाच ईरयति प्र वह्निरृतस्य धीतिं ब्रह्मणो मनीषां .
४ २ २ १० ०१छ्  गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः .. ८५९
४ २ २ १० ०२अ  सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः .
४ २ २ १० ०२छ्  सोमः सुत ऋच्यते पूयमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते .. ८६०
४ २ २ १० ०३अ  एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति .
४ २ २ १० ०३छ्  इन्द्रमा विश बृहता मदेन वर्धया वाचं जनया पुरन्धिं .. ८६१

४ २ २ ११ ०१अ  यद्द्याव इन्द्र ते शतंशतं भूमीरुत स्युः .
४ २ २ ११ ०१छ्  न त्वा वज्रिन्त्सहस्रं सुर्या अनु न जातमष्ट रोदसी .. ८६२
४ २ २ ११ ०२अ  आ पप्राथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा .
४ २ २ ११ ०२छ्  अस्मां अव मघवन्गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः .. ८६३

४ २ २ १२ ०१अ  वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः .
४ २ २ १२ ०१छ्  पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते .. ८६४
४ २ २ १२ ०२अ  स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः .
४ २ २ १२ ०२छ्  कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः .. ८६५
४ २ २ १२ ०३अ  कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि सहस्रिणं .
४ २ २ १२ ०३छ्  पिशङ्गरूपं मघवन्विचर्षणे मक्षू गोमन्तमीमहे .. ८६६

४ २ २ १३ ०१अ तरणिरित्सिषासति वाजं पुरन्ध्या युजा .
४ २ २ १३ ०१छ् आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवं .. ८६७
४ २ २ १३ ०२अ न दुष्टुतिर्द्रविणोदेषु शस्यते न स्रेधन्तं रयिर्नशत्.
४ २ २ १३ ०२छ् सुशक्तिरिन्मघवं तुभ्यं मावते देष्णं यत्पार्ये दिवि .. ८६८

४ २ २ १४ ०१अ तिस्रो वाच उदीरते गावो मिमन्ति धेनवः .
४ २ २ १४ ०१छ् हरिरेति कनिक्रदत्.. ८६९
४ २ २ १४ ०२अ अभि ब्रह्मीरनूषत यह्वीरृतस्य मातरः .
४ २ २ १४ ०२छ् मर्जयन्तीर्दिवः शिशुं .. ८७०
४ २ २ १४ ०३अ रायः समुद्रांश्चतुरोऽस्मभ्यं सोम विश्वतः .
४ २ २ १४ ०३छ् आ पवस्व सहस्रिणः .. ८७१

४ २ २ १५ ०१अ सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः .
४ २ २ १५ ०१छ् पवित्रवन्तो अक्षरं देवान्गच्छन्तु वो मदाः .. ८७२
४ २ २ १५ ०२अ इन्दुरिन्द्राय पवत इति देवासो अब्रुवन्.
४ २ २ १५ ०२छ् वाचस्पतिर्मखस्यते विश्वस्येशान ओजसाः .. ८७३
४ २ २ १५ ०३अ सहस्रधारः पवते समुद्रो वाचमीङ्खयः .
४ २ २ १५ ०३छ् सोमस्पती रयीणां सखेन्द्रस्य दिवेदिवे .. ८७४

४ २ २ १६ ०१अ पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः .
४ २ २ १६ ०१छ् अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तः सं तदाशत .. ८७५
४ २ २ १६ ०२अ तपोष्पवित्रं विततं दिवस्पदेऽर्चन्तो अस्य तन्तवो व्यस्थिरन्.
४ २ २ १६ ०२छ् अवन्त्यस्य पवीतारमाशवो दिवः पृष्ठमधि रोहन्ति तेजसा .. ८७६
४ २ २ १६ ०३अ अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः .
४ २ २ १६ ०३छ् मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः .. ८७७

४ २ २ १७ ०१अ प्र मंहिष्ठाय गायत ऋतान्ने बृहते शुक्रशोचिषे .
४ २ २ १७ ०१छ् उपस्तुतासो अग्नये .. ८७८
४ २ २ १७ ०२अ आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः .
४ २ २ १७ ०२छ् कुविन्नो अस्य सुमतिर्भवीयस्यच्छा वाजेभिरागमत्.. ८७९

४ २ २ १८ ०१अ तं ते मदं गृणीमसि वृषणं पृक्षु सासहिं .
४ २ २ १८ ०१छ् उ लोककृत्नुमद्रिवो हरिश्रियं .. ८८०
४ २ २ १८ ०२अ येन ज्योतींष्यायवे मनवे च विवेदिथ .
४ २ २ १८ ०२छ् मन्दानो अस्य बर्हिषो वि राजसि .. ८८१

४ २ २ १८ ०३अ तदद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा .
४ २ २ १८ ०३छ् वृषपत्नीरपो जया दिवेदिवे .. ८८२

४ २ २ १९ ०१अ शुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति .
४ २ २ १९ ०१छ् सुवीर्यस्य गोमतो रायस्पूर्धि महां असि .. ८८३
४ २ २ १९ ०२अ यस्त इन्द्र नवीयसीं गिरं मन्द्रामजीजनत्.
४ २ २ १९ ०२छ् चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीं .. ८८४
४ २ २ १९ ०३अ तमु ष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः .
४ २ २ १९ ०३छ् पुरूण्यस्य न्ऽँस्या सिषासन्तो वनामहे .. ८८५

तृतीय प्रपाठकः . प्रथमोऽर्धः
४ ३ १ ०१ ०१अ प्र त आश्विनीः पवमान धेनवो दिव्या असृग्रन्पयसा धरीमणि .
४ ३ १ ०१ ०१छ् प्रान्तरिक्षात्स्थाविरीस्ते असृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः .. ८८६
४ ३ १ ०१ ०२अ उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः .
४ ३ १ ०१ ०२छ् यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योनौ कलशेषु सीदति .. ८८७
४ ३ १ ०१ ०३अ विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोष्टे सतः परि यन्ति केतवः .
४ ३ १ ०१ ०३छ् व्यानशी पवसे सोम धर्मणा पतिर्विश्वस्य भुवनस्य राजसि .. ८८८

४ ३ १ ०२ ०१अ पवमानो अजीजनद्दिवश्चित्रं न तन्यतुं .
४ ३ १ ०२ ०१छ् ज्योतिर्वैश्वानरं बृहत्.. ८८९
४ ३ १ ०२ ०२अ पवमान रसस्तव मदो राजन्नदुच्छुनः .
४ ३ १ ०२ ०२छ् वि वारमव्यमर्षति .. ८९०
४ ३ १ ०२ ०३अ पवमानस्य ते रसो दक्षो वि राजति द्युमान्.
४ ३ १ ०२ ०३छ् ज्योतिर्विश्वं स्वर्दृशे .. ८९१

४ ३ १ ०३ ०१अ प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः .
४ ३ १ ०३ ०१छ् घ्नन्तः कृष्णामप त्वचं .. ८९२
४ ३ १ ०३ ०२अ सुवितस्य मनामहेऽति सेतुं दुराय्यं .
४ ३ १ ०३ ०२छ् साह्याम दस्युमव्रतं .. ८९३
४ ३ १ ०३ ०३अ शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः .
४ ३ १ ०३ ०३छ् चरन्ति विद्युतो दिवि .. ८९४
४ ३ १ ०३ ०४अ आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत्.
४ ३ १ ०३ ०४छ् अश्ववत्सोम वीरवत्.. ८९५
४ ३ १ ०३ ०५अ पवस्व विश्वचर्षण आ मही रोदसी पृण .
४ ३ १ ०३ ०५छ् उषाः सूर्यो न रश्मिभिः .. ८९६
४ ३ १ ०३ ०६अ परि नः शर्मयन्त्या धारया सोम विश्वतः .

४ ३ १ ०३ ०६छ् सरा रसेव विष्टपं .. ८९७

४ ३ १ ०४ ०१अ आशुरर्ष बृहन्मते परि प्रियेण धाम्ना .
४ ३ १ ०४ ०१छ् यत्र देवा इति ब्रुवन्.. ८९८
४ ३ १ ०४ ०२अ परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः .
४ ३ १ ०४ ०२छ् वृष्टिं दिवः परि स्रव .. ८९९
४ ३ १ ०४ ०३अ अयं स यो दिवस्परि रघुयामा पवित्र आ .
४ ३ १ ०४ ०३छ् सिन्धोरूर्मा व्यक्षरत्.. ९००
४ ३ १ ०४ ०४अ सुत एति पवित्र आ त्विषिं दधान ओजसा .
४ ३ १ ०४ ०४छ् विचक्षाणो विरोचयन्.. ९०१
४ ३ १ ०४ ०५अ आविवासन्परावतो अथो अर्वावतः सुतः .
४ ३ १ ०४ ०५छ् इन्द्राय सिच्यते मधु .. ९०२
४ ३ १ ०४ ००अ समीचीना अनूषत हरिं हिन्वन्त्यद्रिभिः .
४ ३ १ ०४ ००छ् इन्दुमिन्द्राय पीतये .. ९०३

४ ३ १ ०५ ०१अ हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिं .
४ ३ १ ०५ ०१छ् महामिन्दुं महीयुवः .. ९०४
४ ३ १ ०५ ०२अ पवमान रुचारुचा देवो देवेभ्यः सुतः .
४ ३ १ ०५ ०२छ् विश्वा वसून्या विश .. ९०५
४ ३ १ ०५ ०३अ आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः .
४ ३ १ ०५ ०३छ् इषे पवस्व संयतं .. ९०६

४ ३ १ ०६ ०१अ जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे .
४ ३ १ ०६ ०१छ् घृतप्रतीको बृहता दिविस्पृषा द्युमद्वि भाति भरतेभ्यः शुचिः .. ९०७
४ ३ १ ०६ ०२अ त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने .
४ ३ १ ०६ ०२छ् स जायसे मथ्यमानः सहो महत्वामाहुः सहसस्पुत्रमङ्गिरः .. ९०८
४ ३ १ ०६ ०३अ यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते .
४ ३ १ ०६ ०३छ् इन्द्रेण देवैः सरथं स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः .. ९०९

४ ३ १ ०७ ०१अ अयं वां मित्रावरुणा सुतः सोम ऋतावृधा .
४ ३ १ ०७ ०१छ् ममेदिह श्रुतं हवं .. ९१०
४ ३ १ ०७ ०२अ राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे .
४ ३ १ ०७ ०२छ् सहस्रस्थूण आशाते .. ९११
४ ३ १ ०७ ०३अ ता सम्राजा घृतासुती आदित्या दानुनस्पती .
४ ३ १ ०७ ०३छ् सचेते अनवह्वरं .. ९१२

४ ३ १ ०८ ०१अ इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः .
४ ३ १ ०८ ०१छ् जघान नवतीर्नव .. ९१३
४ ३ १ ०८ ०२अ इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितं .
४ ३ १ ०८ ०२छ् तद्विदच्छर्यणावति .. ९१४
४ ३ १ ०८ ०३अ अत्राह गोरमन्वत नाम त्वष्टुरपीच्यं .
४ ३ १ ०८ ०३छ् इत्था चन्द्रमसो गृहे .. ९१५

४ ३ १ ०९ ०१अ इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः .
४ ३ १ ०९ ०१छ् अभ्राद्वृष्टिरिवाजनि .. ९१६
४ ३ १ ०९ ०२अ शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः .
४ ३ १ ०९ ०२छ् ईशाना पिप्यतं धियः .. ९१७
४ ३ १ ०९ ०३अ मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये .
४ ३ १ ०९ ०३छ् मा नो रीरधतं निदे .. ९१८

४ ३ १ १० ०१अ पवस्व दक्षसाधनो देवेभ्यः पीतये हरे .
४ ३ १ १० ०१छ् मरुद्भ्यो वायवे मदः .. ९१९
४ ३ १ १० ०२अ सं देवैः शोभते वृषा कविर्योनावधि प्रियः .
४ ३ १ १० ०२छ् पवमानो अदाभ्यः .. ९२०
४ ३ १ १० ०३अ पवमान धिया हितो३ऽभि योनिं कनिक्रदत्.
४ ३ १ १० ०३छ् धर्मणा वायुमारुहः .. ९२१

४ ३ १ ११ ०१अ तवाहं सोम रारण सख्य इन्दो दिवेदिवे .
४ ३ १ ११ ०१छ् पुरूणि बभ्रो नि चरन्ति मामव परिधीं रति तांइहि .. ९२२
४ ३ १ ११ ०२अ तवाहं नक्तमुत सोम ते दिवा दुहानो बभ्र ऊधनि .
४ ३ १ ११ ०२छ् घृणा तपन्तमति सूर्यं परः शकुना इव पप्तिम .. ९२३

४ ३ १ १२ ०१अ पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः .
४ ३ १ १२ ०१छ् शुम्भन्ति विप्रं धीतिभिः .. ९२४
४ ३ १ १२ ०२अ आ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतं .
४ ३ १ १२ ०२छ् धुवे सदसि सीदतु .. ९२५
४ ३ १ १२ ०३अ नू नो रयिं महामिन्दोऽस्मभ्यं सोम विश्वतः .
४ ३ १ १२ ०३छ् आ पवस्व सहस्रिणं .. ९२६

४ ३ १ १३ ०१अ पिबा सोममिन्द्र मदन्तु त्वा यं ते सुषाव हर्यश्वाद्रिः .
४ ३ १ १३ ०१छ् सोतुर्बाहुभ्यां सुयतो नार्वा .. ९२७
४ ३ १ १३ ०२अ यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि .

४ ३ १ १३ ०२छ् स त्वामिन्द्र प्रभूवसो ममत्तु .. ९२८
४ ३ १ १३ ०३अ बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिं .
४ ३ १ १३ ०३छ् इमा ब्रह्म सधमादे जुषस्व .. ९२९

४ ३ १ १४ ०१अ विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे .
४ ३ १ १४ ०१छ् क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनं .. ९३०
४ ३ १ १४ ०२अ नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरे .
४ ३ १ १४ ०२छ् सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः .. ९३१
४ ३ १ १४ ०३अ समु रेभसो अस्वरन्निन्द्रं सोमस्य पीतये .
४ ३ १ १४ ०३छ् स्वःपतिर्यदी वृधे धृतव्रतो ह्योजसा समूतिभिः .. ९३२

४ ३ १ १५ ०१अ यो राजा चर्षणीनां याता रथेभिरध्रिगुः .
४ ३ १ १५ ०१छ् विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे .. ९३३
४ ३ १ १५ ०२अ इन्द्रं तं शुम्भ्य पुरुहन्मन्नवसे यस्य द्विता विधर्त्तरि .
४ ३ १ १५ ०२छ् हस्तेन वज्रः प्रति धायि दर्शतो महां देवो न सूर्यः .. ९३४

४ ३ १ १६ ०१अ परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः .
४ ३ १ १६ ०१छ् स्वानैर्याति कविक्रतुः .. ९३५
४ ३ १ १६ ०२अ स सूनुर्मातरा शुचिर्जातो जाते अरोचयत्.
४ ३ १ १६ ०२छ् महान्महो ऋतावृधा .. ९३६
४ ३ १ १६ ०३अ प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः .
४ ३ १ १६ ०३छ् वीत्यर्ष पनिष्टये .. ९३७

४ ३ १ १७ ०१अ त्वं ह्या३ꣳ अङ्ग दैव्या पवमान जनिमानि द्युमत्तमः .
४ ३ १ १७ ०१छ् अमृतत्वाय घोषयन्.. ९३८
४ ३ १ १७ ०२अ येना नवग्वो दध्यङ्ङपोर्णुते येन विप्रास आपिरे .
४ ३ १ १७ ०२छ् देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्याशत .. ९३९

४ ३ १ १८ ०१अ सोमः पुनान ऊर्मिणाव्यं वारं वि धावति .
४ ३ १ १८ ०१छ् अग्रे वाचः पवमानः कनिक्रदत्.. ९४०
४ ३ १ १८ ०२अ धीभिर्मृजन्ति वाजिनं वने क्रीडन्तमत्यविं .
४ ३ १ १८ ०२छ् अभि त्रिपृष्ठं मतयः समस्वरन्.. ९४१
४ ३ १ १८ ०३अ असर्जि कलशां अभि मीढ्वान्त्सप्तिर्न वाजयुः .
४ ३ १ १८ ०३छ् पुनानो वाचं जनयन्नसिष्यदत्.. ९४२

४ ३ १ १९ ०१अ सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः .

४ ३ १ १९ ०१छ् जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः .. ९४३
४ ३ १ १९ ०२अ ब्रह्मा देवानां पदवीः कवीनां ऋषिर्विप्राणां महिषोमृगाणां .
४ ३ १ १९ ०२छ् श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन्.. ९४४
४ ३ १ १९ ०३अ प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिर स्तोमान्पवमानो मनीषाः .
४ ३ १ १९ ०३छ् अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन्.. ९४५

४ ३ १ २० ०१अ अग्निं वो वृधन्तमध्वराणां पुरूतमं .
४ ३ १ २० ०१छ् अच्छा नप्त्रे सहस्वते .. ९४६
४ ३ १ २० ०२अ अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या .
४ ३ १ २० ०२छ् अस्य क्रत्वा यशस्वतः .. ९४७
४ ३ १ २० ०३अ अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते .
४ ३ १ २० ०३छ् आ वाजैरुप नो गमत्.. ९४८

४ ३ १ २१ ०१अ इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदं .
४ ३ १ २१ ०१छ् शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने .. ९४९
४ ३ १ २१ ०२अ न किष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे .
४ ३ १ २१ ०२छ् न किष्ट्वानु मज्मना न किः स्वश्व आनशे .. ९५०
४ ३ १ २१ ०३अ इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन .
४ ३ १ २१ ०३छ् सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः .. ९५१

४ ३ १ २२ ०१अ इन्द्र जुषस्व प्र वहा याहि शूर हरिह .
४ ३ १ २२ ०१छ् पिबा सुतस्य मतिर्न मधोश्चकानश्चारुर्मदाय .. ९५२
४ ३ १ २२ ०२अ इन्द्र जठरं नव्यं न पृणस्व मधोर्दिवो न .
४ ३ १ २२ ०२छ् अस्य सुतस्य स्वा३र्नोप त्वा मदाः सुवाचो अस्थुः .. ९५३
४ ३ १ २२ ०३अ इन्द्रस्तुराषाण्मित्रो न जघान वृत्रं यतिर्न .
४ ३ १ २२ ०३छ् बिभेद वलं भृगुर्न ससाहे शतून्मदे सोमस्य .. ९५४

तृतीय प्रपाठकः . द्वितीयोऽर्धः
४ ३ २ ०१ ०१अ गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः .
४ ३ २ ०१ ०१छ् त्वं सुवीरो असि सोम विश्ववित्तं त्वा नर उप गिरेम आसते .. ९५५
४ ३ २ ०१ ०२अ त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि .
४ ३ २ ०१ ०२छ् स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे .. ९५६
४ ३ २ ०१ ०३अ ईशान इमा भुवनानि ईयसे युजान इन्दो हरितः सुपर्ण्यः .
४ ३ २ ०१ ०३छ् तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः .. ९५७

४ ३ २ ०२ ०१अ पवमानस्य विश्ववित्र ते सर्गा असृक्षत .

४ ३ २ ०२ ०१छ् सूर्यस्येव न रश्मयः .. ९५८
४ ३ २ ०२ ०२अ केतुं कृण्वं दिवस्परि विश्वा रूपाभ्यर्षसि .
४ ३ २ ०२ ०२छ् समुद्रः सोम पिन्वसे .. ९५९
४ ३ २ ०२ ०३अ जज्ञानो वाचमिष्यसि पवमान विधर्मणि .
४ ३ २ ०२ ०३छ् क्रन्दं देवो न सूर्यः .. ९६०

४ ३ २ ०३ ०१अ प्र सोमासो अधन्विषुः पवमानास इन्दवः .
४ ३ २ ०३ ०१छ् श्रीणाना अप्सु वृञ्जते .. ९६१
४ ३ २ ०३ ०२अ अभि गावो अधन्विषुरापो न प्रवता यतीः .
४ ३ २ ०३ ०२छ् पुनाना इन्द्रमाशत .. ९६२
४ ३ २ ०३ ०३अ प्र पवमान धन्वसि सोमेन्द्राय मादनः .
४ ३ २ ०३ ०३छ् नृभिर्यतो वि नीयसे .. ९६३
४ ३ २ ०३ ०४अ इन्दो यदद्रिभिः सुतः पवित्रं परिदीयसे .
४ ३ २ ०३ ०४छ् अरमिन्द्रस्य धाम्ने .. ९६४
४ ३ २ ०३ ०५अ त्वं सोम नृमादनः पवस्व चर्षणीधृतिः .
४ ३ २ ०३ ०५छ् सस्निर्यो अनुमाद्यः .. ९६५
४ ३ २ ०३ ०६अ पवस्व वृत्रहन्तम उक्थेभिरनुमाद्यः .
४ ३ २ ०३ ०६छ् शुचिः पावको अद्भुतः .. ९६६
४ ३ २ ०३ ०७अ शुचिः पावक उच्यते सोमः सुतः स मधुमान्.
४ ३ २ ०३ ०७छ् देवावीरघशंसहा .. ९६७

४ ३ २ ०४ ०१अ प्र कविर्देववीतयेऽव्या वारेभिरव्यत .
४ ३ २ ०४ ०१छ् साह्वान्विश्वा अभि स्पृधः .. ९६८
४ ३ २ ०४ ०२अ स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति .
४ ३ २ ०४ ०२छ् पवमानः सहस्रिणं .. ९६९
४ ३ २ ०४ ०३अ परि विश्वानि चेतसा मृज्यसे पवसे मती .
४ ३ २ ०४ ०३छ् स नः सोम श्रवो विदः .. ९७०
४ ३ २ ०४ ०४अ अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिं .
४ ३ २ ०४ ०४छ् इषं स्तोतृभ्य आ भर .. ९७१
४ ३ २ ०४ ०५अ त्वं राजेव सुव्रतो गिरः सोमाविवेशिथ .
४ ३ २ ०४ ०५छ् पुनानो वह्ने अद्भुत .. ९७२
४ ३ २ ०४ ०६अ स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः .
४ ३ २ ०४ ०६छ् सोमश्चमूषु सीदति .. ९७३
४ ३ २ ०४ ०७अ क्रीडुर्मखो न मंहयुः पवित्रं सोम गच्छसि .
४ ३ २ ०४ ०७छ् दधत्स्तोत्रे सुवीर्यं .. ९७४

४ ३ २ ०५ ०१अ यवंयवं नो अन्धसा पुष्टंपुष्टं परि स्रव .
४ ३ २ ०५ ०१छ् विश्वा च सोम सौभगा .. ९७५
४ ३ २ ०५ ०२अ इन्दो यथा तव स्तवो यथा ते जातमन्धसः .
४ ३ २ ०५ ०२छ् नि बर्हिषि प्रिये सदः .. ९७६
४ ३ २ ०५ ०३अ उत नो गोविदश्ववित्पवस्व सोमान्धसा .
४ ३ २ ०५ ०३छ् मक्षूतमेभिरहभिः .. ९७७
४ ३ २ ०५ ०४अ यो जिनाति न जीयते हन्ति शतुमभीत्य .
४ ३ २ ०५ ०४छ् स पवस्व सहस्रजित्.. ९७८

४ ३ २ ०६ ०१अ यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये .
४ ३ २ ०६ ०१छ् ताभिः पवित्रमासदः .. ९७९
४ ३ २ ०६ ०२अ सो अर्षेन्द्राय पीतये तिरो वाराण्यव्यया .
४ ३ २ ०६ ०२छ् सीदन्नृतस्य योनिमा .. ९८०
४ ३ २ ०६ ०३अ त्वं सोम परि स्रव स्वादिष्ठो अङ्गिरोभ्यः .
४ ३ २ ०६ ०३छ् वरिवोविद्धृतं पयः .. ९८१

४ ३ २ ०७ ०१अ तव श्रियो वर्ष्यस्येव विद्युतोग्नेश्चिकित्र उषसामिवेतयः .
४ ३ २ ०७ ०१छ् यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमासनि .. ९८२
४ ३ २ ०७ ०२अ वातोपजूत इषितो वशां अनु तृषु यदन्ना वेविषद्वितिष्ठसे .
४ ३ २ ०७ ०२छ् आ ते यतन्ते रथ्यो३ यथा पृथक्शर्धांस्यग्ने अजरस्य धक्षतः .. ९८३
४ ३ २ ०७ ०३अ मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतरं मतिं .
४ ३ २ ०७ ०३छ् त्वामर्भस्य हविषः समानमित्तवां महो वृणते नान्यं त्वत्.. ९८४

४ ३ २ ०८ ०१अ पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण .
४ ३ २ ०८ ०१छ् मित्र वंसि वां सुमतिं .. ९८५
४ ३ २ ०८ ०२अ ता वां सम्यगद्रुह्वाणेषमश्याम धाम च .
४ ३ २ ०८ ०२छ् वयं वां मित्रा स्याम .. ९८६
४ ३ २ ०८ ०३अ पातं नो मित्रा पायुभिरुत त्रायेथां सुत्रात्रा .
४ ३ २ ०८ ०३छ् साह्याम दस्यूं तनूभिः .. ९८७

४ ३ २ ०९ ०१अ उत्तिष्ठन्नोजसा सह पीत्वा शिप्रे अवेपयः .
४ ३ २ ०९ ०१छ् सोममिन्द्र चमूसुतं .. ९८८
४ ३ २ ०९ ०२अ अनु त्वा रोदसी उभे स्पर्धमानमददेतां .
४ ३ २ ०९ ०२छ् इन्द्र यद्दस्युहाभवः .. ९८९
४ ३ २ ०९ ०३अ वाचमष्टापदीमहं नवस्रक्तिमृतावृधं .
४ ३ २ ०९ ०३छ् इन्द्रात्परितन्वं ममे .. ९९०

४ ३ २ १० ०१अ  इन्द्राग्नी युवामिमेऽभि स्तोमा अनूषत .
४ ३ २ १० ०१छ्  पिबतं शम्भुवा सुतं .. ९९१
४ ३ २ १० ०२अ  या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा .
४ ३ २ १० ०२छ्  इन्द्राग्नी ताभिरा गतं .. ९९२
४ ३ २ १० ०३अ  ताभिरा गच्छतं नरोपेदं सवनं सुतं .
४ ३ २ १० ०३छ्  इन्द्राग्नी सोमपीतये .. ९९३

४ ३ २ ११ ०१अ  अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्.
४ ३ २ ११ ०१छ्  सीदन्योनौ योनेष्वा .. ९९४
४ ३ २ ११ ०२अ  अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः .
४ ३ २ ११ ०२छ्  सोमा अर्षन्तु विष्णवे .. ९९५
४ ३ २ ११ ०३अ  इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः .
४ ३ २ ११ ०३छ्  आ पवस्व सहस्रिणं .. ९९६

४ ३ २ १२ ०१अ  सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनां .
४ ३ २ १२ ०१छ्  अश्वयेव हरिता याति धारया मन्द्रया याति धारया .. ९९७
४ ३ २ १२ ०२अ  अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः .
४ ३ २ १२ ०२छ्  समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते .. ९९८

४ ३ २ १३ ०१अ  यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु .
४ ३ २ १३ ०१छ्  तन्नः पुनान आ भर .. ९९९
४ ३ २ १३ ०२अ  वृषा पुनान आयुंषि स्तनयन्नधि बर्हिषि .
४ ३ २ १३ ०२छ्  हरिः सन्योनिमासदः .. १०००
४ ३ २ १३ ०३अ  युवं हि स्थः स्वःपती इन्द्रश्च सोम गोपती .
४ ३ २ १३ ०३छ्  ईशाना पिप्यतं धियः .. १००१

४ ३ २ १४ ०१अ  इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः .
४ ३ २ १४ ०१छ्  तमिन्महत्स्वाजिषूतिमर्भे हवामहे स वाजेषु प्र नोऽविषत्.. १००२
४ ३ २ १४ ०२अ  असि हि वीर सेन्योऽसि भूरि पराददिः .
४ ३ २ १४ ०२छ्  असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु .. १००३
४ ३ २ १४ ०३अ  यदुदीरत आजयो धृष्णवे धीयते धनां .
४ ३ २ १४ ०३छ्  युङ्क्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्मां इन्द्र वसौ दधः .. १००४

४ ३ २ १५ ०१अ  स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः .
४ ३ २ १५ ०१छ्  या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभसे वस्वीरनु स्वराज्यं .. १००५

४ ३ २ १५ ०२अ ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः .
४ ३ २ १५ ०२छ् प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीरनु स्वराज्यं .. १००६
४ ३ २ १५ ०३अ ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः .
४ ३ २ १५ ०३छ् व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यं .. १००७

४ ३ २ १६ ०१अ असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः .
४ ३ २ १६ ०१छ् श्येनो न योनिमासदत्.. १००८
४ ३ २ १६ ०२अ शुभ्रमन्धो देववातमप्सु धौतं नृभिः सुतं .
४ ३ २ १६ ०२छ् स्वदन्ति गावः पयोभिः .. १००९
४ ३ २ १६ ०३अ आदीमश्वं न हेतारमशूशुभन्नमृताय .
४ ३ २ १६ ०३छ् मधो रसं सधमादे .. १०१०

४ ३ २ १७ ०१अ अभि द्युम्नं बृहद्यश इषस्पते दीदिहि देव देवयुं .
४ ३ २ १७ ०१छ् वि कोशं मध्यमं युव .. १०११
४ ३ २ १७ ०२अ आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः .
४ ३ २ १७ ०२छ् वृष्टिं दिवः पवस्व रीतिमपो जिन्वन्गविष्टये धियः .. १०१२

४ ३ २ १८ ०१अ प्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिं .
४ ३ २ १८ ०१छ् विश्वा परि प्रिया भुवदध द्विता .. १०१३
४ ३ २ १८ ०२अ उप त्रितस्य पाष्यो३रभक्त यद्गुहा पदं .
४ ३ २ १८ ०२छ् यज्ञस्य सप्त धामभिरध प्रियं .. १०१४
४ ३ २ १८ ०३अ त्रीणि त्रितस्य धारया पृष्टेष्वैरयद्रयिं .
४ ३ २ १८ ०३छ् मिमीते अस्य योजना वि सुक्रतुः .. १०१५

४ ३ २ १९ ०१अ पवस्व वाजसातये पवित्रे धारया सुतः .
४ ३ २ १९ ०१छ् इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तरः .. १०१६
४ ३ २ १९ ०२अ त्वां रिहन्ति धीतयो हरिं पवित्रे अदुहः .
४ ३ २ १९ ०२छ् वत्सं जातं न मातरः पवमान विधर्मणि .. १०१७
४ ३ २ १९ ०३अ त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे .
४ ३ २ १९ ०३छ् प्रति द्रापिममुञ्चथाः पवमान महित्वना .. १०१८

४ ३ २ २० ०१अ इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय .
४ ३ २ २० ०१छ् हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा .. १०१९
४ ३ २ २० ०२अ अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः .
४ ३ २ २० ०२छ् इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय .. १०२०
४ ३ २ २० ०३अ अभि व्रतानि पवते पुनानो देवो देवान्त्स्वेन रसेन पृञ्चन्.

४ ३ २ २० ०३छ् इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये .. १०२१

४ ३ २ २१ ०१अ  आ ते अग्न इधीमहि द्युमन्तं देवाजरं .
४ ३ २ २१ ०१छ् युद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं स्तोतृभ्य आ भर .. १०२२
४ ३ २ २१ ०२अ  आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते .
४ ३ २ २१ ०२छ् सुश्चन्द्र दस्म विश्पते हव्यवाट्तुभ्यं हूयत इषं स्तोतृभ्य आ भर .. १०२३
४ ३ २ २१ ०३अ  ओभे सुश्चन्द्र विश्पते दर्वी श्रीणीष आसनि .
४ ३ २ २१ ०३छ् उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषं स्तोतृभ्य आ भर .. १०२४

४ ३ २ २२ ०१अ  इन्द्राय साम गायत विप्राय बृहते बृहत्.
४ ३ २ २२ ०१छ् ब्रह्माकृते विपश्चिते पनस्यवे .. १०२५
४ ३ २ २२ ०२अ  त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचयः .
४ ३ २ २२ ०२छ् विश्वकर्मा विश्वदेवो महां असि .. १०२६
४ ३ २ २२ ०३अ  विभ्राजं ज्योतिषा त्व३रगच्छो रोचनं दिवः .
४ ३ २ २२ ०३छ् देवास्त इन्द्र सख्याय येमिरे .. १०२७

४ ३ २ २३ ०१अ  असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि .
४ ३ २ २३ ०१छ् आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः .. १०२८
४ ३ २ २३ ०२अ  आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी .
४ ३ २ २३ ०२छ् अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना .. १०२९
४ ३ २ २३ ०३अ  इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसं .
४ ३ २ २३ ०३छ् ऋषीणां सुष्टुतीरुप यज्ञं च मानुषाणां .. १०३०

चतुर्थ प्रपाठकः .  प्रथमोऽर्धः
४ ४ १ ०१ ०१अ  ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः .
४ ४ १ ०१ ०१छ् दधाति रत्नं स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः .. १०३१
४ ४ १ ०१ ०२अ  अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः .
४ ४ १ ०१ ०२छ् हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा .. १०३२
४ ४ १ ०१ ०३अ  अग्रे सिन्धूनां पवमानो अर्षत्यग्रे वाचो अग्रियो गोषु गच्छसि .
४ ४ १ ०१ ०३छ् अग्रे वाजस्य भजसे महद्धनं स्वायुधः सोतृभिः सोम सूयसे .. १०३३

४ ४ १ ०२ ०१अ  असृक्षत प्र वाजिनो गव्या सोमासो अश्वया .
४ ४ १ ०२ ०१छ् शुक्रासो वीरयाशवः .. १०३४
४ ४ १ ०२ ०२अ  शुम्भमानो ऋतायुभिर्मृज्यमाना गभस्त्योः .
रं ४ ४ १ ०२ ०२छ् पवन्ते वारे अव्यये .. १०३५
४ ४ १ ०२ ०३अ  ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा .

४ ४ १ ०२ ०३छ् पवन्तामान्तरिक्ष्या .. १०३६

४ ४ १ ०३ ०१अ  पवस्व देववीरति पवित्रं सोम रंह्या .
४ ४ १ ०३ ०१छ् इन्द्रमिन्दो वृषा विश .. १०३७
४ ४ १ ०३ ०२अ  आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः .
४ ४ १ ०३ ०२छ् आ योनिं धर्णसिः सदः .. १०३८
४ ४ १ ०३ ०३अ  अधुक्षत प्रियं मधु धारा सुतस्य वेधसः .
४ ४ १ ०३ ०३छ् अपो वसिष्ट सुक्रतुः .. १०३९
४ ४ १ ०३ ०४अ  महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः .
४ ४ १ ०३ ०४छ् यद्गोभिर्वासयिष्यसे .. १०४०
४ ४ १ ०३ ०५अ  समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः .
४ ४ १ ०३ ०५छ् सोमः पवित्रे अस्मयुः .. १०४१
४ ४ १ ०३ ०६अ  अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः .
४ ४ १ ०३ ०६छ् सं सूर्येण दिद्युते .. १०४२
४ ४ १ ०३ ०७अ  गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः .
४ ४ १ ०३ ०७छ् याभिर्मदाय शुम्भसे .. १०४३
४ ४ १ ०३ ०८अ  तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे .
४ ४ १ ०३ ०८छ् तव प्रशस्तये महे .. १०४४
४ ४ १ ०३ ०९अ  गोषा इन्दो नृषा अस्यश्वसा वाजसा उत .
४ ४ १ ०३ ०९छ्  आत्मा यज्ञस्य पूर्व्यः .. १०४५
४ ४ १ ०३ १०अ  अस्मभ्यमिन्दविन्द्रियं मधोः पवस्व धारया .
४ ४ १ ०३ १०छ् पर्जन्यो वृष्टिमां इव .. १०४६

४ ४ १ ०४ ०१अ  सना च सोम जेषि च पवमान महि श्रवः .
४ ४ १ ०४ ०१छ् अथा नो वस्यसस्कृधि .. १०४७
४ ४ १ ०४ ०२अ  सना ज्योतिः सना स्वा३र्विश्वा च सोम सौभगा .
४ ४ १ ०४ ०२छ् अथा नो वस्यसस्कृधि .. १०४८
४ ४ १ ०४ ०३अ  सना दक्षमुत क्रतुमप सोम मृधो जहि .
४ ४ १ ०४ ०३छ् अथा नो वस्यसस्कृधि .. १०४९
४ ४ १ ०४ ०४अ  पवीतारः पुनीतन सोममिन्द्राय पातवे .
४ ४ १ ०४ ०४छ् अथा नो वस्यसस्कृधि .. १०५०
४ ४ १ ०४ ०५अ  त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः .
४ ४ १ ०४ ०५छ् अथा नो वस्यसस्कृधि .. १०५१
४ ४ १ ०४ ०६अ  तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यं .
४ ४ १ ०४ ०६छ् अथा नो वस्यसस्कृधि .. १०५२
४ ४ १ ०४ ०७अ  अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिं .

४ ४ १ ०४ ०७छ् अथा नो वस्यसस्कृधि .. १०५३
४ ४ १ ०४ ०८अ अभ्या३र्षानपच्युतो वाजिन्त्समत्सु सासहिः .
४ ४ १ ०४ ०८छ् अथा नो वस्यसस्कृधि .. १०५४
४ ४ १ ०४ ०९अ त्वां यज्ञैरवीवृधन्पवमान विधर्मणि .
४ ४ १ ०४ ०९छ् अथा नो वस्यसस्कृधि .. १०५५
४ ४ १ ०४ १०अ रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर .
४ ४ १ ०४ १०छ् अथा नो वस्यसस्कृधि .. १०५६

४ ४ १ ०५ ०१अ तरत्स मन्दी धावति धारा सुतस्यान्धसः .
४ ४ १ ०५ ०१छ् तरत्स मन्दी धावति .. १०५७
४ ४ १ ०५ ०२अ उस्रा वेद वसूनां मर्त्तस्य देव्यवसः .
४ ४ १ ०५ ०२छ् तरत्स मन्दी धावति .. १०५८
४ ४ १ ०५ ०३अ ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे .
४ ४ १ ०५ ०३छ् तरत्स मन्दी धावति .. १०५९
४ ४ १ ०५ ०४अ आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे .
४ ४ १ ०५ ०४छ् तरत्स मन्दी धावति .. १०६०

४ ४ १ ०६ ०१अ एते सोमा असृक्षत गृणानाः शवसे महे .
४ ४ १ ०६ ०१छ् मदिन्तमस्य धारया .. १०६१
४ ४ १ ०६ ०२अ अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि .
४ ४ १ ०६ ०२छ् सनद्वाजः परि स्रव .. १०६२
४ ४ १ ०६ ०३अ उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः .
४ ४ १ ०६ ०३छ् गृणानो जमदग्निना .. १०६३

४ ४ १ ०७ ०१अ इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया .
४ ४ १ ०७ ०१छ् भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव .. १०६४
४ ४ १ ०७ ०२अ भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयं .
४ ४ १ ०७ ०२छ् जीवातवे प्रतरं साधया धियोऽग्ने सख्ये म रिषामा वयं तव .. १०६५
४ ४ १ ०७ ०३अ शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतं .
४ ४ १ ०७ ०३छ् त्वमादित्यां आ वह तान्ह्यू३श्मस्यग्ने सख्ये मा रिषामा वयं तव .. १०६६

४ ४ १ ०८ ०१अ प्रति वां सूर उदिते मित्रं गृणीषे वरुणं .
४ ४ १ ०८ ०१छ् अर्यमणं रिशादसं .. १०६७
४ ४ १ ०८ ०२अ राया हिरण्यया मतिरियमवृकाय शवसे .
४ ४ १ ०८ ०२छ् इयं विप्रामेधसातये .. १०६८
४ ४ १ ०८ ०३अ ते स्याम देव वरुण ते मित्र सूरिभिः सह .

४ ४ १ ०८ ०३छ् इषं स्वश्च धीमहि .. १०६९

४ ४ १ ०९ ०१अ भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः .
४ ४ १ ०९ ०१छ् वसु स्पार्हं तदा भर .. १०७०
४ ४ १ ०९ ०२अ यस्य ते विश्वमानुषग्भूरेर्दत्तस्य वेदति .
४ ४ १ ०९ ०२छ् वसु स्पार्हं तदा भर .. १०७१
४ ४ १ ०९ ०३अ यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतं .
४ ४ १ ०९ ०३छ् वसु स्पार्हं तदा भर .. १०७२

४ ४ १ १० ०१अ यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु .
४ ४ १ १० ०१छ् इन्द्राग्नी तस्य बोधतं .. १०७३
४ ४ १ १० ०२अ तोशासा रथयावाना वृत्रहणापराजिता .
४ ४ १ १० ०२छ् इन्द्राग्नी तस्य बोधतं .. १०७४
४ ४ १ १० ०३अ इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः .
४ ४ १ १० ०३छ् इन्द्राग्नी तस्य बोधतं .. १०७५

४ ४ १ ११ ०१अ इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः .
४ ४ १ ११ ०१छ् अर्कस्य योनिमासदं .. १०७६
४ ४ १ ११ ०२अ तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति धर्णसिं .
४ ४ १ ११ ०२छ् सं त्वा मृजन्त्यायवः .. १०७७
४ ४ १ ११ ०३अ रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे .
४ ४ १ ११ ०३छ् पवमानस्य मरुतः .. १०७८

४ ४ १ १२ ०१अ मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि .
४ ४ १ १२ ०१छ् रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि .. १०७९
४ ४ १ १२ ०२अ पुनानो वरे पवमनो अव्यये वृषो अचिक्रदद्वने .
४ ४ १ १२ ०२छ् देवानां सोम पवमान निष्कृतं गोभिरञ्जानो अर्षसि .. १०८०

४ ४ १ १३ ०१अ एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरं .
४ ४ १ १३ ०१छ् समादित्येभिरख्यत .. १०८१
४ ४ १ १३ ०२अ समिन्द्रेणोत वायुना सुत एति पवित्र आ .
४ ४ १ १३ ०२छ् सं सूर्यस्य रश्मिभिः .. १०८२
४ ४ १ १३ ०३अ स नो भगाय वायवे पूष्णे पवस्व मधुमान्.
४ ४ १ १३ ०३छ् चारुर्मित्रे वरुणे च .. १०८३

४ ४ १ १४ ०१अ रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः .

४ ४ ११४ ०१छ् क्षुमन्तो याभिर्मदेम .. १०८४
४ ४ ११४ ०२अ आ घ त्वावां त्मना युक्तः स्तोतृभ्यो धृष्णवीयानः .
४ ४ ११४ ०२छ् ऋणोरक्षं न चक्र्योः .. १०८५
४ ४ ११४ ०३अ आ यद्दुवः शतक्रतवा कामं जरित्रीणां .
४ ४ ११४ ०३छ् ऋणोरक्षं न शचीभिः .. १०८६

४ ४ ११५ ०१अ सुरूपकृत्नुमूतये सुदुघामिव गोदुहे .
४ ४ ११५ ०१छ् जुहूमसि द्यविद्यवि .. १०८७
४ ४ ११५ ०२अ उप नः सवना गहि सोमस्य सोमपाः पिब .
४ ४ ११५ ०२छ् गोदा इद्रेवतो मदः .. १०८८
४ ४ ११५ ०३अ अथा ते अन्तमानां विद्याम सुमतीनां .
४ ४ ११५ ०३छ् मा नो अति ख्य आ गहि .. १०८९

४ ४ ११६ ०१अ उभे यदिन्द्र रोदसी आपप्राथोषा इव .
४ ४ ११६ ०१छ् महान्तं त्वा महीनां सम्राजं चर्षणीनां .
४ ४ ११६ ०१ए देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्.. १०९०
४ ४ ११६ ०२अ दीर्घं ह्यङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः .
४ ४ ११६ ०२छ् पूर्वेण मघवन्पदा वयामजो यथा यमः .
४ ४ ११६ ०२ए देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्.. १०९१
४ ४ ११६ ०३अ अव स्म दुर्हणायतो मर्त्तस्य तनुहि स्थिरं .
४ ४ ११६ ०३छ् अधस्पदं तमीं कृधि यो अस्मां अभिदासति .
४ ४ ११६ ०३ए देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्.. १०९२

४ ४ ११७ ०१अ परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत्.
४ ४ ११७ ०१छ् मदेषु सर्वधा असि .. १०९३
४ ४ ११७ ०२अ त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः .
४ ४ ११७ ०२छ् मदेषु सर्वधा असि .. १०९४
४ ४ ११७ ०३अ त्वे विश्वे सजोषसो देवासः पीतिमाशत .
४ ४ ११७ ०३छ् मदेषु सर्वधा असि .. १०९५

४ ४ ११८ ०१अ स सुन्वे यो वसूनां यो रायामानेता य इडानां .
४ ४ ११८ ०१छ् सोमो यः सुक्षितीनां .. १०९६
४ ४ ११८ ०२अ यस्य त इन्द्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः .
४ ४ ११८ ०२छ् आ येन मित्रावरुणा करामह एन्द्रमवसे महे .. १०९७

४ ४ ११९ ०१अ तं वः सखायो मदाय पुनानमभि गायत .

४ ४ १ १९ ०१छ् शिशुं न हव्यैः स्वदयन्त गूर्तिभिः .. १०९८
४ ४ १ १९ ०२अ सं वत्स इव मातृभिरिन्दुर्हिन्वानो अज्यते .
४ ४ १ १९ ०२छ् देवावीर्मदो मतिभिः परिष्कृतः .. १०९९
४ ४ १ १९ ०३अ अयं दक्षाय साधनोऽयं शर्धाय वीतये .
४ ४ १ १९ ०३छ् अयं देवेभ्यो मधुमत्तरः सुतः .. ११००

४ ४ १ २० ०१अ सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः .
४ ४ १ २० ०१छ् मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः .. ११०१
४ ४ १ २० ०२अ ते पूतासो विपश्चितः सोमासो दध्याशिरः .
४ ४ १ २० ०२छ् सूरासो न दर्शतासो जिगत्नवो धुवा घृते .. ११०२
४ ४ १ २० ०३अ सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि .
४ ४ १ २० ०३छ् इषमस्मभ्यमभितः समस्वरन्वसुविदः .. ११०३

४ ४ १ २१ ०१अ अया पवा पवस्वैना वसूनि मांश्चत्व इन्दो सरसि प्र धन्व .
४ ४ १ २१ ०१छ् ब्रघ्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात्.. ११०४
४ ४ १ २१ ०२अ उत न एना पवया पवस्वाधि शुते श्रवाय्यस्य तीर्थे .
४ ४ १ २१ ०२छ् षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय .. ११०५
४ ४ १ २१ ०३अ महीमे अस्य वृष नाम शूषे मांश्चत्वे वा पृशने वा वधत्रे .
४ ४ १ २१ ०३छ् अस्वापयन्निगुतः स्नेहयच्चापामित्रां अपाचितो अचेतः .. ११०६

४ ४ १ २२ ०१अ अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः .. ११०७
४ ४ १ २२ ०२अ वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमो रयिं दाः .. ११०८
४ ४ १ २२ ०३अ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः .. ११०९

४ ४ १ २३ ०१अ इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः .. १११०
४ ४ १ २३ ०२अ यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधातु .. १११११
४ ४ १ २३ ०३अ आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत्.. १११२

४ ४ १ २४ ०१अ प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते .. १११३
४ ४ १ २४ ०२अ अर्चन्त्यर्कं मरुतः स्वर्का आ स्तोभति शुतो युवा स इन्द्रः .. १११४
४ ४ १ २४ ०३अ उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र .. १११५

चतुर्थ प्रपाठकः . द्वितीयोऽर्धः
४ ४ २ ०१ ०१अ प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति .
४ ४ २ ०१ ०१छ् महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन्.. १११६
४ ४ २ ०१ ०२अ प्र हंसासस्तृपला वग्नुमच्छामादस्तं वृषगणा अयासुः .

४ ४ २ ०१ ०२छ् आङ्गोषिणं पवमानं सखायो दुर्मर्षं वाणं प्र वदन्ति साकं .. १११७
४ ४ २ ०१ ०३अ स योजत उरुगायस्य जूतिं वृथा क्रीडन्तं मिमते न गावः .
४ ४ २ ०१ ०३छ् परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर्ददृशे नक्तमृज्रः .. १११८
४ ४ २ ०१ ०४अ प्र स्वानासो रथा इवार्वन्तो न अवस्यवः .
४ ४ २ ०१ ०४छ् सोमासो राये अक्रमुः .. १११९
४ ४ २ ०१ ०५अ हिन्वानासो रथा इव दधन्विरे गभस्त्योः .
४ ४ २ ०१ ०५छ् भरासः कारिणामिव .. ११२०
४ ४ २ ०१ ०६अ राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते .
४ ४ २ ०१ ०६छ् यज्ञो न सप्त धातृभिः .. ११२१
४ ४ २ ०१ ०७अ परि स्वानास इन्दवो मदाय बर्हणा गिरा .
४ ४ २ ०१ ०७छ् मधो अर्षन्ति धारया .. ११२२
४ ४ २ ०१ ०८अ आपानासो विवस्वतो जिन्वन्त उषसो भगं .
४ ४ २ ०१ ०८छ् सूरा अण्वं वि तन्वते .. ११२३
४ ४ २ ०१ ०९अ अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः .
४ ४ २ ०१ ०९छ् वृष्णो हरस आयवः .. ११२४
४ ४ २ ०१ १०अ समीचीनास आशत होतारः सप्तजानयः .
४ ४ २ ०१ १०छ् पदमेकस्य पिप्रतः .. ११२५
४ ४ २ ०१ ११अ नाभा नाभिं न आ ददे चक्षुषा सूर्य दृशे .
४ ४ २ ०१ ११छ् कवेरपत्यमा दुहे .. ११२६
४ ४ २ ०१ १२अ अभि प्रियं दिवस्पदमध्वर्युभिर्गुहा हितं .
४ ४ २ ०१ १३छ् सूरः पस्यति चक्षसा .. ११२७

४ ४ २ ०२ ०१अ असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः .
४ ४ २ ०२ ०१छ् विदाना अस्य योजना .. ११२८
४ ४ २ ०२ ०२अ प्र धारा मधो अग्रियो महीरपो वि गाहते .
४ ४ २ ०२ ०२छ् हविर्हविःषु वन्द्यः .. ११२९
४ ४ २ ०२ ०३अ प्र युजा वाचो अग्रियो वृषो अचिक्रदद्वने .
४ ४ २ ०२ ०३छ् सद्माभि सत्यो अध्वरः .. ११३०
४ ४ २ ०२ ०४अ परि यत्काव्या कविर्नृम्णा पुनानो अर्षति .
४ ४ २ ०२ ०४छ् स्ववाजी सिषासति .. ११३१
४ ४ २ ०२ ०५अ पवमानो अभि स्पृधो विशो राजेव सीदति .
४ ४ २ ०२ ०५छ् यदीमृण्वन्ति वेधसः .. ११३२
४ ४ २ ०२ ०६अ अव्या वारे परि प्रियो हरिर्वनेषु सीदति .
४ ४ २ ०२ ०६छ् रेभो वनुष्यते मति . ११३३
४ ४ २ ०२ ०७अ स वायुमिन्द्रमश्विना साकं मदेन गच्छति .
४ ४ २ ०२ ०७छ् रणा यो अस्य धर्मणा .. ११३४

४ ४ २ ०२ ०८अ  आ मित्रे वरुणे भगे मधोः पवन्त ऊर्मयः .
४ ४ २ ०२ ०८छ् विदाना अस्य शक्मभिः .. ११३५
४ ४ २ ०२ ०९अ  अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये .
४ ४ २ ०२ ०९छ्  श्रवो वसूनि सञ्जितं .. ११३६
४ ४ २ ०२ १०अ  आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे .
४ ४ २ ०२ १०छ् पान्तमा पुरुस्पृहं .. ११३७
४ ४ २ ०२ ११अ  आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणं .
४ ४ २ ०२ ११छ् पान्तमा पुरुस्पृहं .. ११३८
४ ४ २ ०२ १२अ  आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा .
४ ४ २ ०२ १२छ् पान्तमा पुरुस्पृहं .. ११३९

४ ४ २ ०३ ०१अ  मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निं .
४ ४ २ ०३ ०१छ् कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः .. ११४०
४ ४ २ ०३ ०२अ  त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते .
४ ४ २ ०३ ०२छ् तव क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः .. ११४१
४ ४ २ ०३ ०३अ  नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं नवन्त .
४ ४ २ ०३ ०३छ् वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः .. ११४२

४ ४ २ ०४ ०१अ  प्र वो मित्राय गायत वरुणाय विपा गिरा .
४ ४ २ ०४ ०१छ् महिक्षत्रावृतं बृहत्.. ११४३
४ ४ २ ०४ ०२अ  सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च .
४ ४ २ ०४ ०२छ् देवा देवेषु प्रशस्ता .. ११४४
४ ४ २ ०४ ०३अ  ता नः शक्तं पर्थिवस्य महो रायो दिव्यस्य .
४ ४ २ ०४ ०३छ् महि वां क्षत्रं देवेषु .. ११४५

४ ४ २ ०५ ०१अ  इन्द्रा याहि चित्रभानो सुता इमे त्वायवः .
४ ४ २ ०५ ०१छ् अण्वीभिस्तना पूतासः .. ११४६
४ ४ २ ०५ ०२अ  इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः .
४ ४ २ ०५ ०२छ् उप ब्रह्माणि वाघतः .. ११४७
४ ४ २ ०५ ०३अ  इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः .
४ ४ २ ०५ ०३छ् सुते दधिष्व नश्चनः .. ११४८

४ ४ २ ०६ ०१अ  तमीडिष्व यो अर्चिषा वना विश्वा परिष्वजत्.
४ ४ २ ०६ ०१छ् कृष्णा कृणोति जिह्वया .. ११४९
४ ४ २ ०६ ०२अ  य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः .
४ ४ २ ०६ ०२छ् द्युम्नाय सुतरा अपः .. ११५०

४ ४ २ ०६ ०३अ ता नो वाजवतीरिष आशून्पिपृतमर्वतः .
४ ४ २ ०६ ०३छ् एन्द्रमग्निं च वोढवे .. ११५१

४ ४ २ ०७ ०१अ प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति सङ्गिरं .
४ ४ २ ०७ ०१छ् मर्य इव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा .. ११५२
४ ४ २ ०७ ०२अ प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवरणेष्वक्रमुः .
४ ४ २ ०७ ०२छ् हरिं क्रीडन्तमभ्यनूषत स्तुभोऽभि धेनवः पयसेदशिश्रयुः .. ११५३
४ ४ २ ०७ ०३अ आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमान ऊर्मिणा .
४ ४ २ ०७ ०३छ् या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यं .. ११५४

४ ४ २ ०८ ०१अ न किष्टं कर्मणा नशद्यश्चकार सदावृधं .
४ ४ २ ०८ ०१छ् इन्द्रं न यज्ञैर्विश्वगूर्त्तमृभ्वसमधृष्टं धृष्णुमोजसा .. ११५५
४ ४ २ ०८ ०२अ अषाढमुग्रं पृतनासु सासहिं यस्मिन्महीरुरुज्रयः .
४ ४ २ ०८ ०२छ् सं धेनवो जायमाने अनोनवुर्द्यावः क्षामीरनोनवुः .. ११५६

४ ४ २ ०९ ०१अ सखाय आ नि षीदत पुनानाय प्र गायत .
४ ४ २ ०९ ०१छ् शिशुं न यज्ञैः परि भूषत श्रिये .. ११५७
४ ४ २ ०९ ०२अ समी वत्सं न मातृभिः सृजता गयसाधनं .
४ ४ २ ०९ ०२छ् देवाव्या३ं मदमभि द्विशवसं .. ११५८
४ ४ २ ०९ ०३अ पुनाता दक्षसाधनं यथा शर्धाय वीतये .
४ ४ २ ०९ ०३छ् यथा मित्राय वरुणाय शन्तमं .. ११५९

४ ४ २ १० ०१अ प्र वाज्यक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यं .. ११६०
४ ४ २ १० ०२अ स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः .. ११६१
४ ४ २ १० ०३अ प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः .. ११६२

४ ४ २ ११ ०१अ ये सोमासः परावति ये अर्वावति सुन्विरे .
४ ४ २ ११ ०१छ् ये वादः शर्यणावति .. ११६३
४ ४ २ ११ ०२अ य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानां .
४ ४ २ ११ ०२छ् ये वा जनेषु पञ्चसु .. ११६४
४ ४ २ ११ ०३अ ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यं .
४ ४ २ ११ ०३छ् स्वाना देवास इन्दवः .. ११६५

४ ४ २ १२ ०१अ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्.
४ ४ २ १२ ०१छ् अग्ने त्वां कामये गिरा .. ११६६
४ ४ २ १२ ०२अ पुरुत्रा हि सदृङ्ङसि दिशो विश्वा अनु प्रभुः .

४ ४ २ १२ ०२छ् समत्सु त्वा हवामहे .. ११६७
४ ४ २ १२ ०३अ समत्स्वग्निमवसे वाजयन्तो हवामहे .
४ ४ २ १२ ०३छ् वाजेषु चित्रराधसं .. ११६८

४ ४ २ १३ ०१अ त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे .
४ ४ २ १३ ०१छ् आ वीरं पृतनासहं .. ११६९
४ ४ २ १३ ०२अ त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ .
४ ४ २ १३ ०२छ् अथा ते सुम्नमीमहे .. ११७०
४ ४ २ १३ ०३अ त्वां शुष्मिन्पुरुहूत वाजयन्तमुप ब्रुवे सहस्कृत .
४ ४ २ १३ ०३छ् स नो रास्व सुवीर्यं .. ११७१
४ ४ २ १३ ०४अ यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः .
४ ४ २ १३ ०४छ् राधस्तन्नो विदद्वस उभयाहस्त्या भर .. ११७२
४ ४ २ १३ ०५अ यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर .
४ ४ २ १३ ०५छ् विद्याम तस्य ते वयमकूपारस्य दावनः .. ११७३
४ ४ २ १३ ०६अ यत्ते दिक्षु प्रराध्यं मनो अस्ति श्रुतं बृहत्.
४ ४ २ १३ ०६छ् तेन दृढा चिदद्रिव आ वाजं दर्षि सातये .. ११७४

पञ्चम प्रपाठकः . प्रथमोऽर्धः
४ ५ १ ०१ ०१अ शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति विप्रं मरुतो गणेन .
४ ५ १ ०१ ०१छ् कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन्.. ११७५
४ ५ १ ०१ ०२अ ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रनीथः पदवीः कवीनां .
४ ५ १ ०१ ०२छ् तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप्.. ११७६
४ ५ १ ०१ ०३अ चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत्.
४ ५ १ ०१ ०३छ् अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति .. ११७७

४ ५ १ ०२ ०१अ एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन्.
४ ५ १ ०२ ०१छ् वर्धन्तो अस्य वीर्यं .. ११७८
४ ५ १ ०२ ०२अ पुनानासश्चमूषदो गच्छन्तो वायुमश्विना .
४ ५ १ ०२ ०२छ् ते नो धत्त सुवीर्यं .. ११८१
४ ५ १ ०२ ०३अ इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय .
४ ५ १ ०२ ०३छ् देवानां योनिमासदं .. ११८०
४ ५ १ ०२ ०४अ मृजन्ति त्वा देश क्षिपो हिन्वन्ति सप्त धीतयः .
४ ५ १ ०२ ०४छ् अनु विप्रा अमादिषुः .. ११८१
४ ५ १ ०२ ०५अ देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः .
४ ५ १ ०२ ०५छ् स गोभिर्वासयामसि .. ११८२
४ ५ १ ०२ ०६अ पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः .

४ ५ १ ०२ ०६छ् परि गव्यान्यव्यत .. ११८३
४ ५ १ ०२ ०७अ मघोन आ पवस्व नो जहि विश्वा अप द्विषः .
४ ५ १ ०२ ०७छ् इन्दो सखायमा विश .. ११८४
४ ५ १ ०२ ०८अ नृचक्षसं त्वा वयमिन्द्रपीतं स्वर्विदं .
४ ५ १ ०२ ०८छ् भक्षीमहि प्रजामिषं .. ११८५
४ ५ १ ०२ ०९अ वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि .
४ ५ १ ०२ ०९छ् सहो नः सोम पृत्सु धाः .. ११८६

४ ५ १ ०३ ०१अ सोमः पुनानो अर्षति सहस्रधारो अत्यविः .
४ ५ १ ०३ ०१छ् वायोरिन्द्रस्य निष्कृतं .. ११८७
४ ५ १ ०३ ०२अ पवमानमवस्यवो विप्रमभि प्र गायत .
४ ५ १ ०३ ०२छ् सुष्वाणं देववीतये .. ११८८
४ ५ १ ०३ ०३अ पवन्ते वाजसातये सोमाः सहस्रपाजसः .
४ ५ १ ०३ ०३छ् गृणाना देववीतये .. ११८९
४ ५ १ ०३ ०४अ उत नो वाजसातये पवस्व बृहतीरिषः .
४ ५ १ ०३ ०४छ् द्युमदिन्दो सुवीर्यं .. ११९०
४ ५ १ ०३ ०५अ अत्या हियाना न हेतृभिरसृग्रं वाजसातये .
४ ५ १ ०३ ०५छ् वि वारमव्यमाशवः .. ११९१
४ ५ १ ०३ ०६अ ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यं .
४ ५ १ ०३ ०६छ् सुवाना देवास इन्दवः .. ११९२
४ ५ १ ०३ ०७अ वाश्रा अर्षन्तीन्दवोऽभि वत्सं न मातरः .
४ ५ १ ०३ ०७छ् दधन्विरे गभस्त्योः .. ११९३
४ ५ १ ०३ ०८अ जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत्.
४ ५ १ ०३ ०८छ् विश्वा अप द्विषो जहि .. ११९४
४ ५ १ ०३ ०९अ अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः .
४ ५ १ ०३ ०९छ् योनावृतस्य सीदत .. ११९५

४ ५ १ ०४ ०१अ सोमा असृग्रमिन्दवः सुता ऋतस्य धारया .
४ ५ १ ०४ ०१छ् इन्द्राय मधुमत्तमाः .. ११९६
४ ५ १ ०४ ०२अ अभि विप्रा अनूषत गावो वत्सं न धेनवः .
४ ५ १ ०४ ०२छ् इन्द्रं सोमस्य पीतये .. ११९७
४ ५ १ ०४ ०३अ मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित्.
४ ५ १ ०४ ०३छ् सोमो गौरी अधि श्रितः .. ११९८
४ ५ १ ०४ ०४अ दिवो नाभा विचक्षणोऽव्यो वारे महीयते .
४ ५ १ ०४ ०४छ् सोमो यः सुक्रतुः कविः .. ११९९
४ ५ १ ०४ ०५अ यः सोमः कलशेष्वा अन्तः पवित्र आहितः .

४ ५ १ ०४ ०५छ् तमिन्दुः परि षस्वजे .. १२००
४ ५ १ ०४ ०६अ प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि .
४ ५ १ ०४ ०६छ् जिन्वन्कोशं मधुश्चुतं .. १२०१
४ ५ १ ०४ ०७अ नित्यस्तोत्रो वनस्पतिर्धेनामन्तः सबर्दुघां .
४ ५ १ ०४ ०७छ् हिन्वानो मानुषा युजा .. १२०२
४ ५ १ ०४ ०८अ आ पवमान धारय रयिं सहस्रवर्चसं .
४ ५ १ ०४ ०८छ् अस्मे इन्दो स्वाभुवं .. १२०३
४ ५ १ ०४ ०९अ अभि प्रिया दिवः कविर्विप्रः स धारया सुतः .
४ ५ १ ०४ ०९छ् सोमो हिन्वे परावति .. १२०४

४ ५ १ ०५ ०१अ उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः .
४ ५ १ ०५ ०१छ् वाणस्य चोदया पविं .. १२०५
४ ५ १ ०५ ०२अ प्रसवे त उदीरते तिस्रो वाचो मखस्युवः .
४ ५ १ ०५ ०२छ् यदव्य एषि सानवि .. १२०६
४ ५ १ ०५ ०३अ अव्या वारैः परि प्रियं हरिं हिन्वन्त्यद्रिभिः .
४ ५ १ ०५ ०३छ् पवमानं मधुश्चुतं .. १२०७
४ ५ १ ०५ ०४अ आ पवस्व मदिन्तम पवित्रं धारया कवे .
४ ५ १ ०५ ०४छ् अर्कस्य योनिमासदं .. १२०८
४ ५ १ ०५ ०५अ स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः .
४ ५ १ ०५ ०५छ् एन्द्रस्य जठरं विश .. १२०९

४ ५ १ ०६ ०१अ अया वीती परि स्रव यस्त इन्दो मदेष्वा .
४ ५ १ ०६ ०१छ् अवाहन्नवतीर्नव .. १२१०
४ ५ १ ०६ ०२अ पुरः सद्य इत्थाधिये दिवोदासाय शंबरं .
४ ५ १ ०६ ०२छ् अध त्यं तुर्वशं यदुं .. १२१छ् ल्स्दर्
४ ५ १ ०६ ०३अ परि नो अश्वमश्वविद्गोमदिन्दो हिरण्यवत्.
४ ५ १ ०६ ०३छ् क्षरा सहस्रिणीरिषः .. १२१२

४ ५ १ ०७ ०१अ अपघ्नन्पवते मृधोऽप सोमो अराव्णः .
४ ५ १ ०७ ०१छ् गच्छन्निन्द्रस्य निष्कृतं .. १२१३
४ ५ १ ०७ ०२अ महो नो राय आ भर पवमान जही मृधः .
४ ५ १ ०७ ०२छ् रास्वेन्दो वीरवद्यशः .. १२१४
४ ५ १ ०७ ०३अ न त्वा शतं च न हूतो राधो दित्सन्तमा मिनन्.
४ ५ १ ०७ ०३छ् यत्पुनानो मखस्यसे .. १२१५

४ ५ १ ०८ ०१अ अया पवस्व धारया यया सूर्यमरोचयः .

४ ५ १ ०८ ०१छ् हिन्वानो मानुषीरपः .. १२१६
४ ५ १ ०८ ०२अ अयुक्त सूर एतशं पवमानो मनावधि .
४ ५ १ ०८ ०२छ् अन्तरिक्षेण यातवे .. १२१७
४ ५ १ ०८ ०३अ उत त्या हरितो रथे सूरो अयुक्त यातवे .
४ ५ १ ०८ ०३छ् इन्दुरिन्द्र इति ब्रुवन्.. १२१८

४ ५ १ ०९ ०१अ अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वं .
४ ५ १ ०९ ०१छ् यो मर्त्येषु निधुविरृतावा तपुर्मूर्धा घृतान्नः पावकः .. १२१९
४ ५ १ ०९ ०२अ प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात्.
४ ५ १ ०९ ०२छ् आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति .. १२२०
४ ५ १ ०९ ०३अ उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः .
४ ५ १ ०९ ०३छ् अच्छा द्यामरुषो धूम एषि सं दूतो अग्न ईयसे हि देवान्.. १२२१

४ ५ १ १० ०१अ तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे .
४ ५ १ १० ०१छ् स वृषा वृषभो भुवत्.. १२२२
४ ५ १ १० ०२अ इन्द्रः स दामने कृत ओजिष्ठः स बले हितः .
४ ५ १ १० ०२छ् द्युम्नी श्लोकी स सोम्यः .. १२२३
४ ५ १ १० ०३अ गिरा वज्रो न सम्भृतः सबलो अनपच्युतः .
४ ५ १ १० ०३छ् ववक्ष उग्रो अस्तृतः .. १२२४

४ ५ १ ११ ०१अ अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ नय .
४ ५ १ ११ ०१छ् पुनाहीन्द्राय पातवे .. १२२५
४ ५ १ ११ ०२अ तव त्य इन्दो अन्धसो देवा मधोर्व्याशत .
४ ५ १ ११ ०२छ् पवमानस्य मरुतः .. १२२६
४ ५ १ ११ ०३अ दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे .
४ ५ १ ११ ०३छ् सुनोता मधुमत्तमं .. १२२७

४ ५ १ १२ ०१अ धर्त्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः .
४ ५ १ १२ ०१छ् हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुषे नदीष्वा .. १२२८
४ ५ १ १२ ०२अ शूरो न धत्त आयुधा गभस्त्योः स्वा३ः सिषासन्नथिरो गविष्टिषु .
४ ५ १ १२ ०२छ् इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानो अज्यते मनीषिभिः .. १२२९
४ ५ १ १२ ०३अ इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश .
४ ५ १ १२ ०३छ् प्र नः पिन्व विद्युदभ्रेव रोदसी धिया नो वाजां उप माहि शश्वतः .. १२३०

४ ५ १ १३ ०१अ यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः .
४ ५ १ १३ ०१छ् सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे .. १२३१

४ ५ १ १३ ०२अ यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा .
४ ५ १ १३ ०२छ् कण्वाससस्त्वा स्तोमेभिर्ब्रह्मवाहस इन्द्रा यच्छन्त्या गहि .. १२३२

४ ५ १ १४ ०१अ उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः .
४ ५ १ १४ ०१छ् सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत्.. १२३३
४ ५ १ १४ ०२अ तं हि स्वराजं वृषभं तमोजसा धिषणे निष्टतक्षतुः .
४ ५ १ १४ ०२छ् उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः .. १२३४

४ ५ १ १५ ०१अ पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः .
४ ५ १ १५ ०१छ् वायुमा रोह धर्मणा .. १२३५
४ ५ १ १५ ०२अ पवमान नि तोशसे रयिं सोम श्रवाय्यं .
४ ५ १ १५ ०२छ् इन्दो समुद्रमा विश .. १२३६
४ ५ १ १५ ०३अ अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः .
४ ५ १ १५ ०३छ् नुदस्वादेवयुं जनं .. १२३७

४ ५ १ १६ ०१अ अभी नो वाजसातमं रयिमर्ष शतस्पृहं .
४ ५ १ १६ ०१छ् इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहं .. १२३८
४ ५ १ १६ ०२अ वयं ते अस्य राधसो वसोर्वसो पुरुस्पृहः .
४ ५ १ १६ ०२छ् नि नेदिष्ठतमा इषः स्याम सुम्ने ते आध्रिगो .. १२३९
४ ५ १ १६ ०३अ परि स्य स्वानो अक्षरिदिन्दुरव्ये मदच्युतः .
४ ५ १ १६ ०३छ् धारा य ऊर्ध्वो अध्वरे भ्राजा न याति गव्ययुः .. १२४०
४ ५ १ १६ ०४अ पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम .. १२४१
४ ५ १ १६ ०५अ शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजाभ्यः .. १२४२
४ ५ १ १६ ०६अ दिवो धर्त्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व .. १२४३

४ ५ १ १८ ०१अ प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियं .
४ ५ १ १८ ०१छ् अग्ने रथं न वेद्यं .. १२४४
४ ५ १ १८ ०२अ कविमिव प्रशंस्यं यं देवास इति द्विता .
४ ५ १ १८ ०२छ् नि मर्त्येष्वादधुः .. १२४५
४ ५ १ १८ ०३अ त्वं यविष्ठ दाशुषो न्ऱींपाहि शृणुही गिरः .
४ ५ १ १८ ०३छ् रक्षा तोकमुत त्मना .. १२४६

४ ५ १ १९ ०१अ एन्द्र नो गधि प्रिय सत्राजिदगोह्य .
४ ५ १ १९ ०१छ् गिरिर्न विश्वतः पृथुः पतिर्दिवः .. १२४७
४ ५ १ १९ ०२अ अभि हि सत्य सोमपा उभे बभूथ रोदसी .
४ ५ १ १९ ०२छ् इन्द्रासि सुन्वतो वृधः पतिर्दिवः .. १२४८

४ ५ १ १९ ०३अ त्वं हि शश्वतीनामिन्द्र धर्त्ता पुरामसि .
४ ५ १ १९ ०३छ् हन्ता दस्योर्मनोर्वृधः पतिर्दिवः .. १२४९

४ ५ १ २० ०१अ पुरां भिन्दुर्युवा कविरमितौजा अजायत .
४ ५ १ २० ०१छ् इन्द्रो विश्वस्य कर्मणो धर्त्ता वज्री पुरुष्टुतः .. १२५०
४ ५ १ २० ०२अ त्वं वलस्य गोमतोऽपावरद्रिवो बिलं .
४ ५ १ २० ०२छ् त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः .. १२५१
४ ५ १ २० ०३अ इन्द्रमीशानमोजसाभि स्तोमैरनूषत .
४ ५ १ २० ०३छ् सहस्रं यस्य रातय उत वा सन्ति भूयसीः .. १२५२

पञ्चम प्रपाठकः . द्वितीयोऽर्धः
४ ५ २ ०१ ०१अ अक्रान्त्समुद्रः प्रथमे विधर्मं जनयन्प्रजा भुवनस्य गोपाः .
४ ५ २ ०१ ०१छ् वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः .. १२५३
४ ५ २ ०१ ०२अ मत्सि वायुमिष्टये राधसे च मत्सि मित्रावरुणा पूयमानः .
४ ५ २ ०१ ०२छ् मत्सि शर्धो मारुतं मत्सि देवान्मत्सि द्यावापृथिवी देव सोम .. १२५४
४ ५ २ ०१ ०३अ महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान्.
४ ५ २ ०१ ०३छ् अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः .. १२५५

४ ५ २ ०२ ०१अ एष देवो अमर्त्यः पर्णवीरिव दीयते .
४ ५ २ ०२ ०१छ् अभि द्रोणान्यासदं .. १२५६
४ ५ २ ०२ ०२अ एष विप्रैरभिष्टुतोऽपो देवो वि गाहते .
४ ५ २ ०२ ०२छ् दधद्रत्नानि दाशुषे .. १२५७
४ ५ २ ०२ ०३अ एष विश्वानि वार्या शूरो यन्निव सत्वभिः .
४ ५ २ ०२ ०३छ् पवमानः सिषासति .. १२५८
४ ५ २ ०२ ०४अ एष देवो रथर्यति पवमानो दिशस्यति .
४ ५ २ ०२ ०४छ् आविष्कृणोति वग्वनुं .. १२५९
४ ५ २ ०२ ०५अ एष देवो विपन्युभिः पवमान ऋतायुभिः .
४ ५ २ ०२ ०५छ् हरिर्वाजाय मृज्यते .. १२६०
४ ५ २ ०२ ०६अ एष देवो विपा कृतोऽति ह्वरांसि धावति .
४ ५ २ ०२ ०६छ् पवमानो अदाभ्यः .. १२६१
४ ५ २ ०२ ०७अ एष दिवं वि धावति तिरो रजांसि धारया .
४ ५ २ ०२ ०७छ् पवमानः कनिक्रदत्.. १२६२
४ ५ २ ०२ ०८अ एष दिवं व्यासरत्तिरो रजांस्यस्मृतः .
४ ५ २ ०२ ०८छ् पवमानः स्वध्वरः .. १२६३
४ ५ २ ०२ ०९अ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः .
४ ५ २ ०२ ०९छ् हरिः पवित्रे अर्षति .. १२६४

४ ५ २ ०२ १०अ  एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः .
४ ५ २ ०२ १०छ् धारया पवते सुतः .. १२६५

४ ५ २ ०३ ०१अ  एष धिया यात्यण्व्य शूरो रथेभिराशुभिः .
४ ५ २ ०३ ०१छ् गच्छन्निन्द्रस्य निष्कृतं .. १२६६
४ ५ २ ०३ ०२अ  एष पुरू धियायते बृहते देवतातये .
४ ५ २ ०३ ०२छ् यत्रामृतास आशत .. १२६७
४ ५ २ ०३ ०३अ  एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः .
४ ५ २ ०३ ०३छ् प्रचक्राणं महीरिषः .. १२६८
४ ५ २ ०३ ०४अ  एष हितो वि नीयतेऽन्तः शुन्ध्यावता पथा .
४ ५ २ ०३ ०४छ् यदी तुञ्जन्ति भूर्णयः .. १२६९
४ ५ २ ०३ ०५अ  एष रुक्मिभिरीयते वाजि शुभ्रेभिरंशुभिः .
४ ५ २ ०३ ०५छ् पतिः सिन्धूनां भवन्.. १२७०
४ ५ २ ०३ ०६अ  एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो३ वृषा .
४ ५ २ ०३ ०६छ् नृम्णा दधान ओजसा .. १२७१
४ ५ २ ०३ ०७अ  एष वसूनि पिब्दनः परुषा ययिवां अति .
४ ५ २ ०३ ०७छ् अव शादेषु गच्छति .. १२७२
४ ५ २ ०३ ०८अ  एतमु त्यं दश क्षिपो हरिं हिवन्ति यातवे .
४ ५ २ ०३ ०८छ् स्वायुधं मदिन्तमं .. १२७३

४ ५ २ ०४ ०१अ  एष उ स्य वृषा रथोऽव्या वारेभिरव्यत .
४ ५ २ ०४ ०१छ् गच्छन्वाजं सहस्रिणं .. १२७४
४ ५ २ ०४ ०२अ  एतं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः .
४ ५ २ ०४ ०२छ् इन्दुमिन्द्राय पीतये .. १२७५
४ ५ २ ०४ ०३अ  एष स्य मानुषीष्वा श्येनो न विक्षु सीदति .
४ ५ २ ०४ ०३छ् गच्छं जारो न योषितं .. १२७६
४ ५ २ ०४ ०४अ  एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः .
४ ५ २ ०४ ०४छ् य इन्दुर्वारमाविशत्.. १२७७
४ ५ २ ०४ ०५अ  एष स्य पीतये सुतो हरिरर्षति धर्णसिः .
४ ५ २ ०४ ०५छ् क्रन्दन्योनिमभि प्रियं .. १२७८
४ ५ २ ०४ ०६अ  एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः .
४ ५ २ ०४ ०६छ् याभिर्मदाय शुम्भते .. १२७९

४ ५ २ ०५ ०१अ  एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः .
४ ५ २ ०५ ०१छ् अव्यो वारं वि धावति .. १२८०
४ ५ २ ०५ ०२अ  एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः .

४ ५ २ ०५ ०२छ् विश्वा धामान्याविशन्.. १२८१
४ ५ २ ०६ ०३अ एष देवः शुभायतेऽधि योनावमर्त्यः .
४ ५ २ ०६ ०३छ् वृत्रहा देववीतमः .. १२८२
४ ५ २ ०७ ०४अ एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः .
४ ५ २ ०७ ०४छ् अभि द्रोणानि धावति .. १२८३
४ ५ २ ०८ ०५अ एष सूर्यमरोचयत्पवमानो अधि द्यवि .
४ ५ २ ०८ ०५छ् पवित्रे मत्सरो मदः .. १२८४
४ ५ २ ०९ ०६अ एष सूर्येण हासते संवसानो विवस्वता .
४ ५ २ ०९ ०६छ् पतिर्वाचो अदाभ्यः .. १२८५

४ ५ २ ०६ ०१अ एष कविरभिष्टुतः पवित्रे अधि तोशते .
४ ५ २ ०६ ०१छ् पुनानो घ्नन्नप द्विषः .. १२८६
४ ५ २ ०६ ०२अ एष इन्द्राय वायवे स्वर्जित्परि षिच्यते .
४ ५ २ ०६ ०२छ् पवित्रे दक्षसाधनः .. १२८७
४ ५ २ ०६ ०३अ एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः .
४ ५ २ ०६ ०३छ् सोमो वनेषु विश्ववित्.. १२८८
४ ५ २ ०६ ०४अ एष गव्युरचिक्रदत्पवमानो हिरण्ययुः .
४ ५ २ ०६ ०४छ् इन्दुः सत्राजिदस्तृतः .. १२८९
४ ५ २ ०६ ०५अ एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः .
४ ५ २ ०६ ०५छ् पुनान इन्दुरिन्द्रमा .. १२९०
४ ५ २ ०६ ०६अ एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति .
४ ५ २ ०६ ०६छ् देवावीरघशंसहा .. १२९१

४ ५ २ ०७ ०१अ स सुतः पीतये वृषा सोमः पवित्रे अर्षति .
४ ५ २ ०७ ०१छ् विघ्नन्रक्षांसि देवयुः .. १२९२
४ ५ २ ०७ ०२अ स पवित्रे विचक्षणो हरिरर्षति धर्णसिः .
४ ५ २ ०७ ०२छ् अभि योनिं कनिक्रदत्.. १२९३
४ ५ २ ०७ ०३अ स वाजी रोचना दिवः पवमानो वि धावति .
४ ५ २ ०७ ०३छ् रक्षोहा वारमव्ययं .. १२९४
४ ५ २ ०७ ०४अ स त्रितस्याधि सानवि पवमानो अरोचयत्.
४ ५ २ ०७ ०४छ् जामिभिः सूर्यं सह .. १२९५
४ ५ २ ०७ ०५अ स वृत्रहा वृषा सुतो वरिवोविददाभ्यः .
४ ५ २ ०७ ०५छ् सोमो वाजमिवासरत्.. १२९६
४ ५ २ ०७ ०६अ स देवः कविनेषितो३ऽभि द्रोणानि धावति .
४ ५ २ ०७ ०६छ् इन्दुरिन्द्राय मंहयन्.. १२९७

४ ५ २ ०८ ०१अ यः पावमानीरध्येत्यृषिभिः सम्भृतं रसं .
४ ५ २ ०८ ०१छ् सर्वं स पूतमश्नाति स्वदितं मातरिश्वना .. १२९८
४ ५ २ ०८ ०२अ पावमानीर्यो अध्येत्यृषिभिः सम्भृतं रसं .
४ ५ २ ०८ ०२छ् तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकं .. १२९९
४ ५ २ ०८ ०३अ पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः .
४ ५ २ ०८ ०३छ् ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितं .. १३००
४ ५ २ ०८ ०४अ पावमानीर्दधन्तु न इमं लोकमथो अमुं .
४ ५ २ ०८ ०४छ् कामान्त्समर्धयन्तु नो देवीर्देवैः समाहृताः .. १३०१
४ ५ २ ०८ ०५अ येन देवाः पवित्रेणात्मानं पुनते सदा .
४ ५ २ ०८ ०५छ् तेन सहस्रधारेण पावमानीः पुनन्तु नः .. १३०२
४ ५ २ ०८ ०६अ पावमानीः स्वस्त्ययनीस्ताभिर्गच्छति नान्दनं .
४ ५ २ ०८ ०६छ् पुण्यांश्च भक्षान्भक्षयत्यमृतत्वं च गच्छति .. १३०३

४ ५ २ ०९ ०१अ अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे .
४ ५ २ ०९ ०१छ् चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चं .. १३०४
४ ५ २ ०९ ०२अ स मह्ना विश्वा दुरितानि साह्वानग्ने ष्टवे दम आ जातवेदाः .
४ ५ २ ०९ ०२छ् स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः .. १३०५
४ ५ २ ०९ ०३अ त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः .
४ ५ २ ०९ ०३छ् त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः .. १३०६

४ ५ २ १० ०१अ महां इन्द्रो य ओजसा पर्जन्यो वृष्टिमां इव .
४ ५ २ १० ०१छ् स्तोमैर्वत्सस्य वावृधे .. १३०७
४ ५ २ १० ०१अ कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनं .
४ ५ २ १० ०१छ् जामि ब्रुवत आयुधा .. १३०८
४ ५ २ १० ०१अ प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः .
४ ५ २ १० ०१छ् विप्रा ऋतस्य वाहसा .. १३०९

४ ५ २ ११ ०१अ पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षत .
४ ५ २ ११ ०१छ् जीरा अजिरशोचिषः .. १३१०
४ ५ २ ११ ०२अ पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः .
४ ५ २ ११ ०२छ् हरिश्चन्द्रो मरुद्गणः .. १३११
४ ५ २ ११ ०३अ पवमान्व्यश्नुहि रश्मिभिर्वाजसातमः .
४ ५ २ ११ ०३छ् दधत्स्तोत्रे सुवीर्यं .. १३१२

४ ५ २ १२ ०१अ  परीतो षिञ्चता सुतं सोमो य उत्तमं हविः .
४ ५ २ १२ ०१छ्  दधन्वां यो नर्यो अप्स्वा३न्तरा सुषाव सोममद्रिभिः .. १३१३
४ ५ २ १२ ०२अ  नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिन्तरः .
४ ५ २ १२ ०२छ्  सुते चित्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरं .. १३१४
४ ५ २ १२ ०३अ  परि स्वानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः .. १३१५

४ ५ २ १३ ०१अ  असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत्.
४ ५ २ १३ ०१छ्  पुनानो वारमत्येष्यव्ययं श्येनो न योनिं घृतवन्तमासदत्.. १३१६
४ ५ २ १३ ०२अ  पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे .
४ ५ २ १३ ०२छ्  स्वसार आपो अभि गा उदासरन्त्सं ग्रावभिर्वसते वीते अध्वरे .. १३१७
४ ५ २ १३ ०३अ  कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि .
४ ५ २ १३ ०३छ्  अपसेधन्दुरिता सोम नो मृड घृता वसानः परि यासि निर्णिजं .. १३१८

४ ५ २ १४ ०१अ  श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत .
४ ५ २ १४ ०१छ्  वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिमः .. १३१९
४ ५ २ १४ ०२अ  अलर्षिरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः .
४ ५ २ १४ ०२छ्  यो अस्य कामं विधतो न रोषति मनो दानाय चोदयन्.. १३२०

४ ५ २ १५ ०१अ  यत इन्द्र भयामहे ततो नो अभ्यं कृधि .
४ ५ २ १५ ०१छ्  मघवन्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि .. १३२१
४ ५ २ १५ ०२अ  त्वं हि राधस्पते राधसो महः क्षयस्यासि विध्रत्ता .
४ ५ २ १५ ०२छ्  तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे .. १३२२

४ ५ २ १६ ०१अ  त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे .
४ ५ २ १६ ०१छ्  पवस्व मंहयद्रयिः .. १३२३
४ ५ २ १६ ०२अ  त्वं सुतो मदिन्तमो दधन्वान्मत्सरिन्तमः .
४ ५ २ १६ ०२छ्  इन्दुः सत्राजिदस्तृतः .. १३२४
४ ५ २ १६ ०३अ  त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत्.
४ ५ २ १६ ०३छ्  द्युमन्तं शुष्मा भर .. १३२५

४ ५ २ १७ ०१अ  पवस्व देववीतय इन्दो धाराभिरोजसा .
४ ५ २ १७ ०१छ्  आ कलशं मधुमान्त्सोम नः सदः .. १३२६
४ ५ २ १७ ०२अ  तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः .
४ ५ २ १७ ०२छ्  त्वां देवासो अमृताय कं पपुः .. १३२७
४ ५ २ १७ ०३अ  आ नः सुतास इन्दवः पुनाना धावता रयिं .
४ ५ २ १७ ०३छ्  वृष्टिद्यावो रीत्यापः स्वर्विदः .. १३२८

४ ५ २ १८ ०१अ  परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण .
४ ५ २ १८ ०१छ् यो देवान्विश्वां इत्परि मदेन सह गच्छति .. १३२९
४ ५ २ १८ ०२अ  द्विर्यं पञ्च स्वयशसं सखायो अद्रिसंहतं .
४ ५ २ १८ ०२छ् प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त ऊर्मयः .. १३३०
४ ५ २ १८ ०३अ  इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे .
४ ५ २ १८ ०३छ् नरे च दक्षिणावते वीराय सदनासदे .. १३३१

४ ५ २ १९ ०१अ  पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय .. १३३२
४ ५ २ १९ ०२अ  प्र ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय .. १३३३
४ ५ २ १९ ०३अ  शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुं .. १३३४

४ ५ २ २० ०१अ  उषो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतं .
४ ५ २ २० ०१छ् इन्दुं देवा अयासिषुः .. १३३५
४ ५ २ २० ०२अ  तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव .
४ ५ २ २० ०२छ् य इन्द्रस्य हृदंसनिः .. १३३६
४ ५ २ २० ०३अ  अर्षा नः सोम शं गवे धुक्षस्व पिप्युषीमिषं .
४ ५ २ २० ०३छ् वर्धा समुद्रमुक्थ्यं .. १३३७

४ ५ २ २१ ०१अ  आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक्.
४ ५ २ २१ ०१छ् येषामिन्द्रो युवा सखा .. १३३८
४ ५ २ २१ ०२अ  बृहन्निदिध्म एषां भूरि शस्त्रं पृथुः स्वरुः .
४ ५ २ २१ ०२छ् येषामिन्द्रो युवा सखा .. १३३९
४ ५ २ २१ ०३अ  अयुद्ध इद्युधा वृतं शूर आजति सत्वभिः .
४ ५ २ २१ ०३छ् येषामिन्द्रो युवा सखा .. १३४०

४ ५ २ २२ ०१अ  य एक इद्विदयते वसु मर्त्ताय दाशुषे .
४ ५ २ २२ ०१छ् ईशानो अप्रतिष्कुत इन्द्रो अङ्ग .. १३४१
४ ५ २ २२ ०२अ  यश्चिद्धि त्वा बहुभ्य आ सुतावां आविवासति .
४ ५ २ २२ ०२छ् उग्रं तत्पत्यते शव इन्द्रो अङ्ग .. १३४२
४ ५ २ २२ ०३अ  कदा मर्त्तमराधसं पदा क्षुम्पमिव स्फुरत्.
४ ५ २ २२ ०३छ् कदा नः शुश्रवद्गिर इन्द्रो अङ्ग .. १३४३

४ ५ २ २३ ०१अ  गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः .
४ ५ २ २३ ०१छ् ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे .. १३४४
४ ५ २ २३ ०२अ  यत्सानोः सान्वारुहो भूर्यस्पष्ट कर्त्त्वं .

४ ५ २ २३ ०२छ् तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति .. १३४५
४ ५ २ २३ ०३अ युङ्क्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा .
४ ५ २ २३ ०३छ् अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर .. १३४६

षष्ठ प्रपाठकः . प्रथमोऽर्धः
४ ६ १ ०१ ०१अ सुषमिद्धो न आ वह देवां अग्ने हविष्मते .
४ ६ १ ०१ ०१छ् होतः पावक यक्षि च .. १३४७
४ ६ १ ०१ ०२अ मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे .
४ ६ १ ०१ ०२छ् अद्या कृणुह्यूतये .. १३४८
४ ६ १ ०१ ०३अ नराशंसमिह प्रियमस्मिन्यज्ञ उप ह्वये .
४ ६ १ ०१ ०३छ् मधुजिह्वं हविष्कृतं .. १३४९
४ ६ १ ०१ ०४अ अग्ने सुखतमे रथे देवां ईडित आ वह .
४ ६ १ ०१ ०४छ् असि होता मनुर्हितः .. १३५०

४ ६ १ ०२ ०१अ यदद्य सूर उदितेऽनागा मित्रो अर्यमा .
४ ६ १ ०२ ०१छ् सुवाति सविता भगः .. १३५१
४ ६ १ ०२ ०२अ सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः .
४ ६ १ ०२ ०२छ् ये नो अंहोऽतिपिप्रति .. १३५२
४ ६ १ ०२ ०३अ उत स्वराजो अदितिरदब्धस्य व्रतस्य ये .
४ ६ १ ०२ ०३छ् महो राजान ईशते .. १३५३

४ ६ १ ०३ ०१अ उ त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः .
४ ६ १ ०३ ०१छ् अव ब्रह्मद्विषो जहि .. १३५४
४ ६ १ ०३ ०२अ पदा पणीनराधसो नि बाधस्व महां असि .
४ ६ १ ०३ ०२छ् न हि त्वा कश्च न प्रति .. १३५५
४ ६ १ ०३ ०३अ त्वमीशिषे सुतानामिन्द्र त्वमसुतानां .
४ ६ १ ०३ ०३छ् त्वं राजा जनानां .. १३५६

४ ६ १ ०४ ०१अ आ जागृविर्विप्र ऋतां मतीनां सोमः पुनानो असदच्चमूषु .
४ ६ १ ०४ ०१छ् सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः .. १३५७
४ ६ १ ०४ ०२अ स पुनान उप सूरे दधान ओबे अप्रा रोदसी वि ष आवः .
४ ६ १ ०४ ०२छ् प्रिया चिद्यस्य प्रियसास ऊती सतो धनं कारिणे न प्र यंसत्.. १३५८
४ ६ १ ०४ ०३अ स वर्धिता वर्धनः पूयमानः सोमो मीढ्वां अभि नो ज्योतिषावीत्.
४ ६ १ ०४ ०३छ् यत्र नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमिष्णन्.. १३५९

४ ६ १ ०५ ०१अ मा चिदन्यद्वि शंसत सखायो मा रिषण्यत .

४ ६ १ ०५ ०१छ् इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत .. १३६०
४ ६ १ ०५ ०२अ अवक्रक्षिणं वृषभं यथा जुवं गां न चर्षणीसहं .
४ ६ १ ०५ ०२छ् विद्वेषणं संवननमुभयङ्करं मंहिष्ठमुभयाविनं .. १३६१

४ ६ १ ०६ ०१अ उदु त्ये मधुमत्तमा गिर स्तोमास ईरते .
४ ६ १ ०६ ०१छ् सत्राजितो धनसा अक्षितोतयो वाजन्तो रथा इव .. १३६२
४ ६ १ ०६ ०२अ कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमाशत .
४ ६ १ ०६ ०२छ् इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन्.. १३६३

४ ६ १ ०७ ०१अ पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः .
४ ६ १ ०७ ०१छ् द्विषस्तरध्या ऋणया न ईरसे .. १३६४
४ ६ १ ०७ ०२अ अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः .
४ ६ १ ०७ ०२छ् गोजीरया रंहमानः पुरन्ध्या .. १३६५
४ ६ १ ०७ ०३अ अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये .
४ ६ १ ०७ ०३छ् वाजां अभि पवमान प्र गाहसे .. १३६६

४ ६ १ ०८ ०१अ परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय .. १३६७
४ ६ १ ०८ ०२अ एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः .. १३६८
४ ६ १ ०८ ०३अ इन्द्रस्ते सोम सुतस्य पेयात्क्रत्वे दक्षाय विश्वे च देवाः .. १३६९

४ ६ १ ०९ ०१अ सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुतः साकमीरते .
४ ६ १ ०९ ०१छ् तन्तुं ततं परि सर्गास आशवो नेन्द्रादृते पवते धाम किं चन .. १३७०
४ ६ १ ०९ ०२अ उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासनि .
४ ६ १ ०९ ०२छ् पवमानः सन्तनिः सुन्वतामिव मधुमान्द्रप्सः परि वारमर्षति .. १३७१
४ ६ १ ०९ ०३अ उक्षा मिमेति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतं .
४ ६ १ ०९ ०३छ् अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत .. १३७२

४ ६ १ १० ०१अ अग्निं नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तं .
४ ६ १ १० ०१छ् दूरेदृशं गृहपतिमथव्युं .. १३७३
४ ६ १ १० ०२अ तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित्.
४ ६ १ १० ०२छ् दक्षाय्यो यो दम आस नित्यः .. १३७४
४ ६ १ १० ०३अ प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ .
४ ६ १ १० ०३छ् त्वां शश्वन्त उप यन्ति वाजाः .. १३७५

४ ६ १ ११ ०१अ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः .
४ ६ १ ११ ०१छ् पितरं च प्रयन्त्स्वः .. १३७६

४ ६ १ ११ ०२अ  अन्तश्चरति रोचनास्य प्राणादपानती .
४ ६ १ ११ ०२छ् व्यख्यन्महिषो दिवं .. १३७७
४ ६ १ ११ ०३अ  त्रिंशद्धाम वि राजति वाक्पतङ्गाय धीयते .
४ ६ १ ११ ०३छ् प्रति वस्तोरह द्युभिः .. १३७८

षष्ठ प्रपाठकः .  द्वितीयोऽर्धः
४ ६ २ ०१ ०१अ  उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये .
४ ६ २ ०१ ०१छ् आरे अस्मे च शृण्वते .. १३७९
४ ६ २ ०१ ०२अ  यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु .
४ ६ २ ०१ ०२छ् अरक्षद्दाशुषे गयं .. १३८०
४ ६ २ ०१ ०३अ  स नो वेदो अमात्यमग्नी रक्षतु शन्तमः .
४ ६ २ ०१ ०३छ् उतास्मान्पात्वंहसः .. १३८१
४ ६ २ ०१ ०४अ  उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि .
४ ६ २ ०१ ०४छ् धनञ्जयो रणेरणे .. १३८२

४ ६ २ ०२ ०१अ  अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः .
४ ६ २ ०२ ०१छ् अरं वहन्त्याशवः .. १३८३
४ ६ २ ०२ ०२अ  अच्छा नो याह्या वहाभि प्रयांसि वीतये .
४ ६ २ ०२ ०२छ् आ देवान्त्सोमपीतये .. १३८४
४ ६ २ ०२ ०३अ  उदग्ने भारत द्युमदजस्रेण दविद्युतत्.
४ ६ २ ०२ ०३छ् शोचा वि भाह्यजर .. १३८५

४ ६ २ ०३०१अ  प्र सुन्वानायान्धसो मर्त्तो न वष्ट तद्वचः .
४ ६ २ ०३०१छ् अप श्वानमराधसं हता मखं न भृगवः .. १३८६
४ ६ २ ०३०२अ  आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः .
४ ६ २ ०३०२छ् सरज्ञारो न योषणां वरो न योनिमासदं .. १३८७
४ ६ २ ०३०३अ  स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी .
४ ६ २ ०३०३छ् हरिः पवित्रे अव्यत वेधा न योनिमासदं .. १३८८

४ ६ २ ०४०१अ  अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि .
४ ६ २ ०४०१छ् युधेदापित्वमिच्छसे .. १३८९
४ ६ २ ०४०२अ  न की रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः .
४ ६ २ ०४०२छ् यदा कृणोषि नदनुं समूहस्यादित्पितेव हूयसे .. १३९०

४ ६ २ ०५०१अ  आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये .
४ ६ २ ०५०१छ् ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये .. १३९१

४ ६ २ ०५०२अ  आ त्वा रथे हिरण्यये हरी मयूरशेप्या .
४ ६ २ ०५०२छ् शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये .. १३९२
४ ६ २ ०५०३अ  पिबा त्वा३स्य गिर्वणः सुतस्य पूर्वपा इव .
४ ६ २ ०५०३छ् परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते .. १३९३

४ ६ २ ०६०१अ  आ सोता परि षिञ्चताश्वं न स्तोममप्तुरं रजस्तुरं .
४ ६ २ ०६०१छ् वनप्रक्षमुदप्तुतं .. १३९४
४ ६ २ ०६०२अ  सहस्रधारं वृषभं पयोदुहं प्रियं देवाय जन्मने .
४ ६ २ ०६०२छ् ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत्.. १३९५

४ ६ २ ०७०१अ  अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया .
४ ६ २ ०७०१छ् समिद्धः शुक्र आहुतः .. १३९६
४ ६ २ ०७०२अ  गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे .
४ ६ २ ०७०२छ् सीदन्नृतस्य योनिमा .. १३९७
४ ६ २ ०७०३अ  ब्रह्म प्रजावदा भर जातवेदो विचर्षणे .
४ ६ २ ०७०३छ् अग्ने यद्दीदयद्दिवि .. १३९८

४ ६ २ ०८०१अ  अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसं .
४ ६ २ ०८०१छ् सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमन्ति होता .. १३९९
४ ६ २ ०८०२अ  भद्रा वस्त्रा समन्याऽऽ३ वसानो महान्कविर्विनवचनानि शंसन्.
४ ६ २ ०८०२छ् आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ .. १४००
४ ६ २ ०८०३अ  समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे .
४ ६ २ ०८०३छ् अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः .. १४०१

४ ६ २ ०९०१अ  एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना .
४ ६ २ ०९०१छ् शुद्धैरुक्थैर्वावृध्वांसं शुद्धैराशीर्वान्ममत्तु .. १४०२
४ ६ २ ०९०२अ  इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः .
४ ६ २ ०९०२छ् शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्य .. १४०३
४ ६ २ ०९०३अ  इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे .
४ ६ २ ०९०३छ् शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि .. १४०४

४ ६ २ १००१अ  अग्ने स्तोमं मनामहे सिध्रमद्य दिविस्पृशः .
४ ६ २ १००१छ् देवस्य द्रविणस्यवः .. १४०५
४ ६ २ १००२अ  अग्निर्जुषत नो गिरो होता यो मानुषेष्वा .
४ ६ २ १००२छ् स यक्षद्दैव्यं जनं .. १४०६
४ ६ २ १००३अ  त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः .

४ ६ २ १००३छ् त्वया यज्ञं वि तन्वते .. १४०७

४ ६ २ ११०१अ अभि त्रिपृष्ठं वृषणं वयोधामाङ्गोषिणमवावशंत वाणीः .
४ ६ २ ११०१छ् वना वसानो वरुणो न सिन्धूर्वि रत्नधा दयते वार्याणि .. १४०८
४ ६ २ ११०२अ शूरग्रामः सर्ववीरः सहावान्जेता पवस्व सनिता धनानि .
४ ६ २ ११०२छ् तिग्मायुधः क्षिप्रधन्वा समत्स्वषाढः साह्वान्पृतनासु शतून्.. १४०९
४ ६ २ ११०३अ उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरन्धी .
४ ६ २ ११०३छ् अपः सिषासन्नृषसः स्वा३र्गाः सं चिक्रदो महो अस्मभ्यं वाजान्.. १४१०

४ ६ २ १२०१अ त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः .
४ ६ २ १२०१छ् त्वं वृत्राणि हंस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिः .. १४११
४ ६ २ १२०२अ तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे .
४ ६ २ १२०२छ् महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन्.. १४१२

४ ६ २ १३०१अ यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यं .
४ ६ २ १३०१छ् अस्य यज्ञस्य सुक्रतुं .. १४१३
४ ६ २ १३०२अ अपां नपातं सुभगं सुदीदितमग्निमु श्रेष्ठशोचिषं .
४ ६ २ १३०२छ् स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि .. १४१४

४ ६ २ १४०१अ यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः .
४ ६ २ १४०१छ् स यन्ता शश्वतीरिषः .. १४१५
४ ६ २ १४०२अ न किरस्य सहन्त्य पर्येता कयस्य चित्.
४ ६ २ १४०२छ् वाजो अस्ति श्रवाय्यः .. १४१६
४ ६ २ १४०३अ स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता .
४ ६ २ १४०३छ् विप्रेभिरस्तु सनिता .. १४१७

४ ६ २ १५०१अ साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः .
४ ६ २ १५०१छ् हरिः पर्यद्रवज्ञाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी .. १४१८
४ ६ २ १५०२अ सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः .
४ ६ २ १५०२छ् मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलश उस्रियाभिः .. १४१९
४ ६ २ १५०३अ उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः .
४ ६ २ १५०३छ् मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः .. १४२०

४ ६ २ १६००अ पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः .
४ ६ २ १६००छ् आपिर्नो बोधि सधमाद्ये वृधे३ऽस्मां अवन्तु ते धियः .. १४२१
४ ६ २ १६००अ भूयाम ते सुमतौ वाजिनो वयं मा न स्तरभिमातये .

४ ६ २ १६००छ् अस्मां चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय .. १४२२

४ ६ २ १७०१अ त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि .
४ ६ २ १७०१छ् चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत .. १४२३
४ ६ २ १७०२अ स भक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे .
४ ६ २ १७०२छ् तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः .. १४२४
४ ६ २ १७०३अ ते अस्य सन्तु केतवोऽमृत्यवोऽदाभ्यासो जनुषी उभे अनु .
४ ६ २ १७०३छ् येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत .. १४२५

४ ६ २ १८०१अ अभि वायुं वीत्यर्षा गृणानो३ऽभि मित्रावरुणा पूयमानः .
४ ६ २ १८०१छ् अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुं .. १४२६
४ ६ २ १८०२अ अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः .
४ ६ २ १८०२छ् अभि चन्द्रा भर्त्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम .. १४२७
४ ६ २ १८०३अ अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः .
४ ६ २ १८०३छ् अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः .. १४२८

४ ६ २ १९०१अ यज्ञायथा अपूर्व्य मघवन्वृत्रहत्याय .
४ ६ २ १९०१छ् तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवं .. १४२९
४ ६ २ १९०२अ तत्ते यज्ञो अजायत तदर्क उत हस्कृतिः .
४ ६ २ १९०२छ् तद्विश्वमभिभूरसि यज्ञातं यच्च जन्त्वं .. १४३०
४ ६ २ १९०३अ आमासु पक्वमैरय आ सूर्यं रोहयो दिवि .
४ ६ २ १९०३छ् घर्मं न सामं तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत्.. १४३१

४ ६ २ २००१अ मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः .
४ ६ २ २००१छ् वृषा ते वृष्ण इन्दुर्वाजी सहस्रसातमः .. १४३२
४ ६ २ २००२अ आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः .
४ ६ २ २००२छ् सहावां इन्द्र सानसिः पृतनषाडमर्त्यः .. १४३३
४ ६ २ २००३अ त्वं हि शूरः सनिता चोदयो मनुषो रथं .
४ ६ २ २००३छ् सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा .. १४३४

षष्ठ प्रपाठकः . तृतीयोऽर्धः
४ ६ ३ ०१०१अ पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि .
४ ६ ३ ०१०१छ् अयक्ष्मा बृहतीरिषः .. १४३५
४ ६ ३ ०१०२अ तया पवस्व धारया यया गाव इहागमन्.
४ ६ ३ ०१०२छ् जन्यास उप नो गृहं .. १४३६
४ ६ ३ ०१०३अ घृतं पवस्व धारया यज्ञेषु देववीतमः .

४ ६ ३ ०१०३छ्  अस्मभ्यं वृष्टिमा पव .. १४३७
४ ६ ३ ०१०४अ  स न ऊर्जे व्या३व्ययं पवित्रं धाव धारया .
४ ६ ३ ०१०४छ्  देवासः शृणवन्हि कं .. १४३८
४ ६ ३ ०१०५अ  पवमानो असिष्यदद्रक्षांस्यपजङ्घनत्.
४ ६ ३ ०१०५छ्  प्रन्नवद्रोचयन्नुचः .. १४३९

४ ६ ३ ०२०१अ  प्रत्यस्मै पिपीषते विश्वानि विदुषे भर .
४ ६ ३ ०२०१छ्  अरङ्गमाय जग्मयेऽपश्चादध्वने नरः .. १४४०
४ ६ ३ ०२०२अ  एमेनं प्रत्येतन सोमेभिः सोमपातमं .
४ ६ ३ ०२०२छ्  अमत्रेभिरृजीषिणमिन्द्रं सुतेभिरिन्दुभिः .. १४४१
४ ६ ३ ०२०३अ  यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ .
४ ६ ३ ०२०३छ्  वेदा विश्वस्य मेधिरो धृषत्तन्तमिदेषते .. १४४२
४ ६ ३ ०२०४अ  अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतं .
४ ६ ३ ०२०४छ्  कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्वरत्.. १४४३

४ ६ ३ ०३०१अ  बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे .
४ ६ ३ ०३०१छ्  सोमाय गाथमर्चत .. १४४४
४ ६ ३ ०३०२अ  हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन .
४ ६ ३ ०३०२छ्  मधावा धावता मधु .. १४४५
४ ६ ३ ०३०३अ  नमसेदुप सीदत दध्नेदभि श्रीणीतन .
४ ६ ३ ०३०३छ्  इन्दुमिन्द्रे दधातन .. १४४६
४ ६ ३ ०३०४अ  अमित्रहा विचर्षणिः पवस्व सोम शं गवे .
४ ६ ३ ०३०४छ्  देवेभ्यो अनुकामकृत्.. १४४७
४ ६ ३ ०३०५अ  इन्द्राय सोम पातवे मदाय परि षिच्यसे .
४ ६ ३ ०३०५छ्  मनश्चिन्मनसस्पतिः .. १४४८
४ ६ ३ ०३०६अ  पवमान सुवीर्यं रयिं सोम रिरीहि नः .
४ ६ ३ ०३०६छ्  इन्दविन्द्रेण नो युजा .. १४४९

४ ६ ३ ०४०१अ  उद्धेदभि शुतामघं वृषमं नर्यापसं .
४ ६ ३ ०४०१छ्  अस्तारमेषि सूर्य .. १४५०
४ ६ ३ ०४०२अ  नव यो नवतिं पुरो बिभेद बाह्वोजसा .
४ ६ ३ ०४०२छ्  अहिं च वृत्रहावधीत्.. १४५१
४ ६ ३ ०४०३अ  स न इन्द्रः शिवः सखाश्वावद्गोमद्यवमत्.
४ ६ ३ ०४०३छ्  उरुधारेव दोहते .. १४५२

४ ६ ३ ०५०१अ  विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविहुतं .

४ ६ ३ ०५०१छ् वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति .. १४५३
४ ६ ३ ०५०२अ विभ्राड्बृहत्सुभृतं वाजसातमं धर्मं दिवो धरुणे सत्यमर्पितं .
४ ६ ३ ०५०२छ् अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा .. १४५४
४ ६ ३ ०५०३अ इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत्.
४ ६ ३ ०५०३छ् विश्वभ्राड्भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतं .. १४५५

४ ६ ३ ०६०१अ इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा .
४ ६ ३ ०६०१छ् शिक्षा णो अस्मिन्पुरुहूत यामनि जीव ज्योतिरशीमहि .. १४५६
४ ६ ३ ०६०२अ मा नो अज्ञाता वृजना दुराध्यो३ माशिवासोऽव क्रमुः .
४ ६ ३ ०६०२छ् त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि .. १४५७

४ ६ ३ ०७०१अ अद्याद्या श्वःश्व इन्द्र त्रास्व परे च नः .
४ ६ ३ ०७०१छ् विश्वा च नो जरित्रीन्त्सत्पते अहा दिवा नक्तं च रक्षिषः .. १४५८
४ ६ ३ ०७०२अ प्रभङ्गी शूरो मघवा तुवीमघः सम्मिश्लो विर्याय कं .
४ ६ ३ ०७०२छ् उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः .. १४५९

४ ६ ३ ०८०१अ जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः .
४ ६ ३ ०८०१छ् सरस्वन्तं हवामहे .. १४६०

४ ६ ३ ०९०१अ उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा .
४ ६ ३ ०९०१छ् सरस्वती स्तोम्या भूत्.. १४६१

४ ६ ३ १००१अ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि .
४ ६ ३ १००१छ् धियो यो नः प्रचोदयात्.. १४६२
४ ६ ३ १००२अ सोमानां स्वरणं कृणुहि ब्रह्मणस्पते .
४ ६ ३ १००२अ कक्षीवन्तं य औशिजः .. १४६३
४ ६ ३ १००३अ अग्न आयूंषि पवसे आ सुवोर्जं इषं च नः .
४ ६ ३ १००३अ आरे बाधस्व दुच्छुनां .. १४६४

४ ६ ३ ११०१अ ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य .
४ ६ ३ ११०१छ् महि वा क्षत्रं देवेषु .. १४६५
४ ६ ३ ११०२अ ऋतमृतेन सपन्तेषिरं दक्षमाशाते .
४ ६ ३ ११०२छ् अद्रुहा देवौ वर्धते .. १४६६
४ ६ ३ ११०३अ वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः .
४ ६ ३ ११०३छ् बृहन्तं गर्त्तमाशाते .. १४६७

४ ६ ३ १२०१अ युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः .
४ ६ ३ १२०१छ् रोचन्ते रोचना दिवि .. १४६८
४ ६ ३ १२०२अ युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे .
४ ६ ३ १२०२छ् शोणा धृष्णू नृवाहसा .. १४६९
४ ६ ३ १२०३अ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे .
४ ६ ३ १२०३छ् समुषद्भिरजायथाः .. १४७०

४ ६ ३ १३०१अ अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि .
४ ६ ३ १३०१छ् त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमं .. १४७१
४ ६ ३ १३०२अ स ईं रथो न भुरिषाडयोजि महः पुरूणि सातये वसूनि .
४ ६ ३ १३०२छ् आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त .. १४७२
४ ६ ३ १३०३अ शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट्.
४ ६ ३ १३०३छ् आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः .. १४७३

४ ६ ३ १४०१अ त्वमग्ने यज्ञानां होता विश्वेषां हितः .
४ ६ ३ १४०१छ् देवेभिर्मानुषे जने .. १४७४
४ ६ ३ १४०२अ स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः .
४ ६ ३ १४०२छ् आ देवान्वक्षि यक्षि च .. १४७५
४ ६ ३ १४०३अ वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा .
४ ६ ३ १४०३छ् अग्ने यज्ञेषु सुक्रतो .. १४७६

४ ६ ३ १५०१अ होता देवो अमर्त्यः पुरस्तादेति मायया .
४ ६ ३ १५०१छ् विदथानि प्रचोदयन्.. १४७७
४ ६ ३ १५०२अ वाजी वाजेषु धीयतेऽध्वरेषु प्र णीयते .
४ ६ ३ १५०२छ् विप्रो यज्ञस्य साधनः .. १४७८
४ ६ ३ १५०३अ धिया चक्रे वरेण्यो भूतानां गर्भमा दधे .
४ ६ ३ १५०३छ् दक्षस्य पितरं तना .. १४७९

४ ६ ३ १६०१अ आ सुते सिञ्चत श्रियं रोदस्योरभिश्रियं .
४ ६ ३ १६०१छ् रसा दधीत वृषभं .. १४८०
४ ६ ३ १६०२अ ते जानत स्वमोक्या३ꣳ सं वत्सासो न मातृभिः .
४ ६ ३ १६०२छ् मिथो नसन्त जामिभिः .. १४८१
४ ६ ३ १६०३अ उप स्रक्वेषु बप्सतः कृण्वते धरुणं दिवि .
४ ६ ३ १६०३छ् इन्द्रे अग्रा नमः स्वः .. १४८२

४ ६ ३ १७०१अ तदिदास भुवनेषु ज्येष्ठं यतो जज्ञा उग्रस्त्वेषनृम्णः .

४ ६ ३ १७०१छ् सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः .. १४८३
४ ६ ३ १७०२अ वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति .
४ ६ ३ १७०२छ् अव्यनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु .. १४८४
४ ६ ३ १७०३अ त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः .
४ ६ ३ १७०३छ् स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः .. १४८५

४ ६ ३ १८०१अ त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत्सोममपिबद्विष्णुना सुतं यथावशं .
४ ६ ३ १८०१छ् स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्य इन्दुः सत्यमिन्द्रं .. १४८६
४ ६ ३ १८०२अ साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः .
४ ६ ३ १८०२छ् दाता राध स्तुवते काम्यं वसु प्रचेतन सैनं सश्चद्देवो देवं सत्य इन्दुः सत्यमिन्द्रं .. १४८७
४ ६ ३ १८०३अ अध त्विषीमां अभ्योजसा कृविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे .
४ ६ ३ १८०३छ् अधत्तान्यं जठरे प्रेमरिच्यत प्र चेतय सैनं सश्चद्देवो देवं सत्य इन्दुः सत्यमिन्द्रं .. १४८८

सप्तम प्रपाठकः . प्रथमोऽर्धः
४ ७ १ ०१०१अ अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे .
४ ७ १ ०१०१छ् मूनुं सत्यस्य सत्पतिं .. १४८९
४ ७ १ ०१०२अ आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि .
४ ७ १ ०१०२छ् यत्राभि संनवामहे .. १४९०
४ ७ १ ०१०३अ इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु .
४ ७ १ ०१०३छ् यत्सीमुपह्वरे विदत्.. १४९१

४ ७ १ ०२०१अ आ नो विश्वासु हव्यमिन्द्रं समत्सु भूषत .
४ ७ १ ०२०१छ् उप ब्रह्माणि सवनानि वृत्रहन्परमज्या ऋचीषम .. १४९२
४ ७ १ ०२०२अ त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत्.
४ ७ १ ०२०२छ् तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः .. १४९३

४ ७ १ ०३०१अ प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यं महो गाहद्दिव आ निरधुक्षत .
४ ७ १ ०३०१छ् इन्द्रमभि जायमानं समस्वरन्.. १४९४
४ ७ १ ०३०२अ आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत .
४ ७ १ ०३०२छ् दिवो न वारं सविता व्यूर्णुते .. १४९५
४ ७ १ ०३०३अ अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना .

४ ७ १ ०३०३छ्  यूथे न निष्ठा वृषभो वि राजसि .. १४९६

४ ७ १ ०४०१अ  इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसं .
४ ७ १ ०४०१छ्  अग्ने देवेषु प्र वोचः .. १४९७
४ ७ १ ०४०२अ  विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ .
४ ७ १ ०४०२छ्  सद्यो दाशुषे क्षरसि .. १४९८
४ ७ १ ०४०३अ  आ नो भज परमेष्वा वाजेषु मध्यमेषु .
४ ७ १ ०४०३छ्  शिक्षा वस्वो अन्तमस्य .. १४९९

४ ७ १ ०५०१अ  अहमिद्धि पितुष्परि मेधामृतस्य जग्रह .
४ ७ १ ०५०१छ्  अहं सूर्य इवाजनि .. १५००
४ ७ १ ०५०२अ  अहं प्रत्नेन जन्मना गिरः शुम्भामि कण्ववत्.
४ ७ १ ०५०२छ्  येनेन्द्रः शुष्ममिद्दधे .. १५०१
४ ७ १ ०५०३अ  ये त्वामिन्द्र न तुष्टुवुरृषयो ये च तुष्टुवुः .
४ ७ १ ०५०३छ्  ममेद्वर्धस्व सुष्टुतः .. १५०२

४ ७ १ ०६०१अ  अग्ने विश्वेभिरग्निभिर्जोषि ब्रह्म सहस्कृत .
४ ७ १ ०६०१छ्  ये देवत्रा य आयुषु तेभिर्नो महया गिरः .. १५०३
४ ७ १ ०६०२अ  प्र स विश्वेभिरग्निभिरग्निः स यस्य वाजिनः .
४ ७ १ ०६०२छ्  तनये तोके अस्मदा सम्यङ्वाजैः परीवृतः .. १५०४
४ ७ १ ०६०३अ  त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय .
४ ७ १ ०६०३छ्  त्वं नो देवतातये रायो दानाय चोदय .. १५०५

४ ७ १ ०७०१अ  त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियन्दधुः .
४ ७ १ ०७०१छ्  स त्वं नो वीर वीर्याय चोदय .. १५०६
४ ७ १ ०७०२अ  अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितं .
४ ७ १ ०७०२छ्  शर्याभिर्न भरमाणो गभस्त्योः .. १५०७
४ ७ १ ०७०३अ  अजीजनो अमृत मर्त्याय अमृतस्य धर्मन्नमृतस्य चारुणः .
४ ७ १ ०७०३छ्  सदासरो वाजमच्छा सनिष्यदत्.. १५०८

४ ७ १ ०८०१अ  एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु .
४ ७ १ ०८०१छ्  प्र राधांसि चोदयते महित्वना .. १५०९
४ ७ १ ०८०२अ  उपो हरीणां पतिं राधः पृञ्चन्तमब्रवं .
४ ७ १ ०८०२छ्  नूनं शुधि स्तुवतो अश्व्यस्य .. १५१०
४ ७ १ ०८०३अ  न ह्याङ्ग पुरा च न जज्ञे वीरतरस्त्वत्.
४ ७ १ ०८०३छ्  न की राया नैवथा न भन्दना .. १५११

४ ७ १ ०९०१अ  नदं व ओदतीनां नदं योयुवतीनां .
४ ७ १ ०९०१छ्  पतिं वो अघ्न्यानां धेनूनामिषुध्यसि .. १५१२

४ ७ १ १००१अ  देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचं .
४ ७ १ १००१छ्  उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते .. १५१३
४ ७ १ १००२अ  तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत .
४ ७ १ १००२छ्  दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे .. १५१४

४ ७ १ ११०१अ  अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः .
४ ७ १ ११०१छ्  उपोषु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः .. १५१५
४ ७ १ ११०२अ  यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः .
४ ७ १ ११०२छ्  सहस्रसां मेधसाताविव त्मनाग्निं धीभिर्नमस्यत .. १५१६
४ ७ १ ११०३अ  प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना .
४ ७ १ ११०३छ्  अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि .. १५१७

४ ७ १ १२०१अ  अग्न आयूंषि पवसे आसुवोर्जमिषं च नः .
४ ७ १ १२०१छ्  आरे बाधस्व दुच्छुनां .. १५१८
४ ७ १ १२०२अ  अग्निरृषिः पवमानः पाञ्चजन्यः पुरोहितः .
४ ७ १ १२०२छ्  तमीमहे महागयं .. १५१९
४ ७ १ १२०३अ  अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं .
४ ७ १ १२०३छ्  दधद्रयिं मयि योषं .. १५२०

४ ७ १ १३०१अ  अग्ने पावक रोचिषा मन्द्रया देव जिह्वया .
४ ७ १ १३०१छ्  आ देवान्वक्षि यक्षि च .. १५२१
४ ७ १ १३०२अ  तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशं .
४ ७ १ १३०२छ्  देवां आ वीतये वह .. १५२२
४ ७ १ १३०३अ  वीतिहोत्रं त्वा कवे द्युमन्तं समिधीमहि .
४ ७ १ १३०३छ्  अग्ने बृहन्तमध्वरे .. १५२३

४ ७ १ १४०१अ  अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि .
४ ७ १ १४०१छ्  विश्वासु धीषु वन्द्य .. १५२४
४ ७ १ १४०२अ  आ नो अग्ने रयिं भर सत्रासाहं वरेण्यं .
४ ७ १ १४०२छ्  विश्वासु पृत्सु दुष्टरं .. १५२५
४ ७ १ १४०३अ  आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसं .
४ ७ १ १४०३छ्  मार्डीकं धेहि जीवसे .. १५२६

४ ७ १ १५०१अ  अग्निं हिन्वन्तु नो धियः सप्तिमाशुमिवाजिषु .
४ ७ १ १५०१छ् तेन जेष्म धनंधनं .. १५२७
४ ७ १ १५०२अ  यया गा आकरामहै सेनयाग्ने तवोत्या .
४ ७ १ १५०२छ् तां नो हिन्व मघत्तये .. १५२८
४ ७ १ १५०३अ  आग्ने स्थूरं रयिं भर पृथुं गोमन्तमश्विनं .
४ ७ १ १५०३छ् अङ्धि खं वर्त्तया पविं .. १५२९
४ ७ १ १५०४अ  अग्ने नक्षत्रमजरमा सूर्यं रोहयो दिवि .
४ ७ १ १५०४छ् दधज्ज्योतिर्जनेभ्यः .. १५३०
४ ७ १ १५०५अ  अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत्.
४ ७ १ १५०५छ् बोधा स्तोत्रे वयो दधत्.. १५३१

४ ७ १ १६०१अ  अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं .
४ ७ १ १६०१छ् अपां रेतांसि जिन्वति .. १५३२
४ ७ १ १६०२अ  ईशिषे वार्यस्य हि दात्रस्याग्ने स्वःपतिः .
४ ७ १ १६०२छ् स्तोता स्यां तव शर्मणि .. १५३३
४ ७ १ १६०३अ  उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते .
४ ७ १ १६०३छ् तव ज्योतींष्यर्चयः .. १५३४

सप्तम प्रपाठकः .  द्वितीयोऽर्धः
४ ७ २ ०१०१अ  कस्ते जामिर्जनानामग्ने को दाश्वध्वरः .
४ ७ २ ०१०१छ् को ह कस्मिन्नसि श्रितः .. १५३५
४ ७ २ ०१०२अ  त्वं जामिर्जनानामग्ने मित्रो असि प्रियः .
४ ७ २ ०१०२छ् सखा सखिभ्य ईड्यः .. १५३६
४ ७ २ ०१०३अ  यजा नो मित्रावरुणा यजा देवां ऋतं बृहत्.
४ ७ २ ०१०३छ् अग्ने यक्षि स्वं दमं .. १५३७

४ ७ २ ०२०१अ  ईडेन्यो नमस्यस्तिरस्तमांसि दर्शतः .
४ ७ २ ०२०१छ् समग्निरिध्यते वृषा .. १५३८
४ ७ २ ०२०२अ  वृषो अग्निः समिध्यतेऽश्वो न देववाहनः .
४ ७ २ ०२०२छ् तं हविष्मन्त ईडते .. १५३९
४ ७ २ ०२०३अ  वृषणं त्वा वयं वृषन्वृषणः समिधीमहि .
४ ७ २ ०२०३छ् अग्ने दीद्यतं बृहत्.. १५४०

४ ७ २ ०३०१अ  उत्ते बृहन्तो अर्चयः समिधानस्य दीदिवः .
४ ७ २ ०३०१छ् अग्ने शुक्रास ईरते .. १५४१

४ ७ २ ०३०२अ  उप त्वा जुह्वो३ मम घृताचीर्यन्तु हर्यत .
४ ७ २ ०३०२छ्  अग्ने हव्या जुषस्व नः .. १५४२
४ ७ २ ०३०३अ  मन्द्रं होतारमृत्विजं चित्रभानुं विभावसुं .
४ ७ २ ०३०३छ्  अग्निमीडे स उ श्रवत्.. १५४३

४ ७ २ ०४०१अ  पाहि नो अग्न एकया पाह्यू३त द्वितीयया .
४ ७ २ ०४०१छ्  पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो .. १५४४
४ ७ २ ०४०२अ  पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव .
४ ७ २ ०४०२छ्  त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे .. १५४५

४ ७ २ ०५०१अ  इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमां अदर्शि .
४ ७ २ ०५०१छ्  चिकिद्वि भाति भासा बृहतासिक्नीमेति रुशतीमपाजन्.. १५४६
४ ७ २ ०५०२अ  कृष्णां यदेनीमभि वर्पसाभूञ्जनयन्योषां बृहतः पितुर्जां .
४ ७ २ ०५०२छ्  ऊर्ध्वं भानुं सूर्यस्य स्तभायन्दिवो वसुभिररतिर्वि भाति .. १५४७
४ ७ २ ०५०३अ  भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात्.
४ ७ २ ०५०३छ्  सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्नुशद्भिर्वर्णैरभि राममस्थात्.. १५४८

४ ७ २ ०६०१अ  कया ते अग्ने अङ्गिर ऊर्जो नपादुपस्तुतिं .
४ ७ २ ०६०१छ्  वराय देव मन्यवे .. १५४९
४ ७ २ ०६०२अ  दाशेम कस्य मनसा यज्ञस्य सहसो यहो .
४ ७ २ ०६०२छ्  कदु वोच इदं नमः .. १५५०
४ ७ २ ०६०३अ  अधा त्वं हि नस्करो विश्वा अस्मभ्यं सुक्षितीः .
४ ७ २ ०६०३छ्  वाजद्रविणसो गिरः .. १५५१

४ ७ २ ०७०१अ  अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे .
४ ७ २ ०७०१छ्  आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे .. १५५२
४ ७ २ ०७०२अ  अच्छा हि त्वा सहसः सूनो अङ्गिरः सुचश्चरन्त्यध्वरे .
४ ७ २ ०७०२छ्  ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यं .. १५५३

४ ७ २ ०८०१अ  अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतं .
४ ७ २ ०८०१छ्  अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये .. १५५४
४ ७ २ ०८०२अ  अग्निं सूनुं सहसो जातवेदसं दानाय वार्याणां .
४ ७ २ ०८०२छ्  द्विता यो भूदमृतो मर्त्येष्वा होता मन्द्रतमो विशि .. १५५५

४ ७ २ ०९०१अ  अदाभ्यः पुरएता विशामग्निर्मानुषीणां .
४ ७ २ ०९०१छ्  तूर्णी रथः सदा नवः .. १५५६

४ ७ २ ०९०२अ  अभि प्रयांसि वाहसा दाश्वां अश्नोति मर्त्यः .
४ ७ २ ०९०२छ् क्षयं पावकशोचिषः .. १५५७
४ ७ २ ०९०३अ  साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः .
४ ७ २ ०९०३छ् अग्निस्तुविश्रवस्तमः .. १५५८

४ ७ २ १००१अ  भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः .
४ ७ २ १००१छ् भद्रा उत प्रशस्तयः .. १५५९
४ ७ २ १००२अ  भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहिः .
४ ७ २ १००२छ् अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टये .. १५६०

४ ७ २ ११०१अ  अग्ने वाजस्य गोमत ईशानः सहसो यहो .
४ ७ २ ११०१छ् अस्मे देहि जातवेदो महि श्रवः .. १५६१
४ ७ २ ११०२अ  स इधानो वसुष्कविरग्निरीडेन्यो गिरा .
४ ७ २ ११०२छ् रेवदस्मभ्यं पुर्वणीक दीदिहि .. १५६२
४ ७ २ ११०३अ  क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः .
४ ७ २ ११०३छ् स तिग्मजम्भ रक्षसो दह प्रति .. १५६३

४ ७ २ १२०१अ  विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियं .
४ ७ २ १२०१छ् अग्निं वो दुर्यं वच स्तुषे शूषस्य मन्मभिः .. १५६४
४ ७ २ १२०२अ  यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिं .
४ ७ २ १२०२छ् प्रशंसन्ति प्रशस्तिभिः .. १५६५
४ ७ २ १२०३अ  पन्यांसं जातवेदसं यो देवतात्युद्यता .
४ ७ २ १२०३छ् हव्यान्यैरयद्दिवि .. १५६६

४ ७ २ १३०१अ  समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवं .
४ ७ २ १३०१छ् विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसं .. १५६७
४ ७ २ १३०२अ  त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम्.
४ ७ २ १३०२छ् देवासश्च मर्त्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे .. १५६८
४ ७ २ १३०३अ  विभूषन्नग्न उभयां अनु व्रता दूतो देवानां रजसी समीयसे .
४ ७ २ १३०३छ् यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव .. १५६९

४ ७ २ १४०१अ  उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः .
४ ७ २ १४०१छ् वायोरनीके अस्थिरन्.. १५७०
४ ७ २ १४०२अ  यस्य त्रिधात्ववृतं बर्हिस्तस्थावसन्दिनं .
४ ७ २ १४०२छ् आपश्चिन्नि दधा पदं .. १५७१
४ ७ २ १४०३अ  पदं देवस्य मीढुषोऽनाधृष्टाभिरूतिभिः .

४ ७ २ १४०३छ् भद्रा सूर्य इवोपदृक्.. १५७२

सप्तम प्रपाठकः . तृतीयोऽर्धः
४ ७ ३ ०१०१अ अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः .
४ ७ ३ ०१०१छ् समीचीनास ऋभवः समस्वरन्नुद्रा गृणन्त पूर्व्यं .. १५७३
४ ७ ३ ०१०२अ अस्येदिन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि .
४ ७ ३ ०१०२छ् अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा .. १५७४

४ ७ ३ ०२०१अ प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः .
४ ७ ३ ०२०१छ् इन्द्राग्नी इष आ वृणे .. १५७५
४ ७ ३ ०२०२अ इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतं .
४ ७ ३ ०२०२छ् साकमेकेन कर्मणा .. १५७६
४ ७ ३ ०२०३अ इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः .
४ ७ ३ ०२०३छ् ऋतस्य पथ्याऽऽ३ अनु .. १५७७
४ ७ ३ ०२०४अ इन्द्राग्नी तविषाणी वां सधस्थानि प्रयांसि च .
४ ७ ३ ०२०४छ् युवोरप्तूर्यं हितं .. १५७८

४ ७ ३ ०३०१अ शग्ध्यू३ षु शचीपत इन्द्र विश्वाभिरूतिभिः .
४ ७ ३ ०३०१छ् भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि .. १५७९
४ ७ ३ ०३०२अ पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः .
४ ७ ३ ०३०२छ् न किर्हि दानं परि मर्धिषत्वे यद्यद्यामि तदा भर .. १५८०

४ ७ ३ ०४०१अ त्वं ह्योहि चेरवे विदा भगं वसुत्तये .
४ ७ ३ ०४०१छ् उद्गावृषस्व मधवन्गविष्टय उदिन्द्राश्वमिष्टये .. १५८१
४ ७ ३ ०४०२अ त्वं पुरू सहस्राणि शतानि च यूथा दानाय मंहसे .
४ ७ ३ ०४०२छ् आ पुरन्दरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे .. १५८२

४ ७ ३ ०५०१अ यो विश्वा दयते वसु होता मन्द्रो जनानां .
४ ७ ३ ०५०१छ् मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये .. १५८३
४ ७ ३ ०५०२अ अश्व न गीर्भी रथ्यं सुदानवो मर्मृज्यन्ते देवयवः .
४ ७ ३ ०५०२छ् उभे तोके तनये दस्म विस्पते पर्षि राधो मघोनां .. १५८४

४ ७ ३ ०६०१अ इमं मे वरुण श्रुधी हवमद्या च मृडय .
४ ७ ३ ०६०१छ् त्वामवस्युरा चके .. १५८५

४ ७ ३ ०७०१अ कया त्वं न ऊत्याभि प्र मन्दसे वृषन्.

४ ७ ३ ०७०१छ् कया स्तोतृभ्य आ भर .. १५८६

४ ७ ३ ०८०१अ इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे .
४ ७ ३ ०८०१छ् इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये .. १५८७
४ ७ ३ ०८०२अ इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत्.
४ ७ ३ ०८०२छ् इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः .. १५८८

४ ७ ३ ०९०१अ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व तन्वा३ं स्वा हि ते .
४ ७ ३ ०९०१छ् मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु .. १५८९

४ ७ ३ १००१अ अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति सयुग्वभिः सूरो न सयुग्वभिः .
४ ७ ३ १००१छ् धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः .
४ ७ ३ १००१ए विश्वा यदूपा परियास्यृक्वभिः सप्तास्येभिरृक्वभिः .. १५९०
४ ७ ३ १००२अ प्राचीमनु प्रदिशं पाति चेकितत्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः .
४ ७ ३ १००२छ् अग्मन्नुक्थानि प्उँस्येन्द्रं जैत्राय हर्षयत .
४ ७ ३ १००२ए वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता .. १५९१
४ ७ ३ १००३अ त्वं ह त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे
.
४ ७ ३ १००३छ् परावतो न साम तद्यत्रा रणन्ति धीतयः .
४ ७ ३ १००३ए त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे . १५९२

४ ७ ३ ११०१अ उत नो गोषणिं धियमश्वसां वाजसामुत .
४ ७ ३ ११०१छ् नृवत्कृणुह्यूतये .. १५९३

४ ७ ३ १२०१अ शशमानस्य वा नरः स्वेदस्य सत्यशवसः .
४ ७ ३ १२०१छ् विदा कामस्य वेनतः .. १५९४

४ ७ ३ १३०१अ उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये .
४ ७ ३ १३०१छ् सुमृडीका भवन्तु नः .. १५९५

४ ७ ३ १४०१अ प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे .
४ ७ ३ १४०१छ् शुची उप प्रशस्तये .. १५९६
४ ७ ३ १४०२अ पुनाने तन्वा मिथः स्वेन दक्षेण राजथः .
४ ७ ३ १४०२छ् ऊह्याथे सनादृतं .. १५९७
४ ७ ३ १४०३अ मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतं .
४ ७ ३ १४०३छ् परि यज्ञं नि षेदथुः .. १५९८

४ ७ ३ १५०१अ  अयमु ते समतसि कपोत इव गर्भधिं .
४ ७ ३ १५०१छ् वचस्तच्चिन्न ओहसे .. १५९९
४ ७ ३ १५०२अ  स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते .
४ ७ ३ १५०२छ् विभूतिरस्तु सूनृता .. १६००
४ ७ ३ १५०३अ  ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो .
४ ७ ३ १५०३छ् समन्येषु ब्रवावहै .. १६०१

४ ७ ३ १६०१अ  गाव उप वदावटे महि यज्ञस्य रप्सुदा .
४ ७ ३ १६०१छ् उभा कर्णा हिरण्यया .. १६०२
४ ७ ३ १६०२अ  अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु .
४ ७ ३ १६०२छ् अवटस्य विसर्जने .. १६०३
४ ७ ३ १६०३अ  सिञ्चन्ति नमसावटमुच्चाचक्रं परिज्मानं .
४ ७ ३ १६०३छ् नीचीनबारमक्षितं .. १६०४

४ ७ ३ १७०१अ  मा भेम मा श्रमिष्मोग्रस्य सख्ये तव .
४ ७ ३ १७०१छ् महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुं .. १६०५
४ ७ ३ १७०२अ  सव्यामनु स्फिग्यं वावसे वृष्ना न दानो अस्य रोषति .
४ ७ ३ १७०२छ् मध्वा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब .. १६०६

४ ७ ३ १८०१अ  इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम .
४ ७ ३ १८०१छ् पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत .. १६०७
४ ७ ३ १८०२अ  अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे .
४ ७ ३ १८०२छ् सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये .. १६०८

४ ७ ३ १९०१अ  यस्यायं विश्व आर्यो दासः शेवधिपा अरिः .
४ ७ ३ १९०१छ् तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः .. १६०९
४ ७ ३ १९०२अ  तुरण्यवो मधुमन्तं घृतश्चतं विप्रासो अर्कमानृचुः .
४ ७ ३ १९०२छ् अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे स्वानास इन्दवः .. १६१०

४ ७ ३ २००१अ  गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव .
४ ७ ३ २००१छ् शुचिं च वर्णमधि गोषु धार्य .. १६११
४ ७ ३ २००२अ  स नो हरीणां पत इन्दो देवप्सरस्तमः .
४ ७ ३ २००२छ् सखेव सख्ये नर्यो रुचे भव .. १६१२
४ ७ ३ २००३अ  सनेमि त्वमस्मदा अदेवं कं चिदत्रिणं .
४ ७ ३ २००३छ् साह्वां इन्दो परि बाधो अप द्वयुं .. १६१३

४ ७ ३ २१०१अ अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मध्वाभ्यञ्जते .
४ ७ ३ २१०१छ् सिन्धोरुऽच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमप्सु गृभ्णते .. १६१४
४ ७ ३ २१०२अ विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति .
४ ७ ३ २१०२छ् अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीडन्नसरद्वृषा हरिः .. १६१५
४ ७ ३ २१०३अ अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः .
४ ७ ३ २१०३छ् हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः .. १६१६

आष्टम प्रपाठकः . प्रथमोऽर्धः
४ ८ १ ०१०१अ विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः .
४ ८ १ ०१०१छ् चनो धाः सहसा यहो .. १६१७
४ ८ १ ०१०२अ यच्चिद्धि शश्वा तना देवंदेवं यजामहे .
४ ८ १ ०१०२छ् त्वे इद्धूयते हविः .. १६१८
४ ८ १ ०१०३अ प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः .
४ ८ १ ०१०३छ् प्रियाः स्वग्नयो वयं .. १६१९

४ ८ १ ०२०१अ इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः .
४ ८ १ ०२०१छ् अस्माकमस्तु केवलः .. १६२०
४ ८ १ ०२०२अ स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि .
४ ८ १ ०२०२छ् अस्मभ्यमप्रतिष्कुतः .. १६२१
४ ८ १ ०२०३अ बृषा यूथेव वंसगः कृष्टीरियर्त्योजसा .
४ ८ १ ०२०३छ् ईशानो अप्रतिष्कुतः .. १६२२

४ ८ १ ०३०१अ त्वं नश्चित्र ऊत्या वसो राधांसि चोदय .
४ ८ १ ०३०१छ् अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः .. १६२३
४ ८ १ ०३०२अ पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः .
४ ८ १ ०३०२छ् अग्ने हेडांसि दैव्या युयोधि नोऽदेवानि हरांसि च .. १६२४

४ ८ १ ०४०१अ किमित्ते विष्णो परिचक्षि नाम प्र यद्ववक्षे शिपिविष्टो अस्मि .
४ ८ १ ०४०१छ् मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ .. १६२५
४ ८ १ ०४०२अ प्र तत्ते अद्य शिपिविष्ट हव्यमर्यः शंसामि वयुनानि विद्वान्.
४ ८ १ ०४०२छ् तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके .. १६२६
४ ८ १ ०४०३अ वषट्ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यं .
४ ८ १ ०४०३छ् वर्धन्तु त्वा सुष्टुतयो गिरि मे यूयं पात स्वस्तभिः सदा नः .. १६२७

४ ८ १ ०५०१अ वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु .

४ ८ १ ०५०१छ् आ याहि सोमपीतये स्पार्हो देव नियुत्वता .. १६२८
४ ८ १ ०५०२अ इन्द्रश्च वायवेषां सोमानां पीतिमर्हथः .
४ ८ १ ०५०२छ् युवां हि यन्तीन्दवो निम्नमापो न सध्र्यक्.. १६२९
४ ८ १ ०५०३अ वायविन्द्रश्च शुष्मिणा सरथं शवसस्पती .
४ ८ १ ०५०३छ् नियुत्वन्ता न ऊतय आ यातं सोमपीतये .. १६३०

४ ८ १ ०६०१अ अध क्षपा परिष्कृतो वाजां अभि प्र गाहते .
४ ८ १ ०६०१छ् यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे .. १६३१
४ ८ १ ०६०२अ तमस्य मर्जयामसि मदो य इन्द्रपातमः .
४ ८ १ ०६०२छ् यं गाव आसभिर्दधुः पुरा नूनं च सूरयः .. १६३२
४ ८ १ ०६०३अ तं गाथया पुराण्या पुनानमभ्यनूषत .
४ ८ १ ०६०३छ् उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः .. १६३३

४ ८ १ ०७०१अ अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः .
४ ८ १ ०७०१छ् सम्राजन्तमध्वराणां .. १६३४
४ ८ १ ०७०२अ स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः .
४ ८ १ ०७०२छ् मीढ्वां अस्माकं बभूयात्.. १६३५
४ ८ १ ०७०३अ स नो दूराच्चासाच्च नि मर्त्यादघायोः .
४ ८ १ ०७०३छ् पाहि सदमिद्विश्वायुः .. १६३६

४ ८ १ ०८०१अ त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः .
४ ८ १ ०८०१छ् अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः .. १६३७
४ ८ १ ०८०२अ अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा .
४ ८ १ ०८०२छ् विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि .. १६३८

४ ८ १ ०९०१अ यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत्.
४ ८ १ ०९०१छ् चक्राण ओपशं दिवि .. १६३९
४ ८ १ ०९०२अ व्या३न्तरिक्षमतिरन्मदे सोमस्य रोचना .
४ ८ १ ०९०२छ् इन्द्रो यदभिनद्बलं .. १६४०
४ ८ १ ०९०३अ उदगा आजदङ्गिरोभ्य आविष्कृण्वन्गुहा सतीः .
४ ८ १ ०९०३छ् अर्वाञ्चं नुनुदे वलं .. १६४१

४ ८ १ १००१अ त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतं .
४ ८ १ १००१छ् आ च्यावयस्यूतये .. १६४२
४ ८ १ १००२अ युध्मं सन्तमनर्वाणं सोमपामनपच्युतं .
४ ८ १ १००२छ् नरमवार्यक्रतुं .. १६४३

४ ८ १ १००३अ शिक्षा ण इन्द्र राय आ पुरु विद्वां ऋचीषम .
४ ८ १ १००३छ् अवा नः पार्ये धने .. १६४४

४ ८ १ ११०१अ तव त्यदिन्द्रियं बृहत्तव दक्ष्ममुत क्रतुं .
४ ८ १ ११०१छ् वज्रं शिशाति धिषणा वरेण्यं .. १६४५
४ ८ १ ११०२अ तव द्यौरिन्द्र प्ऽॅस्यं पृथिवी वर्धति श्रवः .
४ ८ १ ११०२छ् त्वामापः पर्वतासश्च हिन्विरे .. १६४६
४ ८ १ ११०३अ त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः .
४ ८ १ ११०३छ् त्वां शर्धो मदत्यनु मारुतं .. १६४७

४ ८ १ १२०१अ नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः .
४ ८ १ १२०१छ् अमैरमित्रमर्दय .. १६४८
४ ८ १ १२०२अ कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिं .
४ ८ १ १२०२छ् उरुकृदुरु णस्कृधि .. १६४९
४ ८ १ १२०३अ मा नो अग्ने महाधने परा वर्ग्भारभृद्यथा .
४ ८ १ १२०३छ् संवर्गं सं रयिं जय .. १६५०

४ ८ १ १३०१अ समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः .
४ ८ १ १३०१छ् समुद्रायेव सिन्धवः .. १६५१
४ ८ १ १३०२अ वि चिद्वृत्रस्य दोधतः शिरो बिभेद वृष्णिना .
४ ८ १ १३०२छ् वज्रेण शतपर्वणा .. १६५२
४ ८ १ १३०३अ ओजस्तदस्य तित्विष उभे यत्समवर्त्तयत्.
४ ८ १ १३०३छ् इन्द्रश्चर्मेव रोदसी .. १६५३

४ ८ १ १४०१अ सुमन्मा वस्वी रन्ती सूनरी .. १६५४
४ ८ १ १४०२अ सरूप वृषन्ना गहीमौ भद्रौ धुर्यावभि .
४ ८ १ १४०२छ् ताविमा उप सर्पतः .. १६५५
४ ८ १ १४०३अ नीव शीर्षाणि मृढ्वं मध्य आपस्य तिष्ठति .
४ ८ १ १४०३छ् शृङ्गेभिर्दशभिर्दिशन्.. १६५६

आष्टम प्रपाठकः . द्वितीयोऽर्धः
४ ८ २ ०१०१अ पन्यंपन्यमित्सोतार आ धावत मद्याय .
४ ८ २ ०१०१छ् सोमं वीराय शूराय .. १६५७
४ ८ २ ०१०२अ एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायं .
४ ८ २ ०१०२छ् इन्द्रं गीर्भिर्गिर्वणसं .. १६५८
४ ८ २ ०१०३अ पाता वृत्रहा सुतमा घा गमन्नारे अस्मत्.

४ ८ २ ०१०३छ् नि यमते शतमूतिः .. १६५९

४ ८ २ ०२०१अ  आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः .
४ ८ २ ०२०१छ् न त्वामिन्द्राति रिच्यते .. १६६०
४ ८ २ ०२०२अ  विव्यक्थ महिना वृषन्भक्षं सोमस्य जागृवे .
४ ८ २ ०२०२छ् य इन्द्र जठरेषु ते .. १६६१
४ ८ २ ०२०३अ  अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन्.
४ ८ २ ०२०३छ् अरं धामभ्य इन्दवः .. १६६२

४ ८ २ ०३०१अ  जराबोध तद्विविड्ढि विशेविशे यज्ञियाय .
४ ८ २ ०३०१छ् स्तोमं रुद्राय दृशीकं .. १६६३
४ ८ २ ०३०२अ  स नो महां अनिमानो धूमकेतुः पुरुश्चन्द्रः .
४ ८ २ ०३०२छ् धिये वाजाय हिन्वतु .. १६६४
४ ८ २ ०३०३अ  स रेवां इव विश्पतिर्दैव्यः केतुः शृणोतु नः .
४ ८ २ ०३०३छ् उक्थैरग्निर्बृहद्भानुः .. १६६५

४ ८ २ ०४०१अ  तद्वो गाय सुते सचा पुरुहूताय सत्वने .
४ ८ २ ०४०१छ् शं यद्गवे न शाकिने .. १६६६
४ ८ २ ०४०२अ  न घा वसुर्नि यमते दानं वाजस्य गोमतः .
४ ८ २ ०४०२छ् यत्सीमुपश्रवद्गिरः .. १६६७
४ ८ २ ०४०३अ  कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत्.
४ ८ २ ०४०३छ् शचीभिरप नो वरत्.. १६६८

४ ८ २ ०५०१अ  इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदं .
४ ८ २ ०५०१छ् समूढमस्य पांसुले .. १६६९
४ ८ २ ०५०२अ  त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः .
४ ८ २ ०५०२छ् अतो धर्माणि धारयन्.. १६७०
४ ८ २ ०५०३अ  विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे .
४ ८ २ ०५०३छ् इन्द्रस्य युज्यः सखा .. १६७१
४ ८ २ ०५०४अ  तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः .
४ ८ २ ०५०४छ् दिवीव चक्षुराततं .. १६७२
४ ८ २ ०५०५अ  तद्विप्रासो विपन्युवो जागृवांसः समिन्धते .
४ ८ २ ०५०५छ् विष्णोर्यत्परमं पदं .. १६७३
४ ८ २ ०५०६अ  अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे .
४ ८ २ ०५०६छ् पृथिव्या अधि सानवि .. १६७४

४ ८ २ ०६०१अ  मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन्.
४ ८ २ ०६०१छ् आरात्ताद्व सधमादं न आ गहीह वा सन्नुप शुधि .. १६७५
४ ८ २ ०६०२अ  इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते .
४ ८ २ ०६०२छ् इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः .. १६७६

४ ८ २ ०७०१अ  अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत .
४ ८ २ ०७०१छ् पूर्वीरृतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत .. १६७७
४ ८ २ ०७०२अ  समिन्द्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यं .
४ ८ २ ०७०२छ् सं शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः .. १६७८

४ ८ २ ०८०१अ  इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे .
४ ८ २ ०८०२छ् नरे च दक्षिणावते देवाय सदनासदे .. १६७९
४ ८ २ ०८०२अ  तं सखायः पुरूरुचं यूयं वयं च सूरयः .
४ ८ २ ०८०२छ् अश्याम वाजगन्ध्यं सनेम वाजपस्त्यं .. १६८०
४ ८ २ ०८०३अ  परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण .
४ ८ २ ०८०३छ् यो देवान्विश्वां इत्परि मदेन सह गच्छति .. १६८१

४ ८ २ ०९०१अ  कस्तमिन्द्र त्वावसो मर्त्यो दधर्षति .
४ ८ २ ०९०१छ् श्रद्धा इत्तेमघवन्पार्ये दिवि वाजी वाजं सिषासति .. १६८२
४ ८ २ ०९०२अ  मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु .
४ ८ २ ०९०२छ् तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता .. १६८३

४ ८ २ १००१अ  एदु मधोर्मदिन्तरं सिञ्चाध्वर्यो अन्धसः .
४ ८ २ १००१छ् एवा हि वीर स्तवते सदावृधः .. १६८४
४ ८ २ १००२अ  इन्द्र स्थातर्हरीणां न किष्टे पूर्व्यस्तुतिं .
४ ८ २ १००२छ् उदानंश शवसा न भन्दना .. १६८५
४ ८ २ १००३अ  तं वो वाजानां पतिमहूमहि श्रवस्यवः .
४ ८ २ १००३छ् अप्रायुभिर्ज्येभिर्वावृधेन्यं .. १६८६

४ ८ २ ११०१अ  तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे .
४ ८ २ ११०१छ् देवत्रा हव्यमूहिषे .. १६८७
४ ८ २ ११०२अ  विभूतरातिं विप्र चित्रशोचिषमग्निमीडिष्व यन्तुरं .
४ ८ २ ११०२छ् अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यं .. १६८८

४ ८ २ १२०१अ  आ सोम सवानो अद्रिभिस्तिरो वाराण्यव्यया .
४ ८ २ १२०१छ् जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे .. १६८९

४ ८ २ १२०२अ स मामृजे तिरो अण्वानि मेष्यो मीड्वान्त्सप्तिर्न वाजयुः .
४ ८ २ १२०२छ् अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिरृक्वभिः .. १६९०

४ ८ २ १३०१अ वयमेनमिदा ह्योऽपीपेमेह वज्रिणं .
४ ८ २ १३०१छ् तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते .. १६९१
४ ८ २ १३०२अ वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति .
४ ८ २ १३०२छ् सेमं न स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया धिया .. १६९२

४ ८ २ १४०१अ इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः .
४ ८ २ १४०१छ् तद्वां चेति प्र वीर्यं .. १६९३
४ ८ २ १४०२अ इन्द्राग्नी अपसस्परि उप प्र यन्ति धीतयः .
४ ८ २ १४०२छ् ऋतस्य पथ्या अनु .. १६९४
४ ८ २ १४०३अ इन्द्राग्नी तविषाणि वां सधस्थानि प्रयांसि च .
४ ८ २ १४०३छ् युवोरप्तूर्यं हितं .. १६९५

४ ८ २ १५०१अ क ईं वेद सुते सचा पिबन्तं कद्वयो दधे .
४ ८ २ १५०१छ् अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्रयन्धसः .. १६९६
४ ८ २ १५०२अ दाना मृगो न वारणः पुरुत्रा चरथं दधे .
४ ८ २ १५०२छ् न किष्ट्वा नि यमदा सुते गमो महांश्चरस्योजसा .. १६९७
४ ८ २ १५०३अ य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः .
४ ८ २ १५०३छ् यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत्.. १६९८

४ ८ २ १६०१अ पवमाना असृक्षत सोमाः शुक्रास इन्दवः .
४ ८ २ १६०१छ् अभि विश्वानि काव्या .. १६९९
४ ८ २ १६०२अ पवमाना दिवस्पर्यन्तरिक्षादसृक्षत .
४ ८ २ १६०२छ् पृथिव्या अधि सानवि .. १७००
४ ८ २ १६०३अ पवमानास आशवः शुभ्रा असृग्रमिन्दवः .
४ ८ २ १६०३छ् घ्नन्तो विश्वा अप द्विषः .. १७०१

४ ८ २ १७०१अ तोशा वृत्रहणा हुवे सजित्वानापराजिता .
४ ८ २ १७०१छ् इन्द्राग्नी वाजसातमा .. १७०२
४ ८ २ १७०२अ प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः .
४ ८ २ १७०२छ् इन्द्राग्नी इष आ वृणे .. १७०३
४ ८ २ १७०३अ इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतं .
४ ८ २ १७०३छ् साकमेकेन कर्मणा .. १७०४

४ ८ २ १८०१अ  उप त्वा रण्वसन्दृशं प्रयस्वन्तः सहस्कृत .
४ ८ २ १८०१छ् अग्ने ससृज्महे गिरः .. १७०५
४ ८ २ १८०२अ  उप च्छायामिव घृणेरगन्म शर्म ते वयं .
४ ८ २ १८०२छ् अग्ने हिरण्यसन्दृशः .. १७०६
४ ८ २ १८०३अ  य उग्र इव शर्यहा तिग्मशृङ्गो न वंसगः .
४ ८ २ १८०३छ् अग्ने पुरो रुरोजिथ .. १७०७

४ ८ २ १९०१अ  ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिं .
४ ८ २ १९०१छ् अजस्रं घर्ममीमहे .. १७०८
४ ८ २ १९०२अ  य इदं प्रतिपप्रथे यज्ञस्य स्वरुत्तिरन्.
४ ८ २ १९०२छ् ऋतूनुत्सृजते वशी .. १७०९
४ ८ २ १९०३अ  अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य .
४ ८ २ १९०३छ् सभ्राडेको वि राजति .. १७१०

आष्टम प्रपाठकः .  तृतीयोऽर्धः
४ ८ ३ ०१०१अ  अग्निः प्रत्नेन जन्मना शुम्भानस्तन्वा३ं स्वां .
४ ८ ३ ०१०१छ् कविर्विप्रेण ववृधे .. १७११
४ ८ ३ ०१०२अ  ऊर्ज्जो नपातमा हुवेऽग्निं पावकशोचिषं .
४ ८ ३ ०१०२छ् अस्मिन्यज्ञे स्वध्वरे .. १७१२
४ ८ ३ ०१०३अ  स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा .
४ ८ ३ ०१०३छ् देवैरा सत्सि बर्हिषि .. १७१३

४ ८ ३ ०२०१अ  उत्ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः .
४ ८ ३ ०२०१छ् नुदस्व याः परिस्पृधः .. १७१४
४ ८ ३ ०२०२अ  अया निजघ्निरोजसा रथसङ्गे धने हिते .
४ ८ ३ ०२०२छ् स्तवा अबिभ्युषा हृदा .. १७१५
४ ८ ३ ०२०३अ  अस्य व्रतानि नाधृषे पवमानस्य दूढ्या .
४ ८ ३ ०२०३छ् रुज यस्त्वा पृतन्यति .. १७१६
४ ८ ३ ०२०४अ  तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनं .
४ ८ ३ ०२०४छ् इन्दुमिन्द्राय मत्सरं .. १७१७

४ ८ ३ ०३०१अ  आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः .
४ ८ ३ ०३०१छ् मा त्वा के चिन्नि येमुरिन्न पाशिनोऽति धन्वेव तां इहि .. १७१८
४ ८ ३ ०३०२अ  वृत्रखादो वलं रुजः पुरां दर्मो अपामजः .
४ ८ ३ ०३०२छ् स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृढा चिदारुजः .. १७१९
४ ८ ३ ०३०३अ  गम्भीरां उदधींरिव क्रतुं पुष्यसि गा इव .

४ ८ ३ ०३०३छ् प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत .. १७२०

४ ८ ३ ०४०१अ यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणं .
४ ८ ३ ०४०१छ् आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब .. १७२१
४ ८ ३ ०४०२अ मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते .
४ ८ ३ ०४०२छ् आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः .. १७२२

४ ८ ३ ०५०१अ त्वमङ्ग प्र शुंसिषो देवः शविष्ठ मर्त्यं .
४ ८ ३ ०५०१छ् न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः .. १७२३
४ ८ ३ ०५०२अ मा ते राधांसि मा त ऊतयो वसोऽस्मान्कदा चना दभन्.
४ ८ ३ ०५०२छ् विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ .. १७२४

४ ८ ३ ०६०१अ प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः .
४ ८ ३ ०६०१छ् दिवो अदर्शि दुहिता .. १७२५
४ ८ ३ ०६०२अ अश्वेव चित्रारुषी माता गवामृतावरी .
४ ८ ३ ०६०२छ् सखा भूदश्विनोरुषाः .. १७२६
४ ८ ३ ०६०३अ उत सखास्यश्विनोरुत माता गवामसि .
४ ८ ३ ०६०३छ् उतोषो वस्व ईशिषे .. १७२७

४ ८ ३ ०७०१अ एषो उषा अपूर्व्य व्युच्छति प्रिया दिवः .
४ ८ ३ ०७०१छ् स्तुषे वामश्विना बृहत्.. १७२८
४ ८ ३ ०७०२अ या दस्रा सिन्धुमातरा मनोतरा रयीणां .
४ ८ ३ ०७०२छ् धिया देवा वसुविदा .. १७२९
४ ८ ३ ०७०३अ वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि .
४ ८ ३ ०७०३छ् यद्वां रथो विभिष्पतात्.. १७३०

४ ८ ३ ०८०१अ उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति .
४ ८ ३ ०८०१छ् येन तोकं च तनयं च धामहे .. १७३१
४ ८ ३ ०८०२अ उषो अद्येह गोमत्यश्वावति विभावरि .
४ ८ ३ ०८०२छ् रेवदस्मे व्युच्छ सूनृतावति .. १७३२
४ ८ ३ ०८०३अ युङ्क्ष्वा हि वाजिनीवत्यश्वां अद्यारुणां उषः .
४ ८ ३ ०८०३छ् अथा नो विश्वा सौभगान्या वह .. १७३३

४ ८ ३ ०९०१अ अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत्.
४ ८ ३ ०९०१छ् अर्वाग्रथं समनसा नि यच्छतं .. १७३४
४ ८ ३ ०९०२अ एह देवा मयोभुवा दस्रा हिरण्यवर्त्तनी .

४ ८ ३ ०९०२छ् उषर्बुधो वहन्तु सोमपीतये .. १७३५
४ ८ ३ ०९०३अ यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः .
४ ८ ३ ०९०३छ् आ न ऊर्जं वहतमश्विना युवं .. १७३६

४ ८ ३ १००१अ अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः .
४ ८ ३ १००१छ् अस्तमर्वन्त आशवोस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ भर .. १७३७
४ ८ ३ १००२अ अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः .
४ ८ ३ १००२छ् अग्नी राये स्वाभुवं स प्रीतो याति वार्यमिषं स्तोतृभ्य आ भर .. १७३८
४ ८ ३ १००३अ सो अग्नियो वसुर्गृणे सं यमायन्ति धेनवः .
४ ८ ३ १००३छ् समर्वन्तो रघुद्रुवः सं सुजातासः सूरय इषं स्तोतृभ्य आ भर .. १७३९

४ ८ ३ ११०१अ महे नो अद्य बोधयोषो राये दिवित्मती .
४ ८ ३ ११०१छ् यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते .. १७४०
४ ८ ३ ११०२अ या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः .
४ ८ ३ ११०२छ् सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते .. १७४१
४ ८ ३ ११०३अ सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः .
४ ८ ३ ११०३छ् यो व्यौच्छः सहीयसि सत्यश्रवसि याय्ये सुजाते अश्वसूनृते .. १७४२

४ ८ ३ १२०१अ प्रति प्रियतमं रथं वृशणं वसुवाहनं .
४ ८ ३ १२०१छ् स्तोता वामश्विनावृषि स्तोमेभिर्भूषति प्रति माध्वी मम शुतं हवं .. १७४३
४ ८ ३ १२०२अ अत्यायातमश्विना तिरो विश्वा अहं सना .
४ ८ ३ १२०२छ् दस्रा हिरण्यवर्त्तनी सुषुम्णा सिन्धुवाहसा माध्वी मम शुतं हवं .. १७४४
४ ८ ३ १२०३अ आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवं .
४ ८ ३ १२०३छ् रुद्रा हिरण्यवर्त्तनी जुषाणा वाजिनीवसू माध्वी मम शुतं हवं .. १७४५

४ ८ ३ १३०१अ अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासं .
४ ८ ३ १३०१छ् यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ .. १७४६
४ ८ ३ १३०२अ अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात्.
४ ८ ३ १३०२छ् समिद्धस्य रुशददर्शि पाजो महान्देवस्तमसो निरमोचि .. १७४७
४ ८ ३ १३०३अ यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः .
४ ८ ३ १३०३छ् आद्दक्षिणा युज्यते वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः .. १७४८

४ ८ ३ १४०१अ इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा .
४ ८ ३ १४०१छ् यथा प्रसूता सवितुः सवायैवा रात्र्युषसे योनिमारैक्.. १७४९
४ ८ ३ १४०२अ रुशाद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः .
४ ८ ३ १४०२छ् समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने .. १७५०

४ ८ ३ १४०३अ समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे .
४ ८ ३ १४०३छ् न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे .. १७५१

४ ८ ३ १५०१अ आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः .
४ ८ ३ १५०१छ् अर्वाञ्चा नूनं रथ्येह यातं पीपिवांसमश्विना घर्ममच्छ .. १७५२
४ ८ ३ १५०२अ न संस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह .
४ ८ ३ १५०२छ् दिवाभिपित्वेवसागमिष्ठा प्रत्यवर्त्तिं दाशुषे शम्भविष्ठा .. १७५३
४ ८ ३ १५०३अ उता यातं संगवे प्रातरह्नो मध्यन्दिन उदिता सूर्यस्य .
४ ८ ३ १५०३छ् दिवा नक्तमवसा शन्तमेन नेदानीं पीतिरश्विना ततान .. १७५४

४ ८ ३ १६०१अ एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते .
४ ८ ३ १६०१छ् निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः .. १७५५
४ ८ ३ १६०२अ उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत .
४ ८ ३ १६०२छ् अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः .. १७५६
४ ८ ३ १६०३अ अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः .
४ ८ ३ १६०३छ् इषं वहन्तीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते .. १७५७

४ ८ ३ १७०१अ अबोध्यग्निर्ज्म उदेति सूर्यो व्यू३षाश्चन्द्रा मह्यावो अर्चिषा .
४ ८ ३ १७०१छ् आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक्.. १७५८
४ ८ ३ १७०२अ यद्युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतं .
४ ८ ३ १७०२छ् अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि .. १७५९
४ ८ ३ १७०३अ अर्वाङ्त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः .
४ ८ ३ १७०३छ् त्रिवन्धुरो मघवा विश्वसौभगः शं न आ वक्षद्द्विपदे चतुष्पदे .. १७६०

४ ८ ३ १८०१अ प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः .
४ ८ ३ १८०१छ् अच्छा वाजं सहस्रिणं .. १७६१
४ ८ ३ १८०२अ अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति .
४ ८ ३ १८०२छ् हरिस्तुञ्जान आयुधा .. १७६२
४ ८ ३ १८०३अ स मर्मृजान आयुभिरिभो राजेव सुव्रतः .
४ ८ ३ १८०३छ् श्येनो न वंसु षीदति .. १७६३
४ ८ ३ १८०४अ स नो विश्वा दिवो वसूतो पृथिव्या अधि .
४ ८ ३ १८०४छ् पुनान इन्दवा भर .. १७६४

नवम प्रपाठकः . प्रथमोऽर्धः
४ ९ १ ०१०१अ प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसा .
४ ९ १ ०१०१छ् देवां अनु प्रभूषतः .. १७६५

४ ९ १ ०१०२अ सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा .
४ ९ १ ०१०२छ् ज्योतिर्जज्ञानमुक्थ्यं .. १७६६
४ ९ १ ०१०३अ सुषहा सोम तानि ते पुनानाय प्रभूवसो .
४ ९ १ ०१०३छ् वर्धा समुद्रमुक्थ्यं .. १७६७

४ ९ १ ०२०१अ एष ब्रह्मा य ऋत्विय इन्द्रो नाम शृतो गृणे .. १७६८
४ ९ १ ०२०२अ त्वामिच्छवसस्पते यन्ति गिरो न संयतः .. १७६९
४ ९ १ ०२०३अ वि सुतयो यथा पथा इन्द्र त्वद्यन्तु रातयः .. १७७०

४ ९ १ ०३०१अ आ त्वा रथं यथोतये सुम्नाय वर्त्तयामसि .
४ ९ १ ०३०१छ् तुविकूर्मिमृतीषहमिन्द्रं शविष्ठ सत्पतिं .. १७७१
४ ९ १ ०३०२अ तुविशुष्म तुविक्रतो शचीवो विश्वया मते .
४ ९ १ ०३०२छ् आ पप्राथ महित्वना .. १७७२
४ ९ १ ०३०३अ यस्य ते महिना महः परि ज्मायन्तमीयतुः .
४ ९ १ ०३०३छ् हस्ता वज्रं हिरण्ययं .. १७७३

४ ९ १ ०४०१अ आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो३ नार्व .
४ ९ १ ०४०१छ् सूरो न रुरुक्वाञ्छतात्मा .. १७७४
४ ९ १ ०४०२अ अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचनो अस्थात्.
४ ९ १ ०४०२छ् होता यजिष्ठो अपां सधस्थे .. १७७५
४ ९ १ ०४०३अ अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या .
४ ९ १ ०४०३छ् मर्तो यो अस्मै सुतुको ददाश .. १७७६

४ ९ १ ०५०१अ अग्ने तमद्याष्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृषं .
४ ९ १ ०५०१छ् ऋध्यामा त ओहैः .. १७७७
४ ९ १ ०५०२अ अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः .
४ ९ १ ०५०२छ् रथीरृतस्य बृहतो बभूथ .. १७७८
४ ९ १ ०५०३अ एभिर्नो अर्कैर्भवा नो अर्वाङ्क्स्वा३र्ण ज्योतिः .
४ ९ १ ०५०३छ् अग्ने विश्वेभिः सुमना अनीकैः .. १७७९

४ ९ १ ०६०१अ अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य .
४ ९ १ ०६०१छ् आ दाशुषे जातवेदो वहा त्वमद्या देवां उषर्बुधः .. १७८०
४ ९ १ ०६०२अ जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणां .
४ ९ १ ०६०२छ् सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत्.. १७८१

४ ९ १ ०७०१अ विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार .

४ ९ १ ०७०१छ् देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान .. १७८२
४ ९ १ ०७०२अ शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीडः .
४ ९ १ ०७०२छ् यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता .. १७८३
४ ९ १ ०७०३अ ऐभिर्ददे वृष्ण्या प्ऽँस्यानि येभिरौक्षद्वृत्रहत्याय वज्री .
४ ९ १ ०७०३छ् ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजायन्त देवाः .. १७८४

४ ९ १ ०८०१अ अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः .
४ ९ १ ०८०१छ् उत स्वराजो अश्विना .. १७८५
४ ९ १ ०८०२अ पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः .
४ ९ १ ०८०२छ् त्रिषधस्थस्य जावतः .. १७८६
४ ९ १ ०८०३अ उतो न्वस्य जोषमा इन्द्रः सुतस्य गोमतः .
४ ९ १ ०८०३छ् प्रातर्होतेव मत्सति .. १७८७

४ ९ १ ०९०१अ बण्महां असि सूर्य बडादित्य महां असि .
४ ९ १ ०९०१छ् महस्ते सतो महिमा पनिष्तम मह्ना देव महां असि .. १७८८
४ ९ १ ०९०२अ बट्सूर्य श्रवसा महां असि सत्रा देव महां असि .
४ ९ १ ०९०२छ् मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यं .. १७८९

४ ९ १ १००१अ उप नो हरिभिः सुतं याहि मदानां पते .
४ ९ १ १००१छ् उप नो हरिभिः सुतं .. १७९०
४ ९ १ १००२अ द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः .
४ ९ १ १००२छ् उप नो हरिभिः सुतं .. १७९१
४ ९ १ १००३अ त्वं हि वृत्रहन्नेषां पाता सोमानामसि .
४ ९ १ १००३छ् उप नो हरिभिः सुतं .. १७९२

४ ९ १ ११०१अ प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वं .
४ ९ १ ११०१छ् विशः पूर्वीः प्र चर चर्षणिप्राः .. १७९३
४ ९ १ ११०२अ उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः .
४ ९ १ ११०२छ् तस्य व्रतानि न मिनन्ति धीराः .. १७९४
४ ९ १ ११०३अ इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै .
४ ९ १ ११०३छ् हर्यश्वाय बर्हया समापीन्.. १७९५

४ ९ १ १२०१अ यदिन्द्र यावतस्त्वमेतावदहमीशीय .
४ ९ १ १२०१छ् स्तोतारमिद्दधिषे रदावसो न पापत्वाय रंसिषं .. १७९६
४ ९ १ १२०२अ शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे .
४ ९ १ १२०२छ् न हि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता च न .. १७९७

४ ९ १ १३०१अ शुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषां .
४ ९ १ १३०१छ् कृष्वा दुवांस्यन्तमा सचेमा .. १७९८
४ ९ १ १३०२अ न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान्.
४ ९ १ १३०२छ् सदा ते नाम स्वयशो विवक्मि .. १७९९
४ ९ १ १३०३अ भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित्.
४ ९ १ १३०३छ् मारे अस्मन्मघवञ्ज्योक्कः .. १८००

४ ९ १ १४०१अ प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत .
४ ९ १ १४०१छ् अभीके चिदु लोककृत्सङ्गे समत्सु वृत्रह .
४ ९ १ १४०१ए अस्माकं बोधि चोदिता नभन्तामन्यकेषां ज्याका अधि धन्वसु .. १८०१
४ ९ १ १४०२अ त्वं सिन्धूंरवासृजोऽधराचो अहन्नहिं .
४ ९ १ १४०२छ् अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं .
४ ९ १ १४०२ए तं त्वा परि ष्वजामहे नभन्तामन्यकेषां ज्याका अधि धन्वसु .. १८०२
४ ९ १ १४०३अ वि षु विश्वा अरातयोऽर्यो नशन्त नो धियः .
४ ९ १ १४०३छ् अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति .
४ ९ १ १४०३ए या ते रातिर्ददिवसु नभन्तामन्यकेषां ज्याका अधि धन्वसु .. १८०३

४ ९ १ १५०१अ रेवां इद्रेवत स्तोता स्यात्त्वावतो मघोनः .
४ ९ १ १५०१छ् प्रेदु हरिवः सुतस्य .. १८०४
४ ९ १ १५०२अ उक्थं च न शस्यमानं नागो रयिरा चिकेत .
४ ९ १ १५०२छ् न गायत्रं गीयमानं .. १८०५
४ ९ १ १५०३अ मा न इन्द्र पीयत्नवे मा शर्धते परा दाः .
४ ९ १ १५०३छ् शिक्षा शचीवः शचीभिः .. १८०६

४ ९ १ १६०१अ एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिं .
४ ९ १ १६०१छ् दिवो अमुष्य शासतो दिवं यय दिवावसो .. १८०७
४ ९ १ १६०२अ अत्रा वि नेमिरेषामुरां न धूनुते वृकः .
४ ९ १ १६०२छ् दिवो अमुष्य शासतो दिवं यय दिवावसो .. १८०८
४ ९ १ १६०३अ आ त्वा ग्रावा वदनीह सोमी घोषेण वक्षतु .
४ ९ १ १६०३छ् दिवो अमुष्य शासतो दिवं यय दिवावसो .. १८०९

४ ९ १ १७०१अ पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः .. १८१०
४ ९ १ १७०२अ ते सुतासो विपश्चितः शुक्रा वायुमसृक्षत .. १८११
४ ९ १ १७०३अ असृग्रं देववीतये वाजयन्तो रथा इव .. १८१२

४ ९ १ १८०१अ अग्निं होतारं मन्ये दास्वन्तं वसोः सूनुं सहसो जातवेदसं विप्रं न जातवेदसम्

.

४ ९ १ १८०१छ्य ऊर्ध्वरो स्वध्वरो देवो देवाच्या कृपा .
४ ९ १ १८०१ए घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः .. १८१३
४ ९ १ १८०२अ यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभिर्विप्रेभिः शुक्रमन्मभिः .
४ ९ १ १८०२छ् परिज्मानमिव द्यां होतारं चर्षणीनां .
४ ९ १ १८०२ए शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः .. १८१४
४ ९ १ १८०३अ स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहन्तरः परशुर्न द्रुहन्तरः .
४ ९ १ १८०३छ् वीडु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरं .
४ ९ १ १८०३ए निष्षहमाणो यमते नायते धन्वासहा नायते .. १८१५

नवम प्रपाठकः . द्वितीयोऽर्धः
४ ९ २ ०१०१अ अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो .
४ ९ २ ०१०१छ् बृहद्भानो शवसा वाजमुक्थ्य३ं दधासि दाशुषे कवे .. १८१६
४ ९ २ ०१०२अ पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना .
४ ९ २ ०१०२छ् पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे .. १८१७
४ ९ २ ०१०३अ ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः .
४ ९ २ ०१०३छ् त्वे इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः .. १८१८
४ ९ २ ०१०४अ इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य .
४ ९ २ ०१०४छ् स दर्शतस्य वपुषो वि राजसि पृणक्षि दर्शतं क्रतुं .. १८१९
४ ९ २ ०१०५अ इष्कर्त्तारमध्वरस्य प्रचेतसं क्षयन्तं राधसो महः .
४ ९ २ ०१०५छ् रातिं वामस्य सुभगां महीमिषं दधासि सानसिं रयिं .. १८२०
४ ९ २ ०१०६अ ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः .
४ ९ २ ०१०६छ् शुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा .. १८२१

४ ९ २ ०२०१अ प्र सो अग्ने तवोतिभिः सुविराभिस्तरति वाजकर्मभिः .
४ ९ २ ०२०१छ् यस्य त्वं सख्यमाविथ .. १८२२
४ ९ २ ०२०२अ तव द्रप्सो नीलवान्वाश ऋत्विय इन्धानः सिष्णवा ददे .
४ ९ २ ०२०२छ् त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसि .. १८२३

४ ९ २ ०३०१अ तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयन्त मातरः .
४ ९ २ ०३०१छ् तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा .. १८२४

४ ९ २ ०४०१अ अग्निरिन्द्राय पवते दिवि शुक्रो वि राजति .
४ ९ २ ०४०१छ् महिषीव वि जायते .. १८२५

४ ९ २ ०५०१अ यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति .
४ ९ २ ०५०१छ् यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः .. १८२६

४ ९ २ ०६०१अ अग्निर्जागार तमृचः कामयन्तेग्निर्जागार तमु सामानि यन्ति .
४ ९ २ ०६०१छ् अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः .. १८२७

४ ९ २ ०७०१अ नमः सखिभ्यः पूर्वसद्भ्यो नमः साकन्निषेभ्यः .
४ ९ २ ०७०१छ् युञ्जे वाचं शतपदीं .. १८२८
४ ९ २ ०७०२अ युञ्जे वाचं शतपदीं गाये सहस्रवर्त्तनि .
४ ९ २ ०७०२छ् गायत्रं त्रैष्टुभं जगत्.. १८२९
४ ९ २ ०७०३अ गायत्रं त्रैष्टुभं जगद्विश्वा रूपाणि सम्भृता .
४ ९ २ ०७०३छ् देवा ओकांसि चक्रिरे .. १८३०

४ ९ २ ०८०१अ अग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्ज्योतिरिन्द्रः .
४ ९ २ ०८०१छ् सूर्यो ज्योतिर्ज्योतिः सूर्यः .. १८३१
४ ९ २ ०८०२अ पुनरूर्जा नि वर्त्तस्व पुनरग्न इषायुषा .
४ ९ २ ०८०२छ् पुनर्नः पाह्यंहसः .. १८३२
४ ९ २ ०८०३अ सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया .
४ ९ २ ०८०३छ् विश्वप्स्न्या विश्वतस्परि .. १८३३

४ ९ २ ०९०१अ यदिन्द्राहं यथा त्वमीशीय वस्व एक इत्.
४ ९ २ ०९०१छ् स्तोता मे गोसखा स्यात्.. १८३४
४ ९ २ ०९०२अ शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे .
४ ९ २ ०९०२छ् यदहं गोपतिः स्यां .. १८३५
४ ९ २ ०९०३अ धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते .
४ ९ २ ०९०३छ् गामश्वं पिप्युषी दुहे .. १८३६

४ ९ २ १००१अ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन .
४ ९ २ १००१छ् महे रणाय चक्षसे .. १८३७
४ ९ २ १००२अ यो वः शिवतमो रसस्तस्य भाजयतेह नः .
४ ९ २ १००२छ् उशतीरिव मातरः .. १८३८
४ ९ २ १००३अ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ .
४ ९ २ १००३छ् आपो जनयथा च नः .. १८३९

४ ९ २ ११०१अ वात आ वातु बेषजं शम्भु मयोभु नो हृदे .
४ ९ २ ११०१छ् प्र न अयूंषि तारिषत्.. १८४०

४ ९ २ ११०२अ  उत वात पितासि न उत भ्रातोत नः सखा .
४ ९ २ ११०२छ् स नो जीवातवे कृधि .. १८४१
४ ९ २ ११०३अ  यददो वात ते गृहे३ऽमृतं निहितं गुहा .
४ ९ २ ११०३छ् तस्यो नो देहि जीवसे .. १८४२

४ ९ २ १२०१अ  अभि वाजी विश्वरूपो जनित्रं हिरण्ययं बिभ्रदत्कं सुपर्णः .
४ ९ २ १२०१छ् सूर्यस्य भानुमृतुथा वसानः परि स्वयं मेधमृज्रो जजान .. १८४३
४ ९ २ १२०२अ  अप्सु रेतः शिश्रिये विश्वरूपं तेजः पृथिव्यामधि यत्सम्बभूव .
४ ९ २ १२०२छ् अन्तरिक्षे स्वं महिमानं मिमानः कनिक्रन्ति वृष्णो अश्वस्य रेतः .. १८४४
४ ९ २ १२०३अ  अयं सहस्रा परि युक्ता वसानः सूर्यस्य भानुं यज्ञो दाधार .
४ ९ २ १२०३छ् सहस्रदाः शतदा भूरिदावा धर्त्ता दिवो भुवनस्य विश्पतिः .. १८४५

४ ९ २ १३०१अ  नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा .
४ ९ २ १३०१छ् हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युं .. १८४६
४ ९ २ १३०२अ  ऊर्ध्वो गन्धर्वो अधि नाके अस्थात्प्रत्यञ्चित्रा बिभ्रदस्यायुधानि .
४ ९ २ १३०२छ् वसानो अत्कं सुरभिं दृशे कं स्व३र्ण नाम जनत प्रियाणि .. १८४७
४ ९ २ १३०३अ  द्रप्सः समुद्रमभि यज्रिगाति पश्यन्गृध्रस्य चक्षसा विधर्मन्.
४ ९ २ १३०३छ् भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि .. १८४८

नवम प्रपाठकः . तृतीयोऽर्धः
४ ९ ३ ०१०१अ  आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनां .
४ ९ ३ ०१०१छ् सङ्क्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः .. १८४९
४ ९ ३ ०१०२अ  सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना .
४ ९ ३ ०१०२छ् तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा .. १८५०
४ ९ ३ ०१०३अ  स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन .
४ ९ ३ ०१०३छ् सं सृष्टजित्सोमपा बाहुशर्ध्यूऽ३ग्रधन्वा प्रतिहिताभिरस्ता .. १८५१

४ ९ ३ ०२०१अ  बृहस्पते परि दीया रथेन रक्षोहामित्रां अपबाधमानः .
४ ९ ३ ०२०१छ् प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां .. १८५२
४ ९ ३ ०२०२अ  बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः .
४ ९ ३ ०२०२छ् अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित्.. १८५३
४ ९ ३ ०२०३अ  गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा .
४ ९ ३ ०२०३छ् इमं सजाता अनु वीरयध्वमिन्द्रं सखायो अनु सं रभध्वं .. १८५४

४ ९ ३ ०३०१अ  अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः .
४ ९ ३ ०३०१छ् दुश्च्यवनः पृतनाषाडयुध्योऽ३स्माकं सेना अवतु प्र युत्सु .. १८५५

४ ९ ३ ०३०२अ इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः .
४ ९ ३ ०३०२छ् देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रं .. १८५६
४ ९ ३ ०३०३अ इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रं .
४ ९ ३ ०३०३छ् महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्.. १८५७

४ ९ ३ ०४०१अ उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि .
४ ९ ३ ०४०१छ् उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः .. १८५८
४ ९ ३ ०४०२अ अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु .
४ ९ ३ ०४०२छ् अस्माकं वीरा उत्तरे भवन्त्वस्मां उ देवा अवता हवेषु .. १८५९
४ ९ ३ ०४०३अ असौ या सेना मरुतः परेषामभ्येति न ओजसा स्पर्धमाना .
४ ९ ३ ०४०३छ् तां गूहत तमसापव्रतेन यथैतेषामन्यो अन्यं न जानात्.. १८६०

४ ९ ३ ०५०१अ अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि .
४ ९ ३ ०५०१छ् अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्तां .. १८६१
४ ९ ३ ०५०२अ प्रेता जयता नर इन्द्रो वः शर्म यच्छतु .
४ ९ ३ ०५०२छ् उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ .. १८६२
४ ९ ३ ०५०३अ अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते .
४ ९ ३ ०५०३छ् गच्छामित्रान्प्र पद्यस्व मामीषां कं च नोच्छिषः .. १८६३

४ ९ ३ ०६०१अ कङ्काः सुपर्णा अनु यन्त्वेनान्गृध्राणामन्नमसावस्तु सेना .
४ ९ ३ ०६०१छ् मैषां मोच्यघहारश्च नेन्द्र वयांस्येनाननुसंयन्तु सर्वान्.. १८६४
४ ९ ३ ०६०२अ अमित्रसेनां मघवन्नस्माञ्छत्रुयतीमभि .
४ ९ ३ ०६०२छ् उभौ तामिन्द्र वृत्रहन्नग्निश्च दहतं प्रति .. १८६५
४ ९ ३ ०६०३अ यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव .
४ ९ ३ ०६०३छ् तत्रा नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु .. १८६६

४ ९ ३ ०७०१अ वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज .
४ ९ ३ ०७०१छ् वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासतः .. १८६७
४ ९ ३ ०७०२अ वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः .
४ ९ ३ ०७०२छ् यो अस्मां अभिदासत्यधरं गमया तमः .. १८६८
४ ९ ३ ०७०३अ इन्द्रस्य बाहू स्थविरौ युवानावनाधृष्यौ सुप्रतीकावसह्यौ .
४ ९ ३ ०७०३छ् तौ युञ्जीत प्रथमौ योग आगते याभ्यां जितमसुराणां सहो महत्.. १८६९

४ ९ ३ ०८०१अ मर्माणि ते वर्मणा च्छादयामि सोमस्त्वा राजामृतेनानु वस्तां .
४ ९ ३ ०८०१छ् उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु .. १८७०
४ ९ ३ ०८०२अ अन्धा अमित्रा भवताशीर्षाणोऽहय इव .

४ ९ ३ ०८०२छ्  तेषां वो अग्निनुन्नानामिन्द्रो हन्तु वरंवरं .. १८७१
४ ९ ३ ०८०३अ  यो नः स्वोऽरणो यश्च निष्ट्यो जिघांसति .
४ ९ ३ ०८०३छ्  देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरं शर्म वर्म ममान्तरं .. १८७२

४ ९ ३ ०९०१अ  मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः .
४ ९ ३ ०९०१छ्  सृकं संशाय पविमिन्द्र तिग्मं वि शत्रूं ताढि वि मृधो नुदस्व .. १८७३
४ ९ ३ ०९०२अ  भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः .
४ ९ ३ ०९०२छ्  स्थिरैरङ्गैस्तुष्टुवां सस्तनूभिर्व्यशेमहि देवहितं यदायुः .. १८७४
४ ९ ३ ०९०३अ  स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः .
४ ९ ३ ०९०३छ्  स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ..
४ ९ ३ ०९०३ए  ॐ स्वस्ति नो बृहस्पतिर्दधातु .. १८७५

.. इत्युत्तरार्चिकः ..

.. इति सामवेदसंहिता समाप्ता..

→